ISSN No.:2278-0815

# भास्करोदयः

संदर्भित ज्योतिष-शोधपत्रिका

**Referred Research Journal of Jyotish**

**अष्टादशोऽङ्कः**

**सत्रम् 2020–21**

**सम्पादकः**

**प्रो.मदनमोहनपाठकः**

आचार्योऽध्यक्षश्च (Professor & Head) ज्यौतिषविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः, विशालखण्डः-४, गोमतीनगरम्
लखनऊ - २२६०१० (उ०प्र०)

नवदेहलीस्थितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रकाशितः

## भास्करोदयपत्रिकायाः प्रथमं लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
केन्द्रीयसर्वकारस्य मानव-
संसाधनविकासमन्त्रालयेन
सञ्चालितस्य नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
निदेशकाः
प्रो.वेम्पटिकुटुम्बशास्त्रिमहोदयाः

दिनाङ्कः- १८जनवरी २००१
स्थानम्- श्री.स.शि.के.सं.विद्यापीठम्, पुरी

## भास्करोदयपत्रिकायाः अष्टम-अङ्कस्य लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
शास्त्रसंवर्धकाः कुलपतयः
श्रीमन्तः प्रो.राधावल्लभत्रिपाठीमहोदयाः

पार्श्वे सन्ति गरलीपरिसरस्य
तत्कालीनप्र.प्राचार्याः
प्रो.के.बी.सुब्बरायुडुमहोदयाः

राष्ट्रपतिसम्मानिताः
आचार्याःरामचन्द्रपाण्डेयमहोदयाः

दिनाङ्कः- २६ फरवरी २०११
स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

# भास्करोदयः

**Referred Research Journal of Jyotish**

अष्टादशोऽङ्कः- सत्रम्- २०२० - २१



**संरक्षकः-**

**प्रो.परमेश्वरनारायणशास्त्री**

**कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली**

**सम्पादकः**

**प्रो.मदनमोहनपाठकः**

**आचार्योऽध्यक्षश्च (Pofessor & Head) ज्यौतिषविभागः**

**राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ - परिसरः, लखनऊ - २२६०१० (उ०प्र०)**

## परामर्शदात्री-समिति

**डॉ.हरिहरझाः,** (राष्ट्रपतिसम्मानितः) पूर्वप्राचार्यः, श्रीसदाशिवपरिसरः

**प्रो.रमाकान्तशुक्लः,** (राष्ट्रपतिसम्मानितः) आचार्योऽध्यक्षचरः, संस्कृत-विभागः D.U.

**प्रो.रामचन्द्रपाण्डेयः**(राष्ट्रपतिसम्मानितः) भू.पू.सङ्कायप्रमुखश्च, बी.एच.यू.

**प्रो. अर्कनाथचौधरी,** भू.पू.कुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरात

**प्रो.रामचन्द्रझाः-** भू.पू.कुलपतिः, कामेश्वरसिंहसंस्कृतविश्वविद्यालयः, दरभङ्गा

**प्रो.शिवाकान्तझाः,**भू.पू. कुलपतिः, नालन्दामुक्तविश्वविद्यालयः पटना,

**प्रो.सर्वनारायणझाः,** निदेशकः,केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः,

**प्रो. सुरेन्द्रझाः,** भू.पू. प्राचार्यः,राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः,

**प्रो.राधाकान्तठाकुरः,** आचार्योऽध्यक्षः सङ्कायप्रमुखश्च,ज्यौ.विभागः, तिरुपतिः

**सम्पादनसहायकाः-**

**डॉ. शैलेशकुमारतिवारी, डॉ. बालकिशोरतिवारी, श्रीवेदप्रकाशपाठकः, श्रीआनन्दप्रकाशपाठकः**



**प्रकाशकः-**

**सम्पादक-भास्करोदयः,** ज्योतिर्विज्ञान-अनुसन्धान-केन्द्रम्

**वेदानन्द-आश्रमः (www.vedanandashram.in)** खरगापुर, नजदीक-महेशकम्पलेक्स,

गोमतीनगरविस्तारः, लखनऊ -२२६०१० (उ.प्र.)


(सर्वाधिकारः सम्पादकाधीनः)

## लेखपर्यवेक्षक-मण्डलम्

| प्रो.सर्वनारायणझाः, | प्रो.देवीप्रसादत्रिपाठी, | प्रो.बृजेशकुमारशुक्लः |
|---|---|---|
| निदेशकः | कुलपतिः | कलासंकायाध्यक्षः |
| केन्द्रीयसंस्कृतविश्वविद्यालयः | उत्तराखण्डसं.विश्वविद्यालयः | लखनऊ-विश्वविद्यालयः |
| लखनऊपरिसरः, लखनऊ-२२६०१० | हरिद्वारः- २४९४०२ | लखनऊ-०९ |

प्रकाशक -
सम्पादकः, भास्करोदयः
ज्योतर्विज्ञान-अनुसन्धान-केन्द्रम्
वेदानन्द-आश्रम, खरगापुर, नजदीक- महेश काम्प्लेक्स
गोमतीनगरम् (विस्तार), लखनऊ-२२६०१० (उ.प्र.)

**ISSN No:-2278-0815**

संस्करणम् –
प्रथमसंस्करणम् – २०००-०१ (संस्कृतवर्षे)
अष्टादशसंस्करणम् - २०२०-२१

मुद्रकः
गणपति प्रिन्टर
२९-कन्हैयाकुँज विहार, बाराबिरवा, आलमबाग
लखनऊ - २२६०१० (उत्तर प्रदेशः)

(C) सम्पादकः

**प्रो.मदनमोहनपाठकः**
मोबा. ७००७७९७८१३, ९४५५४३७०६६
**e-mail:-** pathak_guruji@rediffmail.com
**website:-** www.vedanandashram.in

# सम्पादकीयम्

महाप्रभोर्भगवतो जगन्नाथस्यानुकम्पया भास्करोदयस्यास्य अष्टादशमङ्कं भवतां शास्त्रानुरागिणान्तत्रापि विशेषेण ज्योतिषशास्त्र-जिज्ञासूनां ज्योतिष-विभागीयानुसन्दधित्सूनाञ्च कर-कमलयोः प्रदाय प्रसन्नतामनुभवामि। पत्रिकाया अस्याः प्रयोजनं ज्योतष-विभागीयच्छात्राणां लेखन-कलायाः विकासेन सह तेषु परम्परागतज्यौतिषशास्त्रस्य प्रचारः प्रसारश्च वर्तते । अनेन छात्रा उपकृतास्तु भवन्त्येव सहैव प्रसरति ज्योतिषशास्त्रस्य ज्योतिः गृहे-गृहे, जने-जने ।

अस्तु, इयं पत्रिकापि लेखकानां भाववाहिका विशेषेण देवभाषया ज्योतर्विज्ञानस्य ज्योति-प्रसारिका वर्तते। पत्रिकायाः अस्याः गुणात्मकं स्वरूपमभिवर्धयितुं ते सर्वेऽपि वन्दनीया विद्वांसः प्रसङ्गेऽस्मिन् संस्मरणीयास्सन्ति येषां सर्वविधं सहयोगं सम्प्राप्य भास्करोदयोऽयं संस्कृतमाध्यमेन परम्परागतज्यौतिष-जिज्ञासूनां सकलं मनोभिलषितं पूरयन्नस्ति। अस्मिन् सारस्वतयज्ञकर्मणि बहूनां महानुभावानां सर्वविधसहयोगो भवति अपेक्षितः। तेषु सर्वप्रथमं संस्मर्यन्ते केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलपतयः शास्त्रमूर्त्तयः प्रो.परमेश्वरनारायणशास्त्रिमहोदयाः येषां चिरकालादेव सततप्रोत्साहनेन, आशीःप्रदानेन च एतादृशः सारस्वतो यज्ञः सम्पन्नतां याति। अनन्तरं स्मर्यन्ते केन्द्रीय-संस्कृतविश्वविद्यालयस्य कुलसचिवाः प्रो.एस्.सुब्रह्मण्यशर्ममहोदयाः, लखनऊपरिसरस्य निदेशकाः प्रो. सर्वनारायणझामहोदयाः, विभागीयाः सर्वेऽपि आचार्याः, सत्प्रेरकाः सुधयः, सहायक-सम्पादनसमितेः सदस्याः, परिसरस्य सर्वेऽपि प्रोत्साहकाः सहकर्मिणः येषां सर्वदा सोत्साहं सहयोगो मया प्राप्यते, तेषां समेषां कृते अहं साभारं कृतज्ञतां प्रकटयामि। एवमेव अत्र वन्दनीयाः लेखकाः, आयुष्मन्तश्छात्राश्च, विशेषेण धन्यवादार्हास्सन्ति । अतः सर्वेभ्यो धन्यवादराशीन् वितीर्य भगवते जगन्नाथाय, जगदम्बायै च प्रणामाञ्जलीन् विनिवेद्य विरमामि विस्तरादिति शम्।

विद्वच्चरणचञ्चरीको

शिवरात्रिः, संवत् २०७७ (मदनमोहनपाठकः)

१२ मार्च २०२१ शुक्रवासरः

## भास्करोदयस्यानुक्रमणिका


| क्र.सं. विषयः | नाम | पृष्ठसंख्या |
|---|---|---|
| शुभसम्मतयः | | 05 - 08 |
| 1. मान्याऽन्या कालचक्राख्या दशासु द्विजसत्तम! | प्रो. मदनमोहनपाठकः | 09 - 20 |
| 2. अधिमासविमर्शः | श्रीआनन्दप्रकाशपाठकः | 21 - 24 |
| 3. मासविमर्शः | डॉ. विकासः | 25 - 28 |
| 4. कूर्मचक्रस्यानुशीलम् | डॉ. ज्योतिप्रसाददाशः | 29 - 39 |
| 5. आयुर्दायविचारः | श्रीविनायक शर्मा | 40 - 45 |
| 6. वास्तुशास्त्रदृष्ट्या ग्रहमेलापकम् | डॉ. विष्णुकुमारनिर्मलः | 46 - 50 |
| 7. अष्टकूटमेलापकविचारः | डॉ. चन्द्रश्रीपाण्डेयः | 51 - 54 |
| 8. ज्योतिषशास्त्रीय ग्रहस्पष्टीकरणपरम्परा | डॉ. अश्विनीकुमारपाण्डेयः | 55 - 60 |
| 9. भारतीयज्ञानपरम्परायां ......भारतीयगणितज्ञाः - | डॉ. रामेश्वरदयालशर्मा | 61 - 65 |
| 10. आचार्यवराहमिहिरोक्तः वृष्टिविचारः - | डॉ. अरुणकुमारः | 66 - 73 |
| 11. ज्योतिषशास्त्रे गुप्तरोगाणां विचारः | डॉ. रमेशशर्मा | 74 - 81 |
| 12. शुक्लयजुर्वेदीय रुद्राष्टाध्याय्यां ज्यौतिषम् | डॉ.वेदप्रकाशपाण्डेयः | 82 - 86 |
| 13. प्रश्नस्याद्याक्षराल्लग्नज्ञानम् | श्रीवेदप्रकाशपाठकः | 87 - 91 |
| 14. देवासुराणामहोरात्रम् | सुश्रीबिभामिश्रा | 92 - 95 |
| 15. लखनऊपरिसरीय-ज्योतिष-<br>विभागस्य (2020-21 सत्रस्य) गतिविधयः:- | प्रो.मदनमोहनपाठकः | 96 - 102 |
| 16. संस्कृतगीतिका | प्रो.रामकुमारशर्मा | 103 |
| 17. संस्कृतसंरक्षणसम्वर्धनसम्बन्धि<br>विभिन्नकार्यक्रमेषु सम्पादकस्यावदानम् | प्रो.मदनमोहनपाठकः | 104 |

**प्रो. रामचन्द्रझाः**
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
कामेश्वरनगरम्, दरभङ्गा- ८४६००८
दूरभाषः- ०९४३००६३६४८
e-mail:-varunkjha@gmail.com




## शुभाशंसनम्

२०००-०१ तः प्रकाशमानां नाम्नीमिमां ज्योतिषशोधपत्रिकां दृष्ट्वा नितरां प्रसीदति मे मनः । अत्र विदुषां गवेषकानां छात्राणाञ्च शास्त्रीया लेखा जिज्ञासूनां कृते समुपकाराय विलसन्ति ।

ज्ञानार्जने पत्रिकायाः महत्त्वपूर्णं स्थानं विद्यते सत्वष्वपि बहुविधेषु ज्ञानसाधनोपकरणेषु। भारतीयविद्यासु ज्योतिषशास्त्रस्य महत्त्वपूर्ण स्थानं विद्यते। सर्वविध-लौकिक-पारलौकिककार्य-सम्पादनाय मानवजीवनगत-शुभाशुभफल-ज्ञानाय च वेदस्य चक्षुरूपात्मकं शास्त्रमिदं परमोपयोगि विद्यते।

एवम्भूतं ज्यौतिषशास्त्रीयविषयमादायान्वर्थनाम्नी पत्रिकेयं भास्करवद् भासमाना जगतां कल्याणाय जायतां जानकीजानिकृपयेति शम् ।

- इत्याशास्ते
विदुषामनुचरो



स्थानम्- दरभङ्गा
दिनाङ्कः- ५/८/२०१३
विक्रमाब्दः२०७०
श्रावणकृष्ण-मासशिवरात्रिः
सोमवासरः

**प्रो.विश्वमूर्त्तिशास्त्री**
**प्राचार्यः**
राष्ट्रियसंस्कृतसंस्थानम्, गरली-परिसरः
गरली, काँगडा (हि.प्र.)
Mob:-94191-38606
E-mail:- profvmshastri@gmail.com



# शुभाशंसनम्

## भास्करोदयः

संस्कृतस्य प्रचाराय ज्यौतिषस्य विशेषतः।
यत्नः सर्वात्मना साध्यस्तदर्थं भास्करोदयः।।
महिमा भास्करस्यात्र सर्वैर्जेगीयते बुधैः।
समेषां मङ्गलं कुर्वन् भासतां भास्करोदयः।।
ज्योतिर्विदां शुभाशीर्भिर्देवानामनुकम्पया।
सर्वदा देवभाषायां राजतां भास्करोदयः।।
महत्त्वं ज्योतिषस्यात्र प्रस्तोतुं जगतीतले।
जातो हिमाचलाकाशे गरल्यां भास्करोदयः।।
हिताय सर्वलोकानां छात्राणाञ्च विशेषतः।
अस्मिन् परिसरे भायात् सर्वदा भास्करोदयः।।
यस्य प्रवर्त्तको विज्ञो मान्यो मदनमोहनः।
असौ सर्वमनःपद्मं मोदयेद् भास्करोदयः।।

- इत्याशास्ते
विदुषामनुचरो

श्रावणशुक्लपूर्णिमा,
संस्कृतदिवसः
विक्रमाब्दः२०६२
दि. 19/8/2005
शुक्रवासरः

**प्रो.अर्कनाथचौधरी**
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः
विशालखण्ड-४, गोमतीनगरम्
लखनऊ - २२६०१० (उ.प्र.)
फोन (०५२२)२३०४०६३, २३९३७४८ (का.)
फोन (०५२२) २३०२९९३ (फैक्स)
e-mail- rskslucknow@yahoo.com



# शुभाशंसनम्

## भास्वानुदेष्यति

षट्त्सु वेदाङ्गेषु ज्योतिषं शास्त्रं परब्रह्मणो निच्छ्वसितस्य वेदशरीरस्य चक्षुरिति पाणिनिः स्वशिक्षाग्रन्थे उल्लिलेख । तदेव वयमपि मन्यामहे । नेत्रं विना अन्धो भवति जनः । लोकयात्रारूपे विषमे मार्गे धावन् कश्चिदपि अन्धः पतत्यवश्यम् । किन्तु नेत्राङ्गरूपिज्योतिषशास्त्रज्ञो विषमेऽपि लोकयात्रामार्गे न पतति । यतोहि-

प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ "इत्यस्माकमृषीणामुद्घोषः । प्रकाशपुञ्जयोः साक्षिभूतयोः समवस्थाने क्वान्धता ? कस्यान्धता ? न कस्यापि । पुनश्च 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमि" ति ज्ञानसिद्धान्तानुसारेणापि प्रकाशरूपेन्द्रियस्य अर्थस्य च सन्निकर्षेण यल्लब्धं ज्ञानमनन्तं प्रामाणिकं तदेव ज्योतिषं प्रकटयतीति महत्त्वातिशयमस्त्येव लोकजीवनेऽस्य शास्त्रस्य।

एतादृशस्य शास्त्रस्य विषये अनुदिनमनुसन्धानमाचरन्तो दृश्यन्ते विज्ञाः। राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य (भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनस्य) लखनऊ-परिसरस्थः ज्योतिषशास्त्रमर्मज्ञो व्यवहारकुशलो ज्योतिषविभागाध्यक्षः प्रो. मदनमोहनपाठक 'भास्करोदयः" इति नाम्ना ज्योतिषशोधपत्रिकां लोकाय समर्पयन् भृशमुपकारं जनयति पाठकानां सुधियां छात्राणाञ्चेति परिसरपक्षतोऽस्मत्पक्षतश्च साधुवादार्हः। मन्ये स्युरत्र बहवो लेखाः विदुषां शोधार्थिनाञ्च। एतैः लेखैः उदितो भास्वान् सर्वदैवोदितः स्थास्यतीति विश्वासः। तथापि लोकव्यवहारोपयोगिनो लेखाः अस्मिन्नङ्के भाविन्यङ्के चावश्यं योज्याः विदुषा सम्पादकेन प्रो.पाठकमहोदयेनेत्यनुरोधः। शतं जीव्यान्मदनमोहनपाठक इति मदीयं शुभाशंसनम्।

प्रो.अर्कनाथचौधरी

दिनाङ्कः- १५/१०/२०१३
संवत् २०७०पापाङ्कुशैकादशी
भौमवासरः

**प्रो.सर्वनारायणझाः**
**कुलपतिः**
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
दरभङ्गा-८४६००८ (बिहार)
मोबा. - ८४४७९७५२१३
email:- snjha62@gmail.com



।। ॐ नमश्चण्डिकायै ।।

## शुभाशंसनम्

दैवं फलति सर्वत्र न विद्या न च पौषम्। समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्।।

अथ च - प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि।।

किञ्च-

गुणोऽपि दोषतां याति वक्रीभूते विधातरि।
सानुकूले पुनस्तस्मिन् दोषोऽपि च गुणायते।

अपि च - भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।

इत्थं यस्य दैवस्य एतावन्माहात्म्यं गायन्ति मनीषिणस्तस्य ज्ञानं येन शास्त्रेण भवति तच्छास्त्रं नाम ज्योतिषमिति वयं जानीमः। तज्ज्ञातुं त्रिस्कन्धज्योतिषशास्त्रस्याध्ययनमध्यापन-मन्वेषणमनिवार्यम्।

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊ-परिसरस्य ज्योतिषविभागाध्यक्ष आचार्यः मदनमोहनपाठक अध्ययनाध्यापनलेखानुसन्धानेऽतितरामनुरक्तः सन् अनुसन्धित्सूनां छात्राणां हिताय भास्करोदयनााम्निं शोधपत्रिकामपि प्रकाशयतीति नितरां मोदते मे मनः। पत्रिकेयं सम्पादकश्च सुतरां त्विष्याादिति मे शुभाशंसा ।

**प्रो.सर्वनारायणझाः**

संवत् २०७४ महाशिवरात्रिः
दिनाङ्कः- १४/०२/२०१८
बुधवासरः

# मान्याऽन्या कालचक्राख्या दशासु द्विजसत्तम!

**प्रो.मदनमोहनपाठकः**
आचार्योऽध्यक्षश्च, ज्योतिषविभागे
राष्ट्रियसंस्कृतसंसथानम्, लखनऊ-परिसरः
e-mail:- profmmpathak@gmail.com

ज्योतिषशास्त्रफलं पुराणगणकैरादेश इत्युच्यते[1] इति भास्करीयवचनानुसारं ज्योतिषशास्त्रमिदम् आदेशशास्त्रमस्ति। नूनं हि ज्योतिषशास्त्रमिदं कालस्य रहस्यमवबोधयति। इदं हि शुभाशुभफलद्योतकं शास्त्रमस्तीत्यत्र नास्ति काचित् संशीतिलेशः। अस्य ज्योतिषशास्त्रस्यापरं नाम कालविधानशास्त्रम्। ज्योतिषशास्त्रस्यास्य कथं कालविधायकत्वमित्यस्मिन् विषये उक्तं यथा श्रीमता भास्कराचार्येण –

**वेदास्तावाद्यज्ञकर्मप्रवृता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण**
**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्।।**[2]

अर्थात् वेदाः यज्ञार्थं प्रवृत्ताः। यज्ञस्तु सुकाले कृतमेव सफलं याति। अकाले कृतं कर्म वैफल्यं यातीति कालविधायकस्य ज्योतिषशास्त्रस्य गुह्यं रहस्यम्। कालः कथमस्माकीनां जीवनं प्रभावयतीति जिज्ञासा स्वाभाविकी एव। कालः न केवलमस्माकं जीवनमेव नैव प्रभावयति, अयन्तु सकलं चराचरं जगदपि स्वकीयप्रभावेन प्रभावयति। कालस्तु साक्षात् परात्परपरम्ब्रह्मणः स्वरूपमेव। यतः स्वयं भगवता श्रीकृष्णचन्द्रेण श्रीमद्भगवद्गीतायामेकादशेऽध्याये विश्वरूपदर्शन- योगप्रसङ्गे सम्यगेव उक्तम्-

**कालोऽस्मि लोकक्षयकृत् प्रवृद्धः लोकान् समाहर्तुमिह प्रवृत्तः।**
**ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः।।** [3]

अपि च वैशेषिकदर्शनशास्त्रानुसारं सप्त एव पदार्थाः सन्ति। तद्यथा- द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावेति सप्त पदार्थाः।[4] अत्र सप्त पदार्थेषु प्रथमः पदार्थः द्रव्यः। द्रव्यं नाम गुणवत्वम्, अर्थात् यस्मिन् गुणाः तिष्ठन्ति। वैशेषिकमतानुसारं जगदुत्पत्तिकारणभूतानि नव द्रव्याणि सन्ति। तद्यथा- **पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मामनांसि नवैव**[5]। अर्थात् पृथ्वी-अप-तेज-वायु-आकाश-काल-दिक्-आत्मा-मनांसीति नव द्रव्याणि वैशेषिकमते जगदुत्पत्तौ कारणभूतानि सन्ति। अत्र नव द्रव्येषु कालेति द्रव्यं ज्योतिषशास्त्रस्य प्रतिपाद्यविषयेष्वन्यतमम्। यतः ज्योतिषशास्त्रं कालविधानस्यैव द्योतकं शास्त्रम्। विषयेऽस्मिन् उक्तमपि लगधाचार्येण [6]-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्।।**

एभिर्वचनैः इदं सत्यमेव प्रतिभाति पदर्थविशेषस्य कृते यदनुकूल-प्रतिकूलकालयोः निर्देशः

1. सिद्धान्तशिरोमणिः गोलाध्यायः गोलप्रशंसा श्लो.सं. 6
2. सिद्धान्तशिरोमणिः मध्यमाधिकारे कालमानाध्याये श्लो.सं. 9
3. श्रीमद्भगवद्गीता -11/
4. अन्नंभट्ट कृत तर्कसंग्रहे
5. अन्नंभट्ट कृत तर्कसंग्रहे
6. वेदाङ्गज्योतिषम्

ज्योतिषशास्त्रद्वारा एव सञ्जायते। ज्योतिषशस्त्रस्य कश्यपाचार्यानुसारं अष्टादशाचार्या[7] स्तथा महर्षि-पराशरमतानुसारमेकोनविंशतिः[8] आचार्याः ख्यापिताः विद्यन्ते। यद्यप्येतेषां समेषामाचार्याणां कालप्रभावात् अद्यत्वे सर्वे ग्रन्थाः नैव प्राप्यन्ते। तथापि एषां समेषाम् आचार्याणां सिद्धान्त-संहिता-होरेति त्रयाणां स्कन्धानां प्रणयने महद्योगदानं विद्यते। एषु त्रिषु स्कन्धेषु होरास्कन्धस्य जनानां शुभाशुभफलप्रतिपादने महद्योगदानं विद्यते। अद्यत्वे उपलब्धेषु समेषु जातकग्रन्थेषु वराहदैवज्ञ कृतं[9] लघुजातकं, बृहज्जातकञ्च, महर्षि-जैमिनिकृज्जैमिनीसूत्रम्[10], महर्षिपराशर[11]कृत् लघुपाराशरी, मध्यपाराशरी तथा बृहत्पाराशरहोराशास्त्रम्, श्रीकल्याणवर्मा[12] कृत् सारावलीग्रन्थः, श्रीवैद्यनाथदैवज्ञ[13] कृत् जातकपारिजातग्रन्थः, श्रीमहादेवदैवज्ञ कृत् जातकतत्त्वम्, श्रीगणेशदैवज्ञ[14]कृत् जातकालङ्कारः, मन्त्रेश्वर[15]दैवज्ञकृत् फलदीपिका संज्ञको ग्रन्थः प्रमुखत्वेन राराजते। एतेषु ग्रन्थेषु फलादेशविचारः व्यापकत्वेन सर्वत्र यथास्थलं प्राप्यते। परं फलादेशस्य यादृशं विवेचनं बृहत्पाराशरहोराशास्त्रे दृश्यते तादृशमन्यत्र नैव कुत्रापि दृश्यते।

---

7. सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः। कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः। शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्तकाः।। गणकतरङ्गिणी-पृ.सं.-1

8. विश्वसृङङ्नारदो व्यासो वशिष्ठोऽत्रिः पराशरः। लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः।।
पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः। गर्गो मरीचिरित्येते ज्ञेयाः ज्योतिःप्रवर्तकाः।। गणकतरङ्गिणी-पृ.सं.-1

9. म.म.पं.श्रीसुधाकरद्विवेदीमतानुसारं वराहमिहिरस्य जन्मशकाब्दः 427, अस्य परिचयबोधकः श्लोकः –
आदित्यदासतनयस्तदवाप्तबोधः काम्पिल्लके सवितृलब्धवर प्रसादः।
आवन्तिको मुनिमतान्यवलोक्य सम्यग्घोरां वराहमिहिरो रुचिराञ्चकार।। बृहज्जातकम्-16/5

10. शङ्करबालकृष्णदीक्षितकृत् भारतीयज्योतिषग्रन्थानुसारेण अयमार्षग्रन्थः। परं स एव लिखति यत् अस्य ग्रन्थस्योल्लेखः बृहज्जातके अथवा अन्यस्मिन् कस्मिंश्चित् ग्रन्थे नैवोपलभ्यते। अस्य महर्षिजैमिनेः लिखितः जैमिनिसूत्राभिधः ग्रन्थः गद्यात्मकः सूत्ररूपश्च, परिचयश्चास्य न कुत्राप्यवलोक्यते।

11. अस्य परिचयो नाम स्थान-कालादिविषयः न कुत्रापि उपलभ्यते। पौराणिकमान्यतानुसारं अयं सप्तर्षिष्वन्यतमस्य महर्षिवशिष्ठस्य पौत्रः, महर्षिशक्तेः पुत्रः, महर्षिवेदव्यासस्य पिता, निषादराजदुहितायाः सत्यवत्याः आद्यपतिः, कालान्तरे अस्याः सत्यवत्याः विवाहः राजाशान्तनुना सह जाता। अनेन अनुमीयते यत् अयं महाभारतकालत् पूर्ववर्ती आसीदिति।

12. शङ्करबालकृष्णदीक्षितकृत् भारतीयज्योतिषग्रन्थानुसारेण अस्य कल्याणवर्मणः कालः 821 शकाब्दः। द्रष्टव्या पृ.सं. 638

13. भारद्वाजकुलोद्भवस्य विदुषः श्रीव्यङ्टाद्रेरिहइत्यनेन अयं वैद्यनाथदैवज्ञः भारद्वाजकुलोद्भवस्य श्रीव्यङ्टाद्रेः विदुषः पुत्रः आसीदिति परिचयः प्राप्यते। वि.द्र. जातक- पारिजात श्लो.सं. 1/2 तथा संगृह्य सारावलीमुख्यतन्त्रं करोम्यहं जातकपारिजातम्-इत्यनेन कल्याणवर्मणः 821 शकाब्दात् परवर्ती आचार्यः आसीदिति- भारतीयज्योतिष-शिवनाथझारखण्डी। एवञ्च https//hi.m.wikipedia.org. अनुसारं वैद्यनाथदैवज्ञस्य कालः 14 शताब्दी आसीदिति।

14. श्रीगणेशदैवज्ञः गुर्जरप्रान्तस्य भारद्वाजकुलोद्भवस्य विदुषः केशवाचार्यस्य पुत्रः, कान्हाजी नामधेयस्य पौत्रः आसीत्। अयं 1535 शकाब्दे षडध्यायात्मकं जातकालङ्काराख्यं फलितग्रन्थं रचयामास।

15. अयं फलदीपिकाग्रन्थः अष्टाविंशति (28)अध्यायेषु विभक्तः 865 श्लोकेषु निबद्धोऽस्ति। दक्षिणभारतस्य सुप्रसिद्धोऽयं ग्रन्थः सर्वादौ 1925 ख्रिस्ताब्दे कलकत्तानगरे प्रकाशितः । तदनु गोपेशकुमारओझावर्येण इत्यस्य प्रकाशनमाकारि। अस्य ग्रन्थकर्तुः मन्त्रेश्वरदैवज्ञस्य कालः केषाञ्चन मते त्रयोदशशताब्दी, केषाञ्चन मते षोडशशताब्दी अस्तीत्यस्मिन् विषये मतैक्यं नैवावलोक्यते। अस्य मन्त्रेश्वरस्य आदिमं नाम मार्कण्डेय भट्टाद्रि तथा अयं दक्षिणभारतस्य नम्बूदरी ब्राह्मणकुलोत्पनः आसीत्।

जन्मपत्रिकायां फलादेशः विविधयोगमाध्यमेन भवति। योगाः ग्रहाधीनाः भवन्ति। तद्यथा[16]-

**ग्रहाधीनाः योगाः सदसदभिधानाजनिमतां ततो योगाधीनं फलमिति पुराणैः समुदितम्।**
**अतो वक्ष्ये योगान् सकलगणकानन्दजनकान् शुकस्यादुद्भूतं मतमिह विलिक्येह रुचिरम्।।**

परं जातकपत्रस्य शुभयोगः भवतु अशुभयोगो वा राजयोगः भवतु राजभङ्गयोगो वा समेषामपि योगानां फलं कालाधीनं भवति। यदा जातकस्य जीवने दशान्तर्दशानुसारेण तस्य योगकर्तृग्रहस्य दशा समायाति तदा जातकः तस्य योगस्य फलमवाप्नोति। जातकग्रन्थेषु दशायाः बहवः प्रकाराः प्रतिपादिताः विद्यन्ते। तेषु दशसंख्यकाः नक्षत्राश्रिताः दशाः सन्ति [17]।

**विविधास्तु-दशाः प्रोक्ताः किन्तु तत्र सतां मताः। विंशोत्तरी तथा चाष्टोत्तरी वै षोडशोत्तरी॥**
**द्वादशोतर्यथो पञ्चोत्तरी शतसमा तथा।। दशा चतुरशीत्यब्दा द्विसप्ततिसमा तथा॥**
**षष्ट्यब्दाऽपि च षट्-त्रिंशद्वत्सरापि द्विजोत्तम। इमा ऋक्षाश्रिताः ख्याताः प्राचीनविबुधैः पुरा॥**

अर्थात् (१) विंशोत्तरी, (२) अष्टोत्तरी, (३) षोडशोत्तरी, (४) द्वादशोत्तरी, (५) पञ्चोत्तरी, (६) शतसमा, (७) चतुरशीत्यब्दा (८) द्विसप्ततिसमा, (९) षष्ट्यब्द (१०) षट्त्रिंशद्वत्सरेति दशसंख्यकाः इमाः नक्षत्राश्रिताः दशाः सन्ति। एतदतिरिक्तमपि द्वाविंशतिसंख्यकाः दशाः वर्तन्ते यासां विचारः महर्षिपराशरेण तत्रैव कृतो विद्यते[18]। तद्यथा-

**कालाभिधा दशा चक्राभिधा च परिकीर्तिता। मान्याऽन्या कालचक्राख्या दशामु द्विजसत्तम !॥**
**चरा परा स्थिराख्या च दशा केन्द्राभिधा तथा। कारकादिग्रहोद्भूता ब्रह्मग्रहदशाऽपि च॥**
**माण्डूकी च दशा प्रोक्ता तथा शूलाभिधा बुधैः। अपि योगार्धजा ब्रह्मन् ! दृग्दशा तदनन्तरम्॥**
**त्रिकोणसंज्ञका राशि-दशा पञ्चस्वराभिधा। योगिनीसंज्ञिका पिण्डदशा चांशी परा स्मृता॥**
**नैसर्गिकदशा चाष्टवर्गसन्ध्ये दशे तथा। पाचकाख्याऽपरा तारादशा सर्वा न सम्मता ॥**

अर्थात् ऊपर्युक्ताभ्यः नक्षत्राश्रितदशसंख्यकदशाभ्यः अतिरिक्ताः (१)कालदशा, (२) चक्रदशा, (३)कालचक्रदशा, (४)चरदशा, (५)स्थिरदशा, (६)केन्द्रदशा, (७)कारकग्रहोत्थदशा, (८)ब्रह्मग्रहदशा, (९)मण्डूकदशा, (१०)शूलदशा, (११)योगार्धदशा, (१२)दृग्दशा, (१३) त्रिकोणदशा, (१४)राशिदशा, (१५)पञ्चस्वरदशा, (१६)योगिनीदशा, (१७)पिण्डदशा, (१८) अंशजदशा, (१९)नैसर्गिकदशा, (२०)अष्टवर्गदशा, (२१)सन्ध्यादशा, (२२)पाचकदशा, (२३) तारादशा भवन्ति, येषामुल्लेखः महर्षिपराशरेण स्वीये होराशस्त्रे कृतो विद्यते। परमिमाः सर्वाः दशाः सर्वमान्याः नैव सन्ति।

ऊपर्युक्तासु एतासु सर्वाष्वपि दशासु कालचक्रदशायाः आनयनप्रकारः छात्राणां सुखबोधाय अत्रोपस्थाप्यते। यतः अस्याः दशायाः वर्णनं न केवलमुत्तरभारते अपितु दक्षिणभारतीयजातकग्रन्थेष्वपि विस्तरेण उपलभ्यते। कालचक्रदशायाः सुगमतापूर्वकमवगमनार्थं सव्यापसव्यक्रमेण द्वयोः चक्रयोः

16. जातकालङ्कारः 3/1
17. बृ.पा.हो.शा. दशाभेदाध्यायः 47/2-5
18. बृ.पा.हो.शा. दशाभेदाध्यायः 47 / 6-10

स्थापना कर्तव्या। तत्र प्रथमचक्रे (सव्यचक्रे) 1-2-3-7-8-9-13-14-15-19-20-21-25-26-27 संख्यक-नक्षत्राणां त्रिकं-त्रिकं कृत्वा ऊर्ध्वाधरक्रमेण स्थापना क्रियते। एवमेव अपसव्यचक्रे (द्वितीयचक्रे) अवशिष्टानां 4-5-6-10-11-12-16-17-18-22-23-24 संख्यकनक्षत्राणां स्थापना त्रिकं त्रिकं ऊर्ध्वाधरक्रमेणैव क्रियते। तदनन्तरं 1-2-3 अर्थात् मेष-वृष-मिथुनराशीनां पृथक्-पृथक् 1-2-3-4 चरणेषु नव-नव निर्दिष्टराशीनां स्थापना कर्तव्या। यथा अश्विनीनक्षत्रस्य प्रथमचरणस्य पंक्तिमध्ये निम्नलिखिताः राशयः सन्ति। तद्यथा[19] -

**पौरं गावो मित संदिग्धं नक्षत्रेन्दुः स तु भूशूलम्। रूपेत्रक्षन्निधयोरङ्गे वाणी चस्थं दधि नक्षत्रम्।।**

अर्थात् पौरं इत्यत्र द्वौ वर्णौ विद्येते। औकारस्वरयुक्तः पकारस्तथा अनुस्वारयुक्तः रकारः। अत्र स्वराणां पृथक्तया कश्चिद् विशिष्टः विचारः नास्ति। केवलं मूलः वर्ण एव स्वीकृत्य तस्य संख्या गृह्यते। यथा पौरं इत्यत्र पकारस्तथा रकारः । अत्र पकार इत्यक्ते 1 संख्या तथा रकार इत्युक्ते 2 संख्या स्वीकर्तव्या। कथमेतदर्थं ज्ञातव्यं वर्णादङ्कोत्पत्तिसिद्धान्तस्य कटपयवर्गभवैरिति श्लोकः। तद्यथा-

**कटपयवर्गभवैरिह पिण्डान्त्यैरक्षरैरङ्काः। नञे च शून्ये ज्ञेये तथा स्वरे केवले कथितम्।।**

अस्य विशिष्टं वर्णनम् अग्रिमे पृष्ठे सचक्रं विश्लेषितं विद्यते। इदानीं कालचक्रस्य निर्माणप्रकारं समुपस्थापयामि। तदर्थम् ऊपर्युक्तस्य **पौरं गावो मित संदिग्ध**.......मित्यस्य श्लोकस्य **कटपयवर्गभवैरिह** श्लोकानुसारं अर्थावगमनप्रकारः उच्यते। यथा विषयेऽस्मिन् पूर्वं निगदितं यदत्र पौरं इत्यत्र पकारस्तथा रकारः विद्येते। अत्र पकार इत्यक्ते 1 संख्या तथा रकार इत्युक्ते 2 संख्या स्वीकर्तव्या। एवमेव 1 इत्यनेन मेषराशिः 2 इत्यनेन वृषराशिः इत्थमग्रेऽपि अवगन्तव्यः। तद्यथा पौ = 1 मेषः, रं = 2 वृषः, गा = 3 मिथुनः, व = 4 कर्कः, मि = 5 सिंहः, त = 6 कन्या, सं = 7 तुला, दि = 8 वृश्चिकः, धं = 9 । अर्थात् अश्विनीनक्षत्रस्य प्रथमचरणे जायमानस्य जनस्य 1 तः 9 राशीनामधिपस्य ग्रहस्य दशाक्रमः प्रचलति। एवमेव अश्विनीनक्षत्रस्य द्वितीयचरणे जायमानस्य जनस्य ग्रहदशाक्रमः **नक्षत्रेन्दुः स तु भूशूलम्** अर्थात् न = 10, क्ष = 11, त्र = 12, दु = 8 वृश्चिकः, स = 7 तुला, तु = 7 कन्या, भू = 4 कर्कः, शू = 5 सिंहः, लम् = 3 मिथुनः भवति। अर्थात् एतेषां राशीनामधिपतयः क्रमेण दशाधिपाः भवन्ति। एवमेव **अश्विनीनक्षत्रस्य तृतीयचरणे** जायमानस्य जनस्य ग्रहदशाक्रमः- रू = 2 वृषः, पे = 1 मेषः, त्र = 12 मीनः, क्ष = 11 कुम्भः, न्नि = 10, ध = 9 धनुः, यो = 1 मेषः, र = 2 वृषः, ङ्गे इति ङ् गे इति सम्मिल्य भवति, अतोऽत्र गकारस्य = 3 मिथुनः सम्भवति। एवमेव **अश्विनीनक्षत्रस्य चतुर्थचरणे** जायमानस्य जनस्य ग्रहदशाक्रमः - वा = 4 कर्कः, णी = 5 सिंहः, च = 6 कन्या, स्थं इत्यत्र थकारस्य = 7 तुला, द = 8 वृश्चिकः, धि = 9 धनुः, न = 10 मकरः, क्ष = 11 कुम्भः, त्रम् = 12 मीनः भवति। एतेषां राशीशाः क्रमेण दशाधिपाः भवन्ति।

कालचक्रदशायां अश्विनीनक्षत्रस्य चतुर्षु चरणेषु राशिस्थापनायाः व्यवस्था कृते **पौरं गावो मित संदिग्धं नक्षत्रेन्दुः स तु भूशूलम्। रूपेत्रक्षन्निधयोरङ्गे वाणी चस्थं दधि नक्षत्रम्।।** अयं

19. फलदीपिका-मिश्रदशाध्यायः 22/3

श्लोकः प्रदत्तो वर्तते। अश्विनीनक्षत्रस्य चतुर्षु चरणेषु जायमानस्य जातकस्य उपरि प्रदत्तक्रमानुसारेण ग्रहदशाक्रमः अवगन्तव्यः। प्रत्येकस्मिन् चरणे जायमानस्य जातकस्य चक्रे प्रदत्तराशीशानां दशा प्रचलति।

कालचक्रदशाद्योतके चक्रे प्रत्येकनक्षत्राणां पृथक्अ-पृथक् चतुर्णां चरणानां दशाक्रमः प्रदर्शितो विद्यते। तत्रादौ अश्विनीनक्षत्रस्य चतुर्णां चरणानां कृते वर्तते। अर्थादेकस्मिन् नक्षत्रे चत्वारि चरणानि भवन्ति। तेषु पृथक्-पृथक् एकैक-चरणेषु नव-नव राशयः स्थापिताः भवन्ति। अतः 9 X 4 = 36 राशीनामुल्लेखः ऊपर्युक्ते **पौरं गावो ....** श्लोके वर्तते। कथं एकस्मिन् श्लोके 36 राशीनामुल्लेखो वर्तते। तदर्थं निम्नलिखित वर्णादङ्कोत्पत्तिसिद्धान्तः अवगन्तव्यः।

प्रसङ्गादत्र वर्णादङ्कोत्पत्तिसिद्धान्तः अवगन्तव्यः[20]। वर्णादङ्कोत्पत्तिसिद्धान्तविषये संस्कृतजगति प्रकारद्वयं प्रदर्शितमस्ति। एकः प्रकारः आर्यभटदैवज्ञस्य वर्तते। अपरः सिद्धान्तः सामान्यसंस्कृतजगतः वर्तते। प्रसङ्गादत्र आर्यभटमहोदयानुसारं वर्णादङ्कोत्पत्तिसिद्धान्तः[21]-

**वर्गाक्षराणि वर्गेऽवर्गाक्षराणिकात् ङ्मौ यः। खद्विनवके स्वरा नववर्गेऽवर्गे नवान्त्यवर्गे वा।।**

अस्मिन् श्लोके एव आर्यभटः वर्णमाध्यमेन समेषामपि अङ्कानां समायोजनं कृतवान् अस्ति। यथाऽत्र सर्वेऽपि वर्णा अवर्ग-वर्गेति भागद्वयेन विभक्तास्सन्ति। व्याकरणशास्त्रे कवर्ग-चवर्ग-टवर्ग-तवर्ग-पवर्गेति पञ्चवर्गाः प्रसिद्धाः सन्ति। एते वर्गाः वर्गकोटौ समायान्ति। अत्र अवशिष्टानां वर्गाना कृते अवर्गसंज्ञा प्रदत्ता विद्यते। यथा - अन्तस्था उष्मवर्णाश्च। (अन्तस्थ इत्यनेन य र ल व वर्णास्तथा उष्म इत्यनेन श-ष-स-ह इति वर्णाः ज्ञातव्याः)। एवमेव व्याकरणशास्त्रे षोडश (16) स्वराः प्रतिपादिताः सन्ति। तत्र प्रकृतेऽस्मिन् प्रसङ्ग अं अः इति अन्तिमौ द्वौ वर्णौ त्याज्यौ भवतः। अत्र अवशिष्टेषु ह्रस्व-दीर्घस्वरयोः मध्ये नान्तरमवगन्तव्यम्। इत्थं ऐक्यं विधाय चतुर्दश- स्वरेषु पञ्चदीर्घस्वरं विहाय गणनायां शून्याङ्क प्रदातुं नवसंख्यका एव स्वराः स्वीकृताः। एतेषां नव स्वराणां योगः वर्गाक्षरेषु भवति। एते स्वराः वर्गाक्षरेण सम्मील्य शत-अयुत-प्रयुत प्रभृतीनामङ्कानां द्योतकाः भवन्ति। तथा इमे एव स्वराः अवर्गाक्षरेषु यदा सम्मीलिताः भवन्ति तदा दश-सहस्र-लक्ष- कोटि प्रभृतीनामङ्काना द्योतकाः भवन्ति।

तद्यथा- उदाहरणम् - क-1, ख-2, ग-3, घ-4. ङ-5, च-6. छ-7, ज-8, झ-9, ञ-10, ट-11, ठ-12, ड-13, ढ-14, ण-15, त-16, थ-17, द-18, ध-19, न-20, प-21. फ-22, ब-23, भ-24, म-25, य-30, र-40, ल-50, व-60. श-70, ष-80, स-90, ह-100 । अत्र यकार इत्युक्ते 30 संख्या कथं स्वीकृता? तत्र ग्रन्थकारेण स्वयं उच्यते ङमौ इत्युक्ते यकारः, तत्संख्या-30 इति। अर्थात् ङ=5, म-25, अत्र ङ+म इत्युक्ते 5+25 = 30 संख्या भवति। अत्र वर्णात् अङ्कोत्पत्तिसिद्धान्तानुसारेण एक, दश, शत, सहस्र-प्रभृतिसंख्या कथमागच्छतीति तन्निरूप्यते। तत्रादौ एक-दश- शत- सहस्र-प्रभृतिसंख्यानां नामानि[22]-

20. **विश्वमूर्त्तिसौरभम्** इति जम्मू तः प्रकाशिते अभिनन्दनग्रन्थे पृ.सं. 297 तः 301 यावत् मम लेखः द्रष्टव्यः।

21. आर्यभटीयम् 1/2

22. आर्यभटीयम् 2/2

**एकं दश च शतं च सहस्त्रायुतनियुते यथा प्रयुतम्। कोट्युर्बुदं च वृन्दं स्थनात्स्थानं दशगुणं स्यात्।।**

अर्थात् एकदशशतसहस्रादिसंख्या क्रमशः दशगुणिते सति वृन्दं यावत् स्वीय स्वरूपमवधारयन्ति। यथा एकसंख्या दशगुणिते सति दशसंख्यात्मकं स्वरूपं, दशसंख्या दशभिः सङ्गुणिते सति शतसंख्यायाः स्वरूपमेवमग्रेऽपि बोध्यम्। इत्थं श्रीमता भास्कराचार्येण स्वीये लीलावतीनामके ग्रन्थेऽपि विषयेऽस्मिन् सम्यक् प्रतिपादितम्। तद्यथा[23]-

**एकदशशतसहस्त्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुदमब्ज खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्।।**
**जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः। संख्यायाः स्थानानांव्यवहारार्थं कृता पूर्वैः।।**

एवमेव वर्णादङ्कोत्पत्तिविषये एकः अपरोऽपि सिद्धान्तः वर्तते। तद्यथा[24]-

**कटपयवर्गभवैरिह पिण्डान्त्यैरक्षरैरङ्काः । नञे च शून्ये ज्ञेये तथा स्वरे केवले कथितम्।।**

| स्वराः | कादि वर्णाः | टादि वर्णाः | पादि वर्णाः | यादि वर्णाः |
|---|---|---|---|---|
| अ = 0 | क = 1 | ट = 1 | प = 1 | य = 1 |
| इ = 0 | ख = 2 | ठ = 2 | फ = 2 | र = 2 |
| उ = 0 | ग = 3 | ड = 3 | ब = 3 | ल = 3 |
| ऋ = 0 | घ = 4 | ढ़ = 4 | भ = 4 | व = 4 |
| लृ = 0 | ङ = 5 | ण = 5 | म = 5 | श = 5 |
| ए = 0 | च = 6 | त = 6 | | ष = 6 |
| ऐ = 0 | छ = 7 | थ = 7 | | स = 7 |
| ओ = 0 | ज = 8 | द = 8 | | ह = 8 |
| औ = 0 | झ = 9 | ध = 9 | | |
| | ञ = 0 | न = 0 | | |

अर्थात् कादि नव (कवर्गस्य आदिमः वर्णः ककारः तस्मात् ङ पर्यन्तं पञ्च तथा चवर्गस्य पञ्चमं वर्णं ञकारं विहाय झकार पर्यन्तं चत्वारः वर्णाः समायान्ति। कवर्गस्य ककारतः चवर्गस्य झकारपर्यन्तं एकैकं वृद्धिक्रमेण आहत्य समेषां संख्या (9)नव। एवमेव टवर्गस्य 5 एवं तवर्गस्य न वर्णं विहाय (4) चतस्रः संख्या आहत्य समेषां संख्या (9)नव। पादि पञ्च (पवर्गे पञ्च वर्णाः भवन्ति)। अवशिष्टाः वर्णाः यादि वर्णाः अष्टौ (य र ल व श ष स ह इति ) भवन्ति। अर्थात् कादि वर्णानां नव (9)संख्या, टादिवर्णानां नव (9) संख्या पादि (5)पञ्च, यादि (8)अष्टौ संख्याः पूर्वाचार्यैः स्वीकृताः सन्ति। अत्र नकार ञकारयोस्तथा अकारादि- औकार पर्यन्तं समेषां स्वाराणां स्व कृते शून्याकाः स्वीकृताः सन्ति। सुस्पष्टार्थं द्रष्टव्यं पार्श्वस्थं वर्णाङ्कद्योतकचक्रम्।

अत्र कस्यचिदपि वर्णस्य अङ्कावगमनार्थं ऊपर्युक्तचक्रस्य प्रयोगः कर्तव्यः। कस्यचिद् शब्दस्य अङ्काव-गमनार्थन्तु अङ्कानां वामतो गतिरिति सिद्धान्तस्य प्रयोगः कर्तव्यः। तद्यथा दारशब्दस्य <u>अङ्कावगमनार्थमाया</u>सः-

23. लीलावती-अभिन्नपरिकर्माष्टके श्लो.सं. 2-3
24. प्रकीर्णे

अत्र दा-8, र-2, अनयोः वामक्रमेण अङ्कस्थापना क्रियते तदा 28 भवति। अत्र भावावगमनाय इयं 28 संख्या द्वादशभिः विभाज्यते तदा लब्धिस्थानीयाः संख्या 2 तथा शेषस्थानीया संख्या 4 आगच्छति। अतः 4 संख्यया चतुर्थः भावः अवगन्तव्यः। यदि भावज्ञानस्य अपेक्षा नास्ति तदा दार-शब्देन दा-8, र-2, अत्र अङ्कानां वामतो गतिरिति सिद्धान्तेन 28 संख्या अवगन्तव्या। इत्थमग्रेऽपि अवगन्तव्या।

मन्त्रेश्वरकृत् फलदीपिकायां द्वाविंशाख्ये मिश्राध्याये सर्वादौ दशाविचारः वर्णितोऽस्ति। तत्र ग्रहदशावर्षज्ञानं वर्णादङ्कोत्पत्तिसिद्धान्तानुसारमेव प्रदत्तमस्ति। यावत् वर्णादङ्कोत्पत्तिसिद्धान्तज्ञानं नैव भविष्यति तावत् तत्र प्रदत्तानां श्लोकानां ज्ञानं भवितुं नैवार्हति।

अश्विनीनक्षत्रस्य चतुर्षु चरणेषु जायमानस्य जातकस्य निम्नलिखिते श्लोके ग्रहदशाक्रमः प्रदर्शितो विद्यते। तद्यथा-[25]

**पौरं गावो मित संदिग्धं नक्षत्रेन्दुः स तु भूशूलम्। रूपेत्रक्षन्निधयोरङ्गे वाणी चस्थं दधि नक्षत्रम्।।**

भरणीनक्षत्रस्य चतुर्षु चरणेषु जायमानस्य जातकस्य निम्नलिखिते श्लोके ग्रहदशाक्रमः प्रदर्शितो विद्यते। तद्यथा-[26] **दासतवेशो गौरीपुत्रं, क्षन्निधिकारो गोभूशेषम्।**

**क्षौदधिनक्षत्रेहासन्तो, भौमगुरुः पुत्राक्षोनाधिः ।।**

भरणीनक्षत्रस्य **प्रथमचरणे** जायमानजातकस्य कृते एते राश्याधिपा दशेशाः भवन्ति। तद्यथा- **दासतवेशो गौरीपुत्रं** अस्मिन् पद्यांशे नव (9) वर्णाः सन्ति। एभिः (वर्णैः) सम्बन्धिताः अङ्काः (कटपयवर्गभवैरिह पिण्डान्त्यैः इति सिद्धान्तानुसारं) राशयः एव । तत्तद्राशीशाः क्रमेण दशेशाः भवन्ति। तद्यथा- **दा** = 8 वृश्चिकः, **स** = 7 तुला, **त** = 6 कन्या, **वे** = 4 कर्कः, **शो** = 5 सिंहः, **गौ** = 3 मिथुनः, **री** = 2 वृषः, **पु** = 1 मेषः, **त्रं** = 12 मीनः।

भरणीनक्षत्रस्य **द्वितीयचरणे** जायमानस्य जातकस्य राश्याधिपानुसारं दशेशानां क्रमः- **क्षन्निधिकारो गोभूशेषम्** इति । **क्ष** = 11 कुम्भः, **न्नि** =10 मकरः, **धि** =9 धनुः, **का** = 1 मेषः, **रो** = 2 वृषः, **गो** = 3 मिथुनः, **भू** = 4 कर्कः, **शे** = 5 सिंहः, **षम्** = 6 कन्या,। एतेषामधिपतयः क्रमेण दशेशाः भवन्ति।

भरणीनक्षत्रस्य **तृतीयचरणे** जायमानस्य जातकस्य राश्याधिपानुसारं दशेशानां क्रमः- **क्षौदधिनक्षत्रेहासन्तो** इति। अर्थात् **क्षौ** = 11 कुम्भः, **द** = 8 वृश्चिकः, **धि** =9 धनुः, **न** = 10 मकरः, **क्ष** =11 मकरः, **त्रे** =12 मीनः, **हा** = 8 वृश्चिकः, **स** = 7 तुला, **न्तो** = 6 कन्या, एतेषां राशीनामधिपतयः क्रमेण दशेशाः भवन्ति।

भरणीनक्षत्रस्य **चतुर्थचरणे** जायमानस्य जातकस्य राश्याधिपानुसारं दशेशानां क्रमः-**भौ** = 4 कर्कः, **म** = 5 सिंहः, **गु** = 3 मिथुनः, **रुः** = 3 मिथुनः, **पु** = 1 मेषः, **त्रा** = 12 मीनः **क्षो** = 11 कुम्भः, **ना** = 10 मकरः। एतेषां राशीनामधिपतयः क्रमेण दशेशाः भवन्ति। अत्र प्रदत्तचक्रानुसारं ग्रहाणां दशावर्षज्ञानं कर्त्तुं शक्यते।

---

25. फलदीपिका-22/5

26. फलदीपिका-22/6

| असव्यकालचक्र, असव्य नक्षत्रचक्र - 1,2,3,-7,8,9,-13,14,15,-19,20,21,-25,26,27 | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सव्यनक्षत्र | न. चरण | देहाधिप | देह | राशि एवं राशिवर्ष | | | | | | | जीव | जीवाधिप | अंश | दशा वर्ष |
| अश्विनी | 1 | मंगल | मे.-7 | वृष.16 | मि.-9 | कर्क 21 | सिंह-5 | कन्या. 9 | तुला-16 | वृश्चि.-7 | धनु-10 | गुरु | मेषांश | 100 |
| पुन. हस्त | 2 | शनि | मक.-4 | कुम्भ-4 | मीन-10 | वृश्चि.-7 | तुला-16 | कन्या-9 | सिंह-5 | कर्क-21 | मिथुन-9 | बुध | वृषांश | 85 |
| मूल | 3 | शुक्र | वृष-16 | मेष-7 | मीन-10 | कुम्भ-4 | मकर-4 | धनु10 | मेष-7 | वृष-16 | मिथुन-9 | बुध | मिथुनांशः | 83 |
| पू.भा. | 4 | चन्द्र | कर्क 21 | सिंह-5 | कन्या. 9 | तुला-16 | वृश्चि.-7 | धनु-10 | मक.-4 | कुम्भ-4 | मीन-10 | गुरु | कर्कांशः | 86 |
| | | | | | | | | | | | | | | |
| भरणी | 1 | मंगल | वृश्चि-7 | तुला-16 | कन्या-9 | कर्क-21 | सिंह-5 | मिथुन-9 | वृष-16 | मेष-7 | मीन-10 | गुरु | सिंहांशः | 100 |
| पुष्य चित्रा | 2 | शनि | कुम्भ-4 | मकर-4 | धनु-10 | मेष-7 | वृष-16 | मिथुन-9 | कर्क-21 | सिंह-5 | कन्या-9 | बुध | कन्यांशः | 85 |
| पू.षा | 3 | शुक्र | तुला-16 | वृश्चिक-7 | धनु-10 | मकर-4 | कुम्भ-4 | मीन-10 | वृश्चिक-7 | तुला-16 | कन्या-9 | बुध | तुलांशः | 83 |
| उ.भा. | 4 | सिंह | कर्क-21 | सिंह-5 | मिथुन-9 | वृष-16 | मेष-7 | मीन-10 | कुम्भ-4 | मकर-4 | धनु-10 | गुरु | वृश्चिकांशः | 86 |
| | | | | | | | | | | | | | | |
| कृतिका | 1 | मंगल | मेष-7 | वृष-16 | मिथुन-9 | कर्क-21 | सिंह-5 | कन्या-9 | तुला-16 | वृश्चि-7 | धनु-10 | गुरु | धन्वंशः | 100 |
| आश्लेषा | 2 | शनि | मकर-4 | कुम्भ-4 | मीन-10 | वृश्चि.-7 | तुला-16 | कन्या-9 | सिंह-5 | कर्क-21 | मिथुन-9 | बुध | मकरांशः | 85 |
| स्वाती | 3 | शुक्र | वृष-16 | मेष-7 | मीन-10 | कुम्भ-4 | मकर-4 | धनु-10 | मेष-7 | वृष-16 | मिथुन-9 | बुध | कुम्भांशः | 83 |
| उ.षा. रेवती | 4 | चन्द्र | कर्क-21 | सिंह-5 | कन्या-9 | तुला-16 | वृश्चिक-7 | धनु-10 | मकर-4 | कुम्भ-4 | मीन-10 | गुरु | मीनांशः | 86 |

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | **सव्यकालचक्र, 4-5-6-, 10-11-12-, 16-17-18, 22-23-24,** | | | | | | | | | | | | | |
| रोहिणी मघा विशा. श्रवणा | 1 | जीव **गुरु** | धनु-10 | मकर-4 | कुम्भ-4 | मीन-10 | मेष-7 | वृष-16 | मिथुन-9 | सिंह-5 | कर्क-21 | देहाधि पति **चन्द्र** | बृश्चिकांश | 86 |
| | 2 | **बुध** | कन्या-9 | तुला-16 | वृश्चिक-7 | मीन-10 | कुम्भ-4 | मकर-4 | धनु-10 | वृश्चिक-7 | तुला-16 | **शुक्र** | तुलांश | 83 |
| | 3 | **बुध** | कन्या-9 | सिंह-5 | कर्क-21 | मिथुन-9 | वृष-16 | मेष-7 | धनु-10 | मकर-4 | कुम्भ-4 | **शनि** | कन्यांश | 85 |
| | 4 | **गुरु** | मीन-10 | मेष-7 | वृष-16 | मिथुन-9 | सिंह-5 | कर्क-21 | कन्या-9 | तुला-16 | वृश्चि-7 | **मंगल** | सिंहांश | 100 |
| | | | | | | | | | | | | | | |
| मृगशिरा पू.फा. अनुराधा धनिष्ठा | 1 | **गुरु** | मीन-10 | कुम्भ-4 | मकर-4 | धनु-10 | बृश्चिक-7 | तुला-16 | कन्या-9 | सिंह-5 | कर्क-21 | **चन्द्र** | कर्कांश | 86 |
| | 2 | **बुध** | मिथुन-9 | वृष-16 | मेष-7 | धनु-10 | मकर-4 | कुम्भ-4 | मीन-10 | मेष-7 | वृष-16 | **शुक्र** | मिथुनांश | 83 |
| | 3 | **बुध** | मिथुन-9 | सिंह-5 | कर्क-21 | कन्या-9 | तुला-16 | वृश्चिक-7 | मीन-10 | कुम्भ-4 | मकर-4 | **शनि** | वृषांश | 85 |
| | 4 | **गुरु** | धनु-10 | वृश्चिक-7 | तुला-16 | कन्या-9 | सिंह-5 | कर्क-21 | मिथुन-9 | वृष-16 | मेष-7 | **मंगल** | मेषांश | 100 |
| | | | | | | | | | | | | | | |
| आर्द्रा उ.फा. ज्येष्ठा शतभिषा | 1 | **गुरु** | मीन-10 | कुम्भ-4 | मकर-4 | धनु-10 | बृश्चिक-7 | तुला-16 | कन्या-9 | सिंह-5 | कर्क-21 | **चन्द्र** | मीनांश | 86 |
| | 2 | **बुध** | मिथुन-9 | वृष-16 | मेष-7 | धनु-10 | मकर-4 | कुम्भ-4 | मीन-10 | मेष-7 | वृष-16 | **शुक्र** | कुम्भांश | 83 |
| | 3 | **बुध** | मिथुन-9 | सिंह-5 | कर्क-21 | कन्या-9 | तुला-16 | वृश्चिक-7 | मीन-10 | कुम्भ-4 | मकर-4 | **शनि** | मकरांश | 85 |
| | 4 | **गुरु** | धनु-10 | वृश्चिक-7 | तुला-16 | कन्या-9 | सिंह-5 | कर्क-21 | मिथुन-9 | वृष-16 | मेष-7 | **मंगल** | धन्वंश | 100 |

कृतिकानक्षत्रस्य चतुर्षु चरणेषु जायमानजातकस्य ग्रहदशाक्रमः अश्विनीनक्षत्रवद् भवति। तत्र कृतिकानक्षत्रस्य प्रथमचरणस्य ग्रहदशाक्रमः अश्विनीनक्षत्रस्य प्रथमचरणवत्, कृतिकानक्षत्रस्य द्वितीय-तृतीय-चतुर्थचरणानां ग्रहदशाक्रमः अश्विनीनक्षत्रस्य द्वितीय-तृतीय-चतुर्थचरणवद् भवति।

**वाक्यान्येतान्यश्वियाम्यर्क्षयोर्योन्यश्विन्याद्यान्यग्निभस्यापसव्ये।**
**सव्येऽजेन्द्वोर्वक्ष्यमानेषु वाक्ये-ष्विन्द्वोर्वाक्यान्येव रौद्रस्य भूयः।।**

अर्थात् एतानि **पौरो गावो मितसंदिग्धं** तथा **दासतवेशं गौरीपुत्रमिति** वाक्यानि (श्लोके प्रतिपादिताः विषयाः) अश्विनी तथा भरणीनक्षत्रयोः कृते प्रोक्तानि सन्ति। तत्र कृतिकानक्षत्रस्य प्रतिचरणानां राशीनां स्थापना अश्विनीनक्षत्रस्य प्रतिचरणवद् स्थापना कर्तव्या। तेषां राशीनामधिपाः क्रमशः दशेशाः भवन्ति।

इदानीं सव्यकालचक्रे सर्वादौ स्थाप्यमानस्य रोहिणीनक्षत्रस्य प्रतिचरणं राशीशानुसारं ग्रहदशाक्रमः लिख्यते। तद्यथा[27]-

**धेनुः क्षेत्रे पुरगो शम्भु-स्तासां जत्रु क्षन्निधि दासी।**
**चर्माभोगी रायधिनाक्ष - स्त्रीपौराङ्गी शिवतीर्थाब्जे।।**

अर्थात् रोहिणीनक्षत्रस्य प्रथमचरणे **धे** = 9 धनुः, **नुः** = **10** मकरः, **क्षे** = **11** कुम्भः, **त्रे** = **12** मीनः, **पु** = 1 मेषः, **र** =2 वृषः, **गो** = मिथुनः, **श** = 5 सिंहः, **म्भु** = 4 कर्कः एवंक्रमेण राशीशानुसारं ग्रहदशाक्रमः अवगन्तव्यः।

रोहिणीनक्षत्रस्य द्वितीयचरणे **स्ता** = 6 कन्या, **सां** = 7 तुला, **ज** = 8 वृश्चिकः, **त्रु** = 12 मीनः, **क्ष** =11 कुम्भः, **न्नि** = 10 मकरः, **धि** = 9 धनुः, **दा** = 8 वृश्चिकः, **सी** = 7 तुला,एवंक्रमेण राशीशानुसारं ग्रहदशाक्रमः अवगन्तव्यः।

रोहिणीनक्षत्रस्य तृतीयचरणे **च** = 6 कन्या, **र्मा** =5 सिंहः, **भो** = 4 कर्कः, **गी** =3 मिथुनः, **रा** = 2 वृषः, **य** =1 मेषः, **धि** = 9 धनुः, **ना** = 10 मकरः, **क्ष** = 11 कुम्भः, एवंक्रमेण राशीशानुसारं ग्रहदशाक्रमः अवगन्तव्यः।

रोहिणीनक्षत्रस्य चतुर्थचरणे **स्त्री** = 12 मीनः, **पौ** = 1 मेष;, **रा** = 2 बृषः, **ङ्गी** = 3 मिथुनः, **शि** = 5 सिंहः, **व** = 4 कर्कः, **ती** =6 कन्या, **र्था** = 7 तुला, **ब्जे** = 8 बृश्चिकः, एवं क्रमेण राशीशानुसारं ग्रहदशाक्रमः अवगन्तव्यः। तदनु सव्यकालचक्रे एव स्थाप्यमानस्य मृगशिरानक्षत्रस्य प्रतिचरणं राशीशानुसारं ग्रहदशाक्रमः लिख्यते। तद्यथा[28]-

**त्रक्षनिधिर्दा सूचीशंभो गौरयधी नक्षत्रं पारम्।**
**गोशिवतीर्थे दात्रीक्षन्नो धीहसितांशुर्भोगी रम्या।।**

अर्थात् मृगशिरानक्षत्रस्य प्रथमचरणे **त्र** = 12 मीनः, **क्ष** = 11 कुम्भः, **नि** = 10 मकरः, **धि**

---

27. फलदीपिका-22/ 7
28. फलदीपिका-22/ 8

= 9 धनुः, **र्दा** = 8 बृश्चिकः, **सू** = 7 तुला, **ची** = 6 कन्या, **शं** = 5 सिंहः, **भो** = 4 कर्कः, एवं क्रमेण राशीशानुसारं ग्रहदशाक्रमः अवगन्तव्यः।

अर्थात् मृगशिरानक्षत्रस्य द्वितीयचरणे **गौ** = 3 मिथुनः, **र** = 2 वृषः, **य** = 1 मेषः, **धी** = 9 धनुः, **न** = 10 मकरः, **क्ष** = 11 कुम्भः, **त्रं** = 12 मीनः, **पा** = 1 मेषः, **रं** = 2 वृषः, एवं क्रमेण राशीशानुसारं ग्रहदशाक्रमः अवगन्तव्यः।

अर्थात् मृगशिरानक्षत्रस्य तृतीयचरणे **गो** =3 मिथुनः, **शि** = 5 सिंहः, **व** = 4 कर्कः, **ती** = 6 कन्या, **र्थे** =7 तुला, **दा** =8 बृश्चिकः, **त्री** = 12 मीनः, **क्ष** = 11 कुम्भः, **न्नो** = 10 मकरः एवं क्रमेण राशीशानुसारं ग्रहदशाक्रमः अवगन्तव्यः।

अर्थात् मृगशिरानक्षत्रस्य चतुर्थचरणे **धी** = 9 धनुः, **ह** = 8 वृश्चिकः, **सि** = 7 तुला, **तां** =6 कन्या, **शु** = 5 सिंहः, **र्भो** = 4 कर्कः, **गी** = 3 मिथुनः, **र** = 2 वृषः, **म्या** = 1 मेषः एवं क्रमेण राशीशानुसारं ग्रहदशाक्रमः अवगन्तव्यः।

इत्थम् असव्यकालचक्रे अश्विनीतः कृतिकानक्षत्रपर्यन्तं तथा सव्यकालचक्रे रोहिणी-मृगशिरा-आर्द्रानक्षत्राणां, पुनः असव्यचक्रे पुनर्वसु तः आश्लेषा पर्यन्तं तथा सव्यकालचक्रे मघा तः उ,फा. पर्यन्तं एवमेव तृतीयावृतौ असव्यकालचक्रे हस्त तः स्वाति पर्यन्तं तथा सव्यकालचक्रे विशाखा तः ज्येष्ठा पर्यन्तं, चतुर्थावृतौ असव्यकालचक्रे मूल तः उ.षा. पर्यन्तं तथा एवं सव्यकालचक्रे श्रवणा तः शत. पर्यन्तं, एवमेव पञ्चमावृत्तौ आदौ असव्यकालचक्रे पू.भा.प. तः रेवती पर्यन्तं स्थापनां कृत्वा नक्षत्राणां प्रतिचरणोत्पन्नजातकानां राशीशानुसारेण ग्रहदशाक्रमः अवगन्तव्यः। तत्र राशीशानुरोधेन सूर्यादीनां ग्रहदशावर्षाणि उच्यन्ते। तद्यथा[29]-

**मनुः परः सनिर्धनिर्नृपस्तपो वने क्रमात् ।**
**दिवाकरादिवत्सराः शुभाशुभाप्तिहेतवः।।**

अर्थात् कालचक्रदशायां राशीनां स्वामिनो वशात् सूर्यादिग्रहाणां दशावर्षाणि निम्नलिखितानि सन्ति। तद्यथा- सूर्यस्य दशा **मनुः** 5 मितानि वर्षाणि, मनुः इत्यस्मिन् शब्दे केवलं मकार एव गृह्यते। यतः नकारस्य मूल्यं शून्यमितं भवति। उक्तमप्यस्ति- **नञे च शून्ये ज्ञेये**[30]। चन्द्रस्य **परः** इत्यत्र **प** = 1, **रः** = 2, अङ्कानां वामतो गतिः इत्यनुसारं 21 संख्या जाता, भौमस्य- **सनि** अत्र स = 7 तथा **नि** = 0 अत्रापि अङ्कानां वामतो गतिः इत्यनुसारं 07, बुधस्य- **धनि** = अत्रापि पूर्ववदेव 09, गुरोः **नृपः** अर्थात् 10, शुक्रस्य **तपो** अत्र त इत्यक्तेः 6 तथा प इत्युक्तेः 1 अङ्कानां वामतो गतिः इत्यनुसारं 16, **शनेः**- **वने** अत्रापि व = 4, ने = **0,** अर्थात् 04 वर्षाणि भवन्ति। विषयेऽस्मिन् महर्षिपराशरोऽपि वदति। यथा-[31]

**भूतैकविंशगिरयो नव-दिक्-षोडशाब्धयः।**
**दशाब्दाः स्युरिनादीनां राशीनां स्वामिनो वशात्।।**

29. फलदीपिका-22/ 3

30. कटपयवर्गभवैरिह पिण्डान्त्यैरक्षरैरङ्काः। **नञे च शून्ये ज्ञेये** तथा स्वरे केवले कथितम्।। प्रकीर्णे-

31. बृहत्पाराशरहोराशास्त्रम्- सम्पा.-पं.देवचन्द्रझाः, ग्रहावस्थाफलाध्यायः श्लोकसंख्या 81

इदानीं कालचक्रदशानुसारेण जातकस्य आयुर्दायं विचार्यते। अश्विनीनक्षत्रस्य प्रथमचरणे जायमानस्य जातकस्य दशारम्भः मेषात् अर्थात् मङ्गलात् प्रारम्भो भवति। मङ्गलस्य दशावर्षमानं 7 वर्षमितं, तदनु वृषस्य दशा अर्थात् शुक्रस्य दशा अस्य दशावर्षमानं 16 वर्षमितं, तदनु मिथुनस्य दशा, अस्यदशावर्षमानं 9 वर्षमतं, तदनु कर्कस्य दशा भविष्यति। अस्य दशावर्षमानं 21 वर्षमितं, तदनु सिंहस्य दशावर्षमानं 5 वर्षमितं, ततः क्रमशः कन्या-तुला-वृश्चिक-धनुर्राशीनां दशावर्षाणि क्रमशः 9-16-7-10 वर्षाणि भवन्ति। इत्थमाहत्य अश्विनीनक्षत्रस्य प्रथमचरणे जायमानस्य जातकस्य सम्पूर्णस्य आयुषः प्रमाणं कालचक्रदशानुसारेण 100 (शतं) वर्षाणि भवन्ति। इत्थं अश्विनीनक्षत्रस्य द्वितीयचरणे जायमानस्य जातकस्य दशारम्भः मकरात् अर्थात् शनैश्चरात् भवति। अस्य आयुषः प्रमाणं वाणगजाः अर्थात् 85 वर्षमितं भवति। अश्विनीनक्षत्रस्य तृतीयचरणे जायमानस्य जातकस्य सम्पूर्णम् आयुषः प्रमाणं त्रिनागाः अर्थात् 83 वर्षमितं, इत्थं अश्विनीनक्षत्रस्य चतुर्थचरणे जायमानस्य जातकस्य आयुषः प्रमाणं षड्गजाः अर्थात् 86 वर्षमितं भवति। इत्थं शतं 100, बाणगजाः 85, त्रिनागाः 83, षड्गजाः 86 वर्षाणि क्रमशः त्रिरावृत्य कृते सति असव्यनक्षत्रचक्रे स्थितानां समेषां नक्षत्राणां प्रतिचरणं समेषां दशावर्षाणि सन्ति।

सव्यनक्षत्रचक्रे स्थितानां नक्षत्राणां प्रतिचरणं विपरीतक्रमेण ज्ञातव्यानि। यथा असव्यनक्षत्रचक्रे शतं 100, बाणगजाः 85, त्रिनागाः 83, षड्गजाः 86 वर्षाणि क्रमशः चतुर्षु चरणेषु आयुषः मानानि भवन्ति। अस्य विपरीत क्रमेण सव्यनक्षत्रचक्रे स्थितानां नक्षत्राणां प्रतिचरणं षड्गजाः 86, त्रिनागाः 83, बाणगजाः 85, शतं 100, वर्षाणि क्रमशः चतुर्षु चरणेषु आयुषः मानानि भवन्ति। तद्यथा[32]-

**क्रिये वृषे युगे कर्के शतं (100) बाणगजाः (85) समाः।**
**त्रिनागाः (83) षडगजा (86) स्तद्वदप्युक्तास्तत्-त्रिकोणके।।**

अस्य विस्तृतं विवरणं पूर्वपृष्ठे प्रदत्तचक्रानुसारं ज्ञातुं शक्यते। अत्रापि अन्यदशावत् प्रचलितदशायाः भुक्तभोग्यानयनं भवति। इदानीं प्रसङ्गात् दशायाः भुक्तभोग्यानयनं प्रदर्शयते। तद्यथा-

**इन्दोर्नवांशभुक्ता या लिप्ताः स्वाब्दहतोद्धृताः।**
**शतद्वयेन भुक्तं तद् भोग्यं ज्ञेयमतः परम्।।**

अर्थात् स्पष्टचन्द्रस्य भुक्तकलाः ग्रहदशावर्षमानेन सङ्गुण्य शतद्वयेन विभाज्यते। लब्धं वर्षादिमानं दशायाः भुक्तमानं द्योतयति। इदं भुक्तं मानं यदि सम्पूर्णग्रहदशावर्षमानेषु विशोध्यते तदा दशावर्षस्य भोग्यमानं समायाति। जन्मदिनाङ्के भोग्यग्रहदशावर्षमानं संयोज्य तदग्रिमग्रहदशावर्षमानं क्रमशः संयोज्य सम्पूर्णे आयुषि क्रमशः दशाः व्यतीताः भवन्तीति दिक्।

32. बृहत्पाराशरे दशाभेदाध्याये श्लो.सं. 86

# अधिमासविमर्शः

**श्रीआनन्दप्रकाशपाठकः**
लब्धस्वर्णपदकः,नेट,

अधिमास-परिभाषावसरे अधिको मास इत्यधिमास इत्थं प्राप्यते अस्माभिः शब्दकल्पद्रुमे[1]। वस्तुतः अधिक- मासोऽयं द्वादशमासेभ्यो समधिको भवति। तद्यथा- **मरीचिटीकाकारः प्रतिपादयति[2]- चैत्रादिद्वादशमासेभ्योऽतिरिक्तत्वात् अधिमासः वक्तव्यः**।

विषयेऽस्मिन् मल्लारिणा ग्रहलाघवे प्रोक्तम्- **अमान्तद्वयान्तर्वर्तिनि चान्द्रमासे सूर्य-संक्रान्तेरभावत्वं अधिमासत्वम्[3]**। एवं मुहूर्तचिन्तामणौ रामदैवज्ञेनाऽपि अधिमासक्षयमासयो-र्लक्षणमुक्तमस्ति। तद्यथा-

**स्पष्टार्कसंक्रान्तिविहीन चान्द्रो मासोऽधिमासः क्षयमासकस्तु।**
**द्विसंक्रमस्तत्र विभागयोस्तस्तिथेर्हि मासौ प्रथमान्त्यसञ्ज्ञौ।।** [4]" इत्युक्तम्।

महर्षिकश्यपेनापि अस्याधिमासक्षयमासयोः सफलं लक्षणं प्रतिपादितम्[5]-

**यस्मिन् मासेर्कसंक्रान्तिर्दर्शनात्प्राक्पुरःसरम्।**
**दर्शमुल्लंघ्य भवति स संसर्पोऽधिमासकः।।**
**आरभ्य शुक्लप्रतिपत्प्रवेशात्संक्रमद्वयम् ।**
**आगामीन्दुक्षयस्यान्तात् प्राङ् न्यूनाख्यस्त्वहर्पतिः।**
**स्फुटार्कसंक्रमाद्विद्यान्न्यूनमासाधिमासकौ ।**
**मासौ न्यूनाधिको तौ तु सर्वकर्मबहिष्कृतौ।।**

विषयेऽस्मिन् वशिष्ठदैवज्ञोऽपि वदति[6]-

**यस्मिन् दर्शस्यान्तादर्वागेवापरं दर्शम्।**
**उल्लंघ्य भवति भानोः संक्रान्तिः सोऽधिमासः स्यात् ।।**
**आद्यान्तदर्शयोर्मध्ये भानोरेव तयोर्यदि।**
**संक्रान्तिद्वितयं स्याच्चेन्न्यूनमासः स उच्यते।।**

अस्यैवापरो नाम मलमास इति। यतोहि मासोऽयं सौर-चान्द्रमासयोः विकारः वर्तते। तद्यथा-

---

1. शब्दकल्पद्रुमे-
2. सिद्धान्तशिरोमणिः मरीचिटीकायाम्
3. ग्रहलाघवे-
4. मुहूर्तचिन्तामणौ संक्रान्तिप्रकरणे श्लो.सं. 20
5. मुहूर्तचिन्तामणौ संक्रान्तिप्रकरणे श्लो.सं. 20 इत्यस्य टीकायाम्
6. मुहूर्तचिन्तामणौ संक्रान्तिप्रकरणे श्लो.सं. 20 इत्यस्य टीकायाम्

मरीचिटीकाकाराः अवदन्- **मलं वदन्ति कालस्य मासं कालविदोऽधिकमिति**[7] अधिमासस्य स्थितिः कदा सम्भवतीति विषयेऽस्मिन् आचार्यभास्करस्य उक्तिरियं ध्यातव्या-

**असंक्रान्तिमासोऽधिमासः स्फुटं स्याद् द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्।**
**क्षयः कार्तिकादित्रये नान्यतः स्यात् तदा वर्षमध्येऽधिमासद्वयं च।।**[8]

अर्थात् यस्मिन् मासे सङ्क्रान्तेरभावः जायते स मासः अधिमास इति नाम्ना व्यवह्रियते। परन्तु अत्र विचारणायावसरो वर्तते यत् असंक्रान्तिमासः कः? अर्थात् मासोऽयं सौर-सावन-चान्द्र-नाक्षत्रमासेषु कः वर्तते। वस्तुतः विषयेऽस्मिन् आचार्येणोपदिष्टं[9] यत्-

**मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः।**
**चैत्राद्यः स विज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः ।।**

इत्यस्मिन् श्लोके आचार्यः स्पष्टरूपेण प्रतिपादयति यत् मेषादिराशौ स्थिते सूर्ये यो यो चान्द्रमासः प्रपूर्यते स चैत्राद्यः मासः विज्ञेयः। अस्मिन्नेव चान्द्रमासे यदा संक्रान्तेरभावः जायते तदा सः मासः अधिमासः भवति। अत्र संक्रान्तिशब्दात् सूर्यसंक्रान्तेरेव ग्रहणं करणीयम्। अर्थात् सूर्यकेन्द्रबिन्दोः प्रथमराशिप्रवेशकालादन्यराशिप्रवेश-कालं यवादेक-सङ्क्रान्तिकालः भवति। अस्याभावत्वात् अधिमासस्य स्थितिः उत्पद्यते। अधिमाससम्भवासंभवत्वविषये मकरन्दाचार्येण सत्यमेवोक्तमस्ति[10]-

**कृष्णपक्षे नवम्यादौ मेषार्को यत्र जायते।**
**तद् वर्षे मलमासः स्याच्छुभकर्मसु निन्दितः ।।**

पुनश्च- **मासास्तथा च तिथयस्तु हिनांशुमानात्**[11] इत्युक्तेरपि मासानां चान्द्रत्वादधिमासोऽयं चान्द्र इति सिद्ध्यति।

अत्र जिज्ञासा भवितुमर्हति यत् आचार्यैः चान्द्रमासस्य परिभाषा "**अमान्तात् अमान्तं तु यावत् स चान्द्रः**[12]" वा "**दर्शावधिः मासमुशन्ति चान्द्रः**[13]" उत "**दर्शावधिः चान्द्रमसो हि मासः**[14]" इति बहुविधप्रकारैः प्रदत्ता। तत्र सूर्यसंक्रान्त्युपलक्षिता एव मासाः किंवा **मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः**[15] इति कथनस्य किमपि प्रयोजनं वा?

वस्तुतः अनयोः मध्ये किञ्चित् नूनमन्तरं वर्तत एव। दर्शान्तात् दर्शावधिः चान्द्रमासः भवति।

---

7. सिद्धान्तशिरोमणिः मरीचिटीकायाम्
8. सिद्धान्तशिरोमणिः मध्यमाधिकरेऽधिमासादिनिर्णयः श्लो.सं. ६
9. जातकक्रोडम् श्रीकृष्णदत्तविरचितम्- पृ.सं. 41
10. मकरन्दप्रकाशे- पृ.सं. ९२
11. सिद्धान्तशिरोमणिः मध्यमाधिकरे कालमानाध्याये श्लो.सं. ३१
12. सिद्धान्तशिरोमणिः गोलाध्यायः
13. ज्योतिषरत्नमाला 1/20
14. सिद्धान्तशिरोमणिः गोलाध्यायः मध्यगतिवासना श्लो.सं. 16
15. जातकक्रोडम् श्रीकृष्णदत्तविरचितम्- पृ.सं. 41

अत्र दर्शः नाम **दर्शः सूर्येन्दुसङ्गमः**[16]। अर्थात् एकस्मात् दर्शान्तात् अग्रे स्वस्वगत्या पूर्वमुखं व्रजतोः सूर्यचन्द्रयोः अधिकगतिकः चन्द्रः यदा पुनः रविणा सह द्वितीयदर्शान्ते योगं करोति तदा तावत् एक चान्द्रमासो भवति। तस्मिन् चान्द्रमासावधेः यदा सूर्यस्य संक्रान्तिर्जायते तर्हि स मासः विशुद्धमास इति। अनेन सूर्यसंक्रान्त्युपलक्षितस्य मासस्य चान्द्रत्वं सिद्ध्यति।

परञ्च अत्रावधेयं यत् एकस्मिन् सौरमासे मध्यममानेन सावयवत्रिंशत्सावनदिवसाः भवन्ति। एवमेकस्मिन् चान्द्रमासे मध्यममानेनैव सावयव-एकोनत्रिंशत्सावनदिवसाः भवन्ति। अनयोः द्वयोः सौरचान्द्रमासयोरन्तरं सावयवचतुःपञ्चाशत् सावनघटयः भवन्ति। अस्याः घट्यन्तरं वर्धयन्नपि सावनमेव भवेयुः। वस्तुत एकस्मिन् चान्द्रमासे त्रिंशत्तिथयः भवन्ति। अस्मिन्नेव चान्द्रमासे सावयव-एकोनत्रिंशत्-सावनदिवसाः अपि भवन्ति। अर्थात् एतौ द्वौ परस्परौ समौ वर्तेते। अनयोः द्वयोः समानत्वात् सावयव-एकोनत्रिंशत्सावनदिवसैः उत त्रिंशतिथिभिः चान्द्रमासस्य पूर्तिः सञ्जायते। अतएव सौरचान्द्रमासयोः सावनात्मकमन्तरं वर्धयन् यदा एकोत्रिंशत्-सावनदिवसात्मकं सञ्जायते तर्हि चान्द्रमासः भवति। अयमेव चान्द्रमासः अधिमासोऽस्ति। अतः अधिमासस्य चान्द्रत्वं सिद्ध्यति।

सूर्यसिद्धान्ते-"**मासैर्द्वादशभिर्वर्षं मिति**[17]। पुनश्च सिद्धान्तशिरोमाणावपि- "**रवेश्चक्र-भोगोर्कवर्षं प्रदिष्टं**[18]" मिति उक्तं विद्यते। आभ्यामनुसारं अधिमासस्यास्य स्थितिः द्वादशमासान् विहाय कथं संभाव्यते। पुनश्च सूर्यसंक्रान्त्युपलक्षिता एव मासाः इति कथनमात्रेण सौरचान्द्रमासयोः तुल्यत्वं सिद्ध्यति। परञ्च सूक्ष्मधिया विचार्यते चेत् सौरचान्द्रमासयोर्मध्ये अन्तरं भवति इत्यपि अस्माभिः ज्ञातव्यम्। अतः अत्रापि वैयर्थापत्तिः दृश्यते। तद् वारणायोच्यते यत् सूर्यसंक्रान्त्युपलक्षिता एव मासाः इति वचनस्वरसात् सौरैश्चान्द्रैश्चमासैः तुल्यैरेव भवितव्यम्। परञ्च मध्यममानेन सौरमासः सावयवत्रिंशत्सावनदिवसैः तथा चान्द्रमासः सावयवैकोनत्रिंशत्सावनदिवसैः सम्पद्यते। अनयोर्द्वयोर्मासयोर्मध्ये प्रतिसौरमासे सावयवचतुःपञ्चाशत्घटिनां-अन्तरं आयाति। अयमेव न्यूनावयवः यदा वर्धते तदा सावयवैः द्वात्रिंशंमासैः एकचान्द्रमासतुल्यो सञ्जायते। विषयोऽयं गणितप्रविधिनाऽपि ज्ञातुं शक्नुमः। तद्यथा-

मध्यममानेन सौरमासः ३०/२६/१७ सावयवसावनैः सम्पद्यते। चान्द्रमासः २९/२१/५० सावयवसावनैः सम्पद्यते। अनयोरन्तरम्= ०/५४/२७ कुदिनात्मकं भवति। अत्रानुपातः क्रियते यत्-यद्यनेन सौरचान्द्रान्तरेण(०/५४/२७) एकसौरमासो भवति तर्हि चान्द्रमासान्तपातभिः कुदिनैः कियन्तः?

:- ०/५४/२७ x ३०/२६/१७ = ३२/१५/३१ सौरमासाः = २९/२१/५०

तद्यथा ब्रह्मसिद्धान्ते- **द्वात्रिंशद्भिर्गतैर्मासैः दिनैः षोडशभिस्तथा।**
**घटिकानां चतुष्केण पतति ह्यधिमासकः ।।**[19]

16. मुहूर्तचिन्तामणिः, नक्षत्रप्रकरणम्, पीयूषधाराटीका- कूहू-सिनीवाली-दर्शशान्तिप्रकरणम्, पृ.सं.138
17. सूर्यसिद्धान्तः मध्यमाधिकारे श्लो.सं. 13
18. सि. शि. म. अधि. कालमानाध्यायः श्लो.सं. 19
19. वशिष्ठसिद्धान्तस्य सन्दर्भः ग्रहलाघवस्य मरीचिटीकायां मध्यमाधिकारस्य पृ.सं. 8

अस्याधिमासस्य स्थितिः द्वात्रिंशन्मासैः संभाव्यते। परन्तु स्थितिरियं प्रति-द्वात्रिंशंमासैः भवेत् इति अस्माभिः न दृश्यते। कदाचित्-एवमपि भवति यत् अधिमासस्य स्थितिः त्रयस्त्रिंशन्मासैरपि जायते। वस्तुतः मानमिदं मध्यमं वर्तते न तु स्पष्टम्। अर्थात् पूर्णसौरचान्द्रमासयोः अन्तरं मध्यममानेन सावयवचतुःपञ्चाशत्घट्यात्मकं भवति। अस्य मध्यममानस्यास्थिरत्वाददधिमासस्य स्थितिः द्वात्रिंशंमासैः किंवा त्रयस्त्रिंशन्मासैः भवति। अतएव अत्र न कोऽपि दोषः। पुनश्च प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते इति धिया अस्याधिमासस्य किमपि प्रयोजनं तु अवश्यमेव भवितव्यम्। वस्तुतः प्रत्येकस्मिन् वर्षे सौरचान्द्रमानयोः मध्ये किञ्चित्-अन्तरम् आयाति। इदमेवान्तरं वर्धयन् दशनैर्दलाढ्यैर्मासैरेकोधि-मासपातः भवति। अस्यैव अधिमासस्य मलमासत्वम्। यदि अस्य मलमासत्वं न स्वीक्रियते तर्हि वर्षमध्ये द्वादशमासाः षड् ऋतवः द्वे च अयने भवतः, तेषां मध्ये संगति न भविष्यति। यतः एकस्मिन् वर्षे द्वादश एव सौरमासाः तद्वद् द्वादश एव चान्द्रमासाः भवन्ति। तदनुसारमेव द्वयोर्मासयोरेकऋतुः तथा षड् मासानामेकस्यायनस्य सिद्धिर्जायते। यदि दशनैर्दलाढ्यैर्मासैर्सञ्जायमासस्य मलमासत्वं नाङ्गीक्रियते तर्हि मास-ऋतु-अयन-वर्षादिकालावयवानां मध्ये विसंगतिः भविष्यति। मध्यमाधिमासानयनप्रसङ्गे चैत्रादिषु सप्तमासेषु एव अधिमासः पततीति मकरन्दाचार्यः[20]-

**हीनः शकाब्दो गगनाग्निनागै ८३० र्नवेन्दु १९ भक्तो यदि शेषकं स्यात् ।**
**गुणेशशून्याष्टनृपेषु विश्वे ३, ११, ०, ८, १६, ५, १३ चैत्रादयः सप्तसदाधिमासाः।।**

अधिमासे कृत्याकृत्यकर्मविचारप्रसङ्गे मरीचिटीकाकारः वदति यत्- "**अधिमासः तु वत्सरान्तर्गतः पापो यज्ञानां फलनाशकृत्**"[21]। एवमेव अन्यानि त्याज्य-कर्माणि सन्ति-

**माङ्गल्यमभिषेकश्च मलमासे विवर्जयेत्।**
**त्यजेद्दानं महादानं व्रतं देवविलोकनम् ।।**
**वापीकूपतडागादिप्रतिष्ठां यज्ञकर्म च ।**

एवमेव निन्द्यकालविषये अधिमासस्य क्षयमासस्य च गणना भवति। आभ्यां सह अन्येऽपि निन्द्यकालाः[22]-

**बाल्यास्तवार्द्धे गुरुशुक्रयोर्वा वक्रातिचारे हरिगे गुरौ वा।**
**विश्वाहपक्षे हरिचापसंस्थे रवौ क्षयाख्ये च तथाधिमासे ।।**
**सूर्यर्क्षगे देवगुरौ दिनेशे जीवर्क्षगे केतु समुद्गमे वा।**
**विवाहचूडाव्रतबन्धपूर्वं सत्कर्मसर्वं न शुभं वदन्ति ।।**

इत्थं ज्योतिषशास्त्रोक्तस्य **असंक्रान्तिमासोऽधिमासः स्फुटः स्यादिति** वचनस्य तथा **द्विसंक्रान्तिमासः क्षयाख्य** इति वचनस्य ज्योतिषशास्त्रदृष्ट्या धर्मशास्त्रदृष्ट्या च महन्महत्त्वपूर्णं स्थानं विद्यते।

20. मकरन्दप्रकाशे-
21. सि. शि. मरीचिटीकायाम्
22. मकरन्दप्रकाशे-पृ.सं.122

# मासविमर्शः

**डॉ.विकासः**
सहायकप्राचार्यः,
स्नातकोत्तरज्यौतिषविभागः
कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः

रोमनकैलेण्डर इत्यस्मिन् आदौ दश मासाः (मार्च-अप्रैल-मई-जून-क्विटिलस-सैबिस्टालिस-सितम्बर-अक्तुबर-नवम्बर-दिसम्बर) आसन्। लैटिनभाषायां सितम्बरादिमासानां नाम्ना अर्थो अस्ति सितम्बर=सप्त। अक्तुबर=अष्ट। नवम्बर=नव। दिसम्बर=दश। (पञ्चममासस्य नाम क्विटिलस इति आसीत्,जुलियससीजरस्य जन्म अस्मिन् मासे अभवत्। अतः सः क्विटिलस इत्यस्य मासनामस्थाने स्वकीयनाम्ना जुला इति कृतवान्। तदा वर्षस्यारम्भः मार्च इति मासतः भवतिस्म। बहु कालानन्तरं द्वौ (जनवरी-फरवरी) मासौ योजितौ स्तः। तदा फरवरी इति द्वादशतमः मासः आसीत्। जुलियससीजरः जनवरीमासतः वर्षारम्भं कृतवान्। तेन वर्षगणना ईसाजन्मतः कृतः। आक्टेबियन इत्यस्मिन् काले वर्षस्य अष्टममासस्य नाम सैबिस्टालिस इति आसीत्। सः अस्य मासस्य नाम परिवर्तनं कृत्वा स्वकीय नाम्ना आगस्टम इति कृतवान्। कालान्तरे अगस्त इति अभवत्। तस्मिन् समये सप्तमे मासे 31 दिनानि तथा अष्टमे मासे 30 दिनानि भवन्तिस्म। यतोहि सप्तममासस्य नाम जुलियससीजर इत्यस्य नाम्ना जुलाई इति आसीत्। तस्मिन् मासे अधिकदिनानि सन्ति। अतः अभिमानभावनया आगस्टम इत्यनेन फरवरीमासस्य 29 दिनतः एकं दिनं निष्कास्य स्वकीये नाम्नि अगस्तमासे 31 दिनानि कृतवान्। अतः अधुना जुलाई इति सप्तममासः, अगस्त इति अष्टममासः च अभवताम्। अनेन मासस्य क्रमभङ्गो अभवत्। यथा-सितम्बर=नव। अक्तुबर=दश। नवम्बर=एकादश। दिसम्बर=द्वादश। अतः अयम् अवैज्ञानिको अस्ति। सर्वादौ भारतेऽव ग्रहनक्षत्रतारादीनाम् अध्ययनस्य परम्परा प्रारब्धा जाता। भारतवर्षे ग्रेगेरियनकैलेण्डर-इत्यस्मात् बहुकालपूर्वम् एव ग्रहनक्षत्रतारादीनाम् आधारीकृत्य पञ्चाङ्गनिर्माणम् बभूव।

ज्योतिषशास्त्रस्य सिद्धान्तग्रन्थेषु ब्रह्मातः मानवपर्यन्तं सर्वेषां जीवानां कृते भिन्नं-भिन्नं नवविधकालमानं उक्तमस्ति। अर्थात् भारतीयदैवज्ञानां चिन्तनं बहुसमृद्धम् आसीत् ते तु ब्रह्मणः प्राजापत्यस्य (मनोः) देवानां पितराणां मनुष्याणाञ्च मानस्यारम्भकालात् समाप्तिकालसाधनविधिमपि अलिखन्। यथा[1] -

**ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।**
**सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव।।**

भारतीयदैवज्ञाः खगोलज्ञा आसन्, अतः ते खगोलविज्ञानं विज्ञाय मनुष्याणां कृते व्यवहारार्थं

1. सूर्यसिद्धान्तः, मानाध्यायः-1

चतुर्विधं (सौरमानं चान्द्रमानं नाक्षत्रमानं सावनमानञ्च)कालमानं निर्द्धारितवन्तः। यथोक्तम्[2] -

**चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः।**
**बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः।।**

चतुर्विधमानं निर्द्धारणं कृत्वा तत्र केन मानेन किं किं व्यवहर्तव्यमिति अपि सुस्पस्टतया लिखितं वर्तते। तद्यथा- भास्कराचार्येण उक्तम्[3]-

**वर्षायनर्तुयुगपूर्वकमत्र सौरान् मासास्तथा तिथयस्तुहिनांशुमानात्।**
**यच्कृच्छ्रसूतकचिकित्सितवासराद्यं तत्सावनाच्च घटिकादिकमार्क्षमानात्।।**

सौरमानाद् वर्षस्य अयनस्य ऋतोः युगादिकस्य च व्यवहारः करणीयः। जन्मदिवसोऽपि वार्षिको भवति अतः सौरमानेन गृह्यते। चान्द्रमानाद् मासस्य तिथेश्च व्यवहारः कर्तव्यः। व्रतोपवासचिकित्सित-सूतकवासरादीनां सावनमानेन व्यवहारः कार्यः। घटिकादिकस्य नाक्षत्रमानेन व्यवहारः क्रियते।

अनेनभास्कराचार्यस्य वचनेन ज्ञायते यत् मासविचारः चान्द्रमानेन गृह्यते। परञ्च केषुचित् प्रदेशेषु (उत्तरभारतीयप्रान्तेषु हिमाचल-पञ्जाब-उत्तराखण्डादिषु)सौरमासाद् व्यवहारः क्रियते।

भारतीयमासानां नामानि-

भारतीयमासानांनिर्माणं खगोलीयग्रहनक्षत्राणाञ्च गत्यनुसारंवर्तते। चन्द्रमा यदा एकस्याः तिथेः (12 अंशानाम्) भोगं करोति तदा एका चान्द्रतिथिः वर्तते। यदा द्वादशराशीनां/ 360अंशानां (त्रिंशत्तिथीनां) भोगं करोति तदा एकः चान्द्रमासो विद्यते। यथोक्तं सूर्यसिद्धान्ते[4]- **त्रिंशता तिथिभिर्मासश्चान्द्रः**। भारतीयज्योतिषशास्त्रे द्वादशमासाः कथिताः सन्ति। ते च यथा-चैत्रः वैशाखः ज्येष्ठः आषाढः श्रावणः भाद्रपदः आश्विनः कार्तिकः मार्गशीर्षः पौषः माघः फाल्गुनश्च।

**मासानां नामकरणम्-**

पूर्णिमान्ततिथौ चन्द्रमसः येन नक्षत्रेण संयोगो भवति तस्य नक्षत्रस्य नाम्ना मासस्य नामकरणं वर्तते। तद्यथा- नक्षत्रेण युक्तः कालः । सूर्यसिद्धान्तेऽपि उक्तम्[5] -

**भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते।**
**नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः।।**

कृत्तिकानक्षत्रेण युक्तः चन्द्रः कार्तिकः, मृगशिरानक्षत्रेण युक्तः मार्गशीर्षः, पुष्येण नक्षत्रेण युक्तः पौषः,मघानक्षत्रेण युक्तः माघः, चित्रानक्षत्रेण युक्तः चैत्रः, विशाखानक्षत्रेण युक्तः वैशाखः, ज्येष्ठानक्षत्रेण युक्तः ज्यैष्ठः, आषाढनक्षत्रेण युक्तः आषाढः, श्रवणनक्षत्रेण युक्तः श्रावणः, भाद्रपदनक्षत्रेण युक्तः भाद्रपदः, अश्विनीनक्षत्रेण युक्तः आश्विनः च।

परञ्च पूर्णिमान्ते तत्तन्नक्षत्राभावे मासानां सञ्ज्ञा कथं उचिता। अस्मिन् विषये सूर्यसिद्धान्तेलिखितं

2. सूर्यसिद्धान्तः, मानाध्यायः-2
3. सि. शि. मध्यमाधिकारे कालमाना. श्लो.सं. 31
4. सूर्यसिद्धान्तः मानाध्यायः
5. सूर्यसिद्धान्तः, मानाध्यायः-15

यत् पूर्णिमान्ते नवमासेषु कृत्तिकादिद्वयं द्वयं नक्षत्रं, त्रिषु मासेषु (अन्त्ये उपान्त्ये पञ्चमे च) त्रीणि त्रीणि नक्षत्राणि कथितानि सन्ति। यथा- कृत्तिकारोहिणीभ्यां कार्त्तिकः। मृगार्द्राभ्यां मार्गशीर्षः। पुनर्वसुपुष्याभ्यां पौषः। आश्लेषामघाभ्यां माघः। पूर्वोत्तराफाल्गुनीहस्तनक्षत्रत्रयसम्बन्धात् फाल्गुनः। चित्रास्वातीभ्यां चैत्रः। विशाखानुराधाभ्यां वैशाखः। ज्येष्ठामूलाभ्यां ज्यैष्ठः। पूर्वोत्तराषाढाभ्याम् आषाढः। श्रवणधनिष्ठाभ्यां श्रावणः। शतभिक्पूर्वोत्तरभाद्रपदनक्षत्रत्रयसम्बन्धाद् भाद्रपदः। रेवत्यश्विनीभरणी-नक्षत्रत्रयसम्बन्धाद्आश्विनः च। सूर्यसिद्धान्तोक्तमासक्रमः[6] -

**कार्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम्।**
**अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्।।**

| क्रमः | पूर्णिमान्तनक्षत्राणि | मासनामानि |
|---|---|---|
| 1. | कृत्तिका रोहिणी | कार्त्तिकः |
| 2. | मृगशिरा आर्द्रा | मार्गशीर्षः |
| 3. | पुनर्वसुः पुष्यः | पौषः |
| 4. | आश्लेषामघा | माघः |
| 5. | पूर्वोत्तराफाल्गुनी हस्तः | फाल्गुनः |
| 6. | चित्रास्वातिः | चैत्रः |
| 7. | विशाखा अनुराधा | वैशाखः |
| 8. | ज्येष्ठामूला | ज्यैष्ठः |
| 9. | पूर्वोत्तराषाढा | आषाढः |
| 10. | श्रवणा धनिष्ठा | श्रावणः |
| 11. | शतभिक्पूर्वोत्तरभाद्रपदः | भाद्रपदः |
| 12. | रेवत्यश्विनीभरणी | आश्विनः |

व्यवहारे चैत्रशुक्लपक्षतः विक्रमाब्दस्यारम्भो भवति। अतः प्रथमः चैत्रमासो, द्वितीयो वैशाखः, तृतीयो ज्यैष्ठः, चतुर्थो आषाढः, पञ्चमो श्रावणः, षष्ठो भाद्रपदः, सप्तमो आश्विनो, अष्टमः कार्त्तिको, नवमो मार्गशीर्षो, दशमः पौषः, एकादशो माघो, द्वादशश्च फाल्गुनो वर्तते।

### अधिकमासः/पुरुषोत्तममासः

यस्मिन् चान्द्रमासे सूर्यसङ्क्रान्तिः न भवति सः अधिकमासो वर्तते। सौरचान्द्रमासयोः यदा अन्तरम् एकमासतुल्यं भवति तदा तदन्तरं समापनाय अधिकमासव्यवस्था कृता विद्यते। अस्य अपरं नाम पुरुषोत्तमासः अधिकमासः मलमासश्च वर्तते। यथोक्तं आचार्यभास्कराचार्येण -

**असङ्क्रान्तिमासोऽधिमासस्फुटं स्याद्**[7]। सूर्यसिद्धान्तेऽपि उक्तम्[8] -

6. सूर्यसिद्धान्तः,मानाध्यायः-16
7. सिद्धान्तशिरोमणिः, ग्रहगणितम्-6
8. सूर्यसिद्धान्तः,मध्यमाधिकारः-35

**भवन्ति शशिनो मासाः सूर्येन्दुभगणान्तरम्।**
**रविमासोनितास्ते तु शेषाः स्युरधिमासकाः।।**

सिद्धान्तज्योतिषग्रन्थेषु द्वात्रिंशत् 32 मासानां 16 दिनानां 4 घटिकानाञ्च अनन्तरम् अधिकमासः कथितोऽस्ति। यथा[9]-

**द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा।**
**घटिकानां चतुष्केण पततीत्यधिकमासकः।।**

ग्रेगेरियनकैलेण्डर इत्यनुसारेण जनवरी-फरवरी-मार्चादिमासैः अस्माकं किमपि पर्व न मन्यते। भारतीयानां सर्वाणि पर्वाणि चैत्रादिमासानाम् आधारेण भवन्ति। यथा- चैत्रमासेन चैत्रनवरात्रम्, वैशाखमासेन वैशाखी, श्रावणमासे शिवस्य बिल्वपत्रेण विशिष्टपूजा, भाद्रपदमासे भगवतः श्रीकृष्णजन्मोत्सवः, आश्विनमासे शारदीयनवरात्रम् (आश्विननवरात्रम्), कार्तिकमासे दीपावली, मार्गशीर्षमासे गीताजयन्त्यादयः। अतः भारतीयवैज्ञानिकमासानां ज्ञानं समेषां कृते आवश्यकं विद्यते। एकस्मिन् भारतराष्ट्रे मासप्रणाली द्विविधा न भवितुं शक्नोति। भारतवर्षे यस्यां चैत्रवैशाखादिमासप्रणाल्यां सर्वाणि पर्वाणि मन्यन्ते अतः सैव ग्राह्या वैज्ञानिकी व्यावहारिकी सर्वोत्कृष्टा शास्त्रसम्मता च।

**ग्रहणफलनिर्द्धारणसिद्धान्तः-**

जन्मर्क्षे निधनं ग्रहे जनिभतो घातः क्षतिः श्रीर्व्यथा
चिन्ता सौख्यकलत्रदौस्थ्यमृतयः स्युर्माननाशं सुखम् ।
लाभोपाय इति क्रमात्तदशुभध्वस्ते जपः स्वर्णगो-
दानं शान्तिरथो ग्रहं त्वशुभदं नो वीक्ष्यमाहुः परे ।।

मुहूर्तचिन्तामणिः- गो. प्र. ६

9. बृद्धवशिष्टसिद्धान्तः श्लो.सं. 65

# कूर्मचक्रस्यानुशीलम्

**डॉ. ज्योतिप्रसाददाशः**
सहायकाचार्यः (संविदा), ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी-१

सुविदितमेवैतत् अत्र भवतां निखिलनिगमागममविधूतचेतसां विपश्चितां यदिह जगति जनिमतां सर्वतः श्रेयमार्गप्रदर्शको वेद एव। नात्र कश्चिदपिविषयोऽनुपलभ्यो यथार्थतथ्यानान्वेषयतां सताम्। वेदस्य षडङ्गानि शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषादीनि वेदे प्रतिपादितानां तत्त्वानां विषयानाञ्च सुष्ठुज्ञानाय प्रवर्तितानि सन्ति। तेषां शास्त्रीयतां प्रतिपादयन् उक्तमाचार्यभास्करेण-

**शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पकरौ।**
**या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः।। (१)**

चक्षुःस्थानीयस्य सम्पूर्णज्योतिषशास्त्रस्य तिस्र शाखाः गदिताः सन्ति आचार्यैः। सिद्धान्त-संहिता-होरेति प्रमुखशाखात्रयम्। आचार्यभास्करः शास्त्रस्यास्य प्रशंसां प्रतिपादयन् उक्तम्-

**वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**
**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः।। (२)**

चक्षुषाङ्गहीनस्य या स्थितिः, तथैव नेत्रस्थानीय-ज्योतिषशास्त्राङ्गविहीनस्य वेदस्य सा स्थितिः। उच्यते- वेदा हि यज्ञार्थमभिप्रवृत्ताः, यज्ञाः प्रोक्तास्ते तु कालाश्रयेण। **(३)** इत्यत्र कालज्ञानपरकशास्त्रत्वेन ज्योतिषशास्त्रस्य गणना भवति। स्कन्धत्रयानां विचारितविषयाः सामान्यरूपेण यथा- सिद्धान्तस्कन्धेन ग्रहगणितसम्बन्धित-विचाराः। होरास्कन्धेन व्यक्तिगतशुभाशुभफलनां विचारास्तथा ज्योतिषशास्त्रस्य तृतीये संहितास्कन्धे समष्टिगतफलानां विशदविचार-वर्णनञ्च लभ्यन्ते। संहिताग्रन्थानुसारेण राष्ट्रस्य, विश्वस्य च प्रतिवर्षं शुभाशुभ-फलनिर्देशनं भवति। राष्ट्रविशेषस्य भविष्यफलज्ञानाय संहिताशास्त्रे अनेके विषयाः ग्रहचारादिकाः निरूपिताः सन्ति। एतेन कस्यचिदपि नगरस्य, देशस्य, विश्वस्य च भावि-संवत्सरस्य शुभाशुभफलं निरूपयन्ति संहिता-शास्त्रपारगाः। कदा इत्युक्ते कस्मिन् समये किं करणीयमिति जिज्ञासायां श्रीमद्भगवींतायां योगेश्वरवचनं यथा-

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः। न स सिद्धिमवाप्नोतो न सुखं न परां गतिम्।।**(४)

शास्त्रवचनमेवास्माकं कृते प्रमाणमिति स्वीकृत्य कार्ये गतिः भवेदिति श्रीमद्भगवींता निर्दिशति। तद्यथा- तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। इति। चैत्रशुक्लप्रतिपदातिथौ नववत्सरारम्भे गणकाः तस्यैव दिनस्य वर्षप्रवेशसमयं स्वीकृत्य वर्षकुण्डल्याः निर्माणं कृत्वा तदनुसारेण सम्पूर्णवर्षे देशस्य स्थितिः कीदृशी स्थास्यतीति तन्निरूपयन्ति। देशस्य ग्रहस्थितिं परिशील्य संहिताशास्त्रानुसारेण फलविमर्षणं कृत्वा पञ्चाङ्गमाध्यमेन जनान् सूचयन्ति। कथमिति चेत्, संहिताशास्त्रमेव सामूहिकफलप्रतिपादने समर्थः। देश-राज्य-नगराणां भाविसम्वत्सरे शुभाशुभज्ञानाय संहिताशास्त्रस्य ग्रहचाराः, ग्रहभक्तियोगः, आषाढी-

स्वाती-रोहिणीयोगाः, कूर्मचक्रविभागः, ग्रहयुद्धः, दिग्दाहः, प्रतिसूर्योत्पातादयः सम्यक् विचारणीयं भवति। इदानीं प्रकृतविषयं चर्चयामः। कूर्मचक्रविचारः, अस्य कूर्मचक्रस्योल्लेखः बृहत्संहितायां, नरपतिजयचर्यायां, गर्गसंहितायां, नारदसंहितायां, विभिन्नपुराणेष्वपि मिलति। सर्वत्रैकरूपता वर्णनेऽस्य दृश्यते। किमर्थमन्यजीवस्य प्रयोगं न कृत्वा आचार्याः कूर्मचक्रस्यैव व्यवहारः कृत इति सामान्या जिज्ञासा। तत्र इदमेव कारणं भवितुमर्हति यत्- कूर्मस्य अङ्गेषु स्पष्टरूपेण दिशं, विदिशं, मध्यबिन्दुञ्च सरलतया ज्ञातुं शक्यते। नान्ये जीवे ईदृशी स्थितिः। एतदर्थं कूर्मस्यैव व्यवहारः। संहिताग्रन्थातिरिक्ते नरपतिजयचर्यास्वरोदयेऽपि कूर्मपञ्चकस्योल्लेखः प्राप्यते। तद्यथा- (क) पृथिवीकूर्मचक्रम्, (ख) देशकूर्मचक्रम्, (ग) नगरकूर्मचक्रम्, (घ) क्षेत्रकूर्मचक्रम्, (ङ) गृहकूर्मचक्रम्। संहितायां केवलं पृथिवीकूर्मचक्रस्य वर्णनमुपलभ्यते। आदौ तावत् विचारयामः पृथिवीकूर्मचक्रस्य। संहितास्कन्धे जगतः शुभाशुभफलविचारार्थं कूर्मचक्रे नक्षत्राणां न्यासव्यवस्थाः आचार्यैः परिकल्पिताः सन्ति। नरपतिजयचर्यास्वरोदये कूर्मचक्रस्य वर्णनप्रसङ्गे कथितं यत् एतस्य कूर्मचक्रस्य वर्णनं कोशलागमे वर्तते। अनेन ज्ञानेन देशस्य, संपूर्णविश्वस्य च शुभाशुभफलं आगामिनी संवत्सरे कदा भविष्यतीति ज्ञातुं शक्यते। यदुक्तं-(५)

**कूर्मचक्रं प्रवक्षामि यदुक्तं कोशलागमे। यस्य विज्ञानमात्रेण ज्ञायते देशविप्लवः।।**
**यस्य श्रृङ्गैकदेशस्था देवास्त्रित्रिंशकोटयः। सुमेरुः पृथ्वी मध्ये श्रूयते दृश्यते न तु।।**
**तादृशाःपर्वताश्चाष्टौ सागरा द्वीपदिग्गजाः। सर्वे ते विधृता भूम्या सा धृता येन तं श्रृणु।।**
**दंष्ट्रया सा वराहेण विधृता सागरा धरा। मुस्ताग्वननतोयस्य शोभते मृतिकेव या।।**
**ईदृशोऽसौ महाकायो वराहः शेष मस्तके। तस्य चूडामणेरूर्ध्व संस्थितो मशकोपमः।।**
**एवंविधः स शेषोपि कुण्डलीभूमिसंस्थितः। कूर्मपृष्ठैकभागेन पद्मतन्तुरिवावभौ।।**

सुमेरुपर्वतः भूमेः मध्यभागे अस्तीति श्रूयते, परन्तु न दृश्यते। यस्मिन् त्रयस्त्रिंशत्कोटिसंख्यकाः देवाः वसन्ति। सुमेरुसदृशाः अष्टौ पर्वताः, सप्तसागराः, द्वीपाश्च भूमौ दृश्यन्ते। यदाऽसुरः हिरण्यकशिपोः भ्रता हिरण्याक्षः भूमिं समुद्रे निपातितं तदा भूमेः समुद्धरणाय भगवान् बराहावतारेण स्वद्रंष्ट्रबलेन पृथिव्याः समुद्धरणं कृतम्। बराहः शेषनागस्य मस्तकोऽपरि मशक(मच्छर)सदृशः स्थितः। पुनश्च शेषोऽपि कुण्डलीरूपो भूत्वा कूर्मपृष्ठे तस्थौ। एषः कूर्मः बहुविस्तारयुक्तः सन् सर्वासु दिक्षुः स्वांगानि प्रस्तारयामासः। तस्य विस्तारः यथा-

**वपुः स्कन्धशिरः पुच्छनखांघ्रिप्रभृतीनि च। मानेन तस्य कूर्मस्य कथयामि प्रयत्नतः।।**
**शङ्खोः शतसहस्राणि योजनानि वपुः स्थितम्। तदर्धेन भवेत्पुच्छं पुच्छार्धेन द्विकुक्षिकम्।।**
**ग्रीवा सायुतकोटिभिर्मस्तकं सप्तकोटिभिः। नेत्रयोरन्तरं तस्य कोटिरेकप्रमाणतः।।**
**मुखं कोटिद्वयं तस्य द्विगुणेन च पादयोः। अंगुलीनां नखाग्रेषु योजनान्ययुतावधि।।**
**एवं कूर्मप्रमाणं तु कथितं चादियामले। तस्योपरि स्थिता तत्र सप्तद्वीपयुता मही।।(६)**

एतस्य कूर्मस्य वपुः दशशंखयोजनात्मकः (एक पर १८ बिन्दु लगने से जो संख्या) कथितः।

आधुनिकानां मते एकयोजनं दश मीलतुल्यम्। एतदर्धं पुच्छम् पुच्छार्द्धं कुक्षिद्वयम्, सायुत- कोटिमिता ग्रीवा, कोटिसंख्यमुभयोर्नेत्रयोरस्य मध्यान्तरम्, कोटिद्वयं मुखम्, चतुष्कोटिप्रमाणमस्य पदौ, दशशतयोजनात्मकं नखाङ्गुलप्रमाणमिति आचार्याः स्वीकुर्वन्ति। कूर्मस्य एतदेव प्रमाणं आदियामलागमेऽपि वर्णितमस्ति। एतस्य कूर्मस्योपरि सप्तद्वीपयुता पृथ्वी स्थिताऽस्ति। सर्वावयवयुक्तस्य कूर्मस्य मुखं पूर्वस्यां दिशि, पुच्छस्तु पश्चिमस्यामिति शास्त्रकाराः विद्वांशः। कूर्मशरीरस्य विस्तारेण ज्ञायते यत् सम्पूर्णं सौरमण्डलं तदन्तर्गतमेव। तत्र सौरमण्डले सर्वतो दूरतमः ग्रहः प्लूटः। सः सूर्यात् ३६६६०००००० मीलात्मके दूरे वर्तते। कूर्मशरीरस्य परिशीलनेन ज्ञायते यदयमस्माकं सौरमण्डलात् बहुरधिकमस्ति। उक्तञ्च-

**तस्योपरि स्थिता तत्र सर्वद्वीपयुता मही।**
**कूर्माकारं लिखेच्चक्रं सर्वावयवसंयुतम्।।**
**पूर्वभागे मुखं तस्य पुच्छं पश्चिममण्डले।। (७)**

**कूर्मचक्रस्य रचना-** भावनात्मकदृष्ट्या कूर्मस्य परिकल्पना एवाचार्यैः कृताः सन्ति। यतोहि दिशाज्ञानमेव मुख्योद्येश्यम्। कूर्मशरीरस्य स्थितिः दिगनुसारेण वर्तते। येन नक्षत्राणामवस्थानवशात् जगतः शुभाशुभफलविवारः भवितुं शक्नुयात्। ब्रह्माण्डस्य लघुतमः भागः, ग्रहाणां कक्षा तथा सौरमण्डलोऽपि अण्डाकारक्षेत्रविशेषः। अतः मुख-पुच्छौ, चत्वारः पादाः, कुक्षिस्थानञ्च अस्माकं देशकूर्मविचारप्रसङ्गे भारतस्य नवधा स्थानम् विभाजनं कूर्मचक्रानुसारं करणीयमिति बृहत्संहिताग्रन्थे प्रतिपादितं वर्तते। कृतिकादिनि त्रिणि-त्रिणि नक्षत्राणि तद्-तद् विभागेषु नाम दिगनुरोधेन विधाय देशकल्पनां कुर्यात्। कूर्मचक्रस्य सीमा-अस्य चक्रस्य प्रयोगः मुख्यरूपेण भारतवर्षस्य शुभाशुभस्थितिपरिज्ञानाय भवति। तत्र कारणद्वयं सम्यक् प्रतिभाति। प्रथमकारणत्वेन प्रथमश्लोके 'भारतवर्षे मध्य प्रागादि विभाजिता देशाः" इति उक्तिरियम्। द्वितीयकारणरूपेण कूर्मचक्रप्रकरणे ये देशाः उक्ताः ते सर्वेऽपि भारतस्य भौगोलिकस्थित्यनुरूपं वर्तन्ते इति अध्ययनात् प्रतिभाति। प्राग्वैदिक-वैदिक-रामायण-महाभारतकाले सम्पूर्णभारतवर्षस्य विभिन्नस्थानानां नामोल्लेखः ज्योतिषशास्त्रस्य संहिताग्रन्थे मिलति। परन्तु बहु प्राचीनकालादस्यदेशस्यस्थितित्वात् तत्र समयक्रमे स्थानानां नामेऽपि परिवर्तनमद्यत्वे दृश्यते। सामान्यतया विचारयामः स्वाधीनभारतस्य पूर्वापर-भौगोलिकी स्थितिः। इदानीं ये देशाः भारतस्य निकटतमाः ते कदा भारते एव आसन्। अस्माकं इतिहास एव ज्वलन्तप्रमाणम्। तत्र चाणक्यस्य समये भारतभूखण्डस्य या विस्तृतिरासीत् सा इदानीं न दृश्यते। कूर्मचक्रे प्रतिपादितानां बहूनां देशानां नामानि महाभारत-रामायणकालस्य सन्ति। कथमिति जानीमो वयम्। वेदव्यासस्य पितृपाद आचार्यपराशरः ज्योतिषशास्त्रस्य प्रमुखप्रणेतृषु अन्यतमः परन्तु गर्गः पराशरात्पूर्ववर्तिराचार्यः। वराहमिहिरः स्व संहितायां कूर्मचक्रप्रतिपादनावसरे पूर्वाचार्याणां विषयवस्तु स्वीकृतमस्ति। वराहमिहिरसमयेऽपि भारतस्य भौगोलिकसीमा या काऽपि भवतु तथाऽपि कूर्मचक्रे चीन-रूष-वर्मा- मालद्वीप-लंकाप्रभृति भारतेतरदेशानां उल्लेखः दृश्यते। अतः कूर्मचक्रस्य व्यवहारकरणावसरे सम्पूर्ण एसियामहादेशस्य शुभाशुभविचारकरणे न काऽपि हानिः स्यादिति मन्मतिः। प्रसङ्गेऽस्मिन् कश्चनाधुनिकनक्षत्रशास्त्रज्ञस्य चूलेटमहोदयस्य इयं

परिकल्पना यथा- कूर्मचक्रस्य विचारः सम्पूर्ण एशियामहादेशे एव भवेत्। तेन अक्षांश-रेखांशानुरोधेन सीमायाः सम्यक् वर्गीकरणं कृतम्। तत्रोत्तरस्यां शून्यांक्षांशात् चत्वारिंशत् (ं०-४०ं) उत्तरपर्यन्तं तथा षष्ठ्यंशादारभ्य विंशत्यधिक-एकशतांश(६०ं-१४०ं) पूर्वपर्यन्तं सीमानिर्द्धारणम्। तस्य स्वरूपं यथा-

| क्र.सं. | कूर्मभागः | अक्षांशाः | रेखांशाः | नक्षत्राणि |
|---|---|---|---|---|
| १ | मध्यभागः | १३ं तः २७ं (उ) | ८०ं तः १०० (पू) | कृ.,रो.,मृ. |
| २ | पूर्वभागः | १३ं तः २७ं (उ) | १००ं तः १२० (पू) | आ.,पुन., पु. |
| ३ | आग्नेयभागः | ०ं तः १३ं (उ) | १००ं तः १२० (पू) | आश्ले.,म., पू.फा. |
| ४ | दक्षिणभागः | ०ं तः १३ं (उ) | १००ं तः १२० (पू) | उ.फा., ह., चि. |
| ५ | नैऋत्यभागः | ०ं तः १३ं (उ) | ८०ं तः ६०ं (पू) | स्वा., वि., अनु. |
| ६ | पश्चिमभागः | १३ं तः २७ं (उ) | ८०ं तः ६०ं (पू) | ज्ये., मू., पू.षा. |
| ७ | वायव्यभागः | २७ं तः ४०ं (उ) | ८०ं तः ६०ं (पू) | उ.षा., श्र. धनि. |
| ८ | उत्तरभागः | २७ं तः ४०ं (उ) | ८०ं तः १००ं (पू) | शत., पू.भा., उ.भा. |
| ९ | ऐशान्यभागः | २७ं तः ४०ं (उ) | १००ं तः १२० (पू) | रे., अश्वि., भर. |

अक्षांश-रेखांशयोः वर्गीकरणद्वारा शून्यंशात् चत्वारिंशत् अंशपर्यन्तम् (ं० तः ४०ं पू.) तथा षष्ठ्यंशात् शताधिकविंशत्यंशपर्यन्तम् (६०ं तः १२०ं पू.) एशियामहादेशस्य सम्पूर्णसीमा नागच्छति। ४०ं उत्तराक्षांशरेखा चीन-जापानदेशयोः मध्यभागे गच्छति। चीनदेशस्य अर्धोत्तरभागः तथा रसियादेश अस्यां रेखायां नागच्छति। अनेन प्रकारेण ६०ं तः १२०ं पूर्वीद्राघिमारेखायां ईरान-जापानदेशौ नागच्छतः। अतः एशियामहादेशस्यविचारः ०ं तः ७०ं उत्तराक्षांशस्तथा ४०ं तः१५०ं पूर्वद्राधिमास्वीकरणे कूर्मचक्रस्योद्देश्यपूर्तिर्भवति। बृहत्संहितायां नक्षात्राणां विभागक्रमः निर्दिष्टः। तद्यथा- 'नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा। भारतवर्षे मध्यप्रागादिविभाजता देशाः"।।(८) इत्यत्र गर्गवचनं यथा-

**कृतिकाद्यैस्त्रिनक्षत्रैर्भवर्गैर्नवभिः क्षितिः। कल्पिता मध्यदेशादौ प्रागादिक्रमयोगतः।**
**कृतिकाद्यस्त्रिनक्षत्रो मध्यदेशे गणो यदा । पापैरूपहतो हन्ति मध्यदेशाखिलांस्तदा।।**

रौद्राधिको हन्ति पूर्वां सर्पाद्यः पूर्वदक्षिणाम्। आर्यम्णाद्यस्तथा याम्यां स्वात्याद्यो दक्षिणापराम्।।(९)

सम्प्रति गर्गसंहिता नोपलभ्यते। परन्तु टीकाकारेण भट्टोत्पलेन बृहत्संहिताग्रन्थस्य टीकायां बहुषु स्थलेषु गर्गमतमपि प्रदत्तमस्ति। अस्मादनुमीयते यत् टीकाकारस्य समये ज्योतिषशास्त्रीयव्यवहारे गर्गसंहिताऽऽसीत्। नारदसंहितायामपि भूमेः नवविभागाः कूर्मचक्रप्रकरणे प्रतिपादितमस्ति। उच्यते-

**प्राङ्मुखस्य तु कूर्मस्य नवाङ्गेषु धरामिमाम्। विभज्य नवधा खण्डमण्डलानि प्रदक्षिणम्।।(१०)**

यादृशं कूर्मचक्रस्य वर्णनं नारदसंहितायां उपलभ्यते, तादृशं नारदीयमहापुराणेऽपि प्राप्यते। न केवलं तत्र विषयसाम्यं दृश्यते, अपितु शब्दशः श्लोकसाम्यं नितरां वर्तते। तत्र पृथिव्याः नवभागान् कृत्वा कूर्मोङ्गानि कल्पितानि सन्ति। इत्यत्र वयं जानीमहे यत् पृथिव्याः शुभाशुभफलज्ञानाय तस्याः नवभागान् कृत्वा तत्र कृतिकादिक्रमेण नक्षत्राणां स्थापना कार्या। देशविशेषे तस्य मानचित्रोपरि तथैव नवभागान् कृत्वा कृतिकादि नक्षत्राणां स्थापना कृत्वा देशस्य शुभाशुभं विचार्यते। संहिताकारैः कूर्मचक्रानुरोधेन अस्माकं भारतदेशस्य विभाजनं कृतम्। नाम के देशाः पूर्वस्यां? के च पश्चिमस्यां? के च दक्षिणस्यां?

के चोत्तरस्यामिति? तत्र नववर्गानुसारं देशानां नवधाविभाजनं वर्तते। तदनु फलविचारः भवति। इदानीं दिगनुरोधेन देशानां स्थितिः क्रमेणालोचयामः।

**क) भारतस्य मध्यभागे स्थिताः देशाः-** भारतदेशस्य मध्यभागे कूर्मस्य नाभिमण्डलमस्ति। तत्र कृतिका-रोहिणी-मृगशिराख्यानि त्रिणि नक्षत्राणि सन्ति। अस्मिन् मध्यभागे भद्रारिमेद-माण्डव्य-साल्वनीपोज्जिहान- संख्यात- मरु- वत्स- घोष- यामुन- सारस्वत- मत्स्य- माध्यमिक-माथुर-उपज्योतिष- धर्मारण्य- शूरसेन- गौरग्रीव- उद्देहिक- पाण्डु- गुड- अश्वत्थ- पांचाल साकेत-कंक-कुरु-कालकोटि-कुकुर-पारियात्र-नग-औदुम्बर-कापिष्ठल-हस्तिनापुराख्याश्च देशाः मध्यभागे वर्तन्ते। उक्तञ्च बृहत्संहितायाम्-(११)

**भद्रारिमेदमाण्डव्यसाल्वनीपोज्जिहानसंख्याताः।**
**मरुवत्सघोषयामुनसारस्वतमत्स्यमाध्यमिकाः।।**
**माथुरउपज्योतिषधर्मारण्यानि शूरसेनाश्च।**
**गौरग्रीवोद्देहिकपाण्डुगुडाश्वत्थपांचालाः।**
**साकेतकंककुरुकालकोटिकुकुराश्च पारियात्रनगः।**
**औदुम्बरकापिष्ठलगजाह्वयाश्चेति मध्यमिदम्।।**

कूर्मस्य नाभिमण्डले अन्तर्वेदीस्थानं तथा पाञ्चालदेशश्च वर्तते इति नारदसंहितायां प्रतिपादितमस्ति। अन्तर्वेदी नाम गंगायमुनयोर्मध्यभागेति प्रसिद्धम्। उक्तञ्च- **अन्तर्वेदी च पाञ्चालं तस्येदं नाभिमण्डलं।** नारदीयपुराणेऽपि अन्तर्वेदाः पाञ्चालमध्यभागत्वेनोक्ताः। आचार्यपराशरेण भारतवर्षस्य मध्यभागे अर्यावर्तस्थानमायातीति उक्तमस्ति। नरपतिजयचर्यायां कथितं यत्कूर्मस्य मध्यभागे मिथिला-साकेत-चम्पा-कौशाम्बी-कौशिकी-गयाऽहिछत्र-विन्ध्यान्तर्वेदी-मेखला-कान्यकुब्ज-प्रयागाः वर्तन्ते। यदि वर्षारम्भकाले कूर्मचक्रे कृतिकादित्रये शनिः पापग्रहो वा कश्चित् स्यात्तर्हि उपरिलिखितदेशेषु विप्लवाः जायन्ते। कदाचिदपि देशनाशो भवति। उक्तञ्च-

**कृतिकारोहिणी सौम्यं कूर्मनाभिगतं त्रयम्। साकेतं मिथिला चम्पा कौशाम्बी कौशिकी तथा।।**
**अहिच्छत्रं गया विन्ध्यमन्वेदी च मेखला। कान्यकुब्जं प्रयागश्च मध्यदेशो विनश्यति।।(१२)**

अपि च गर्गसंहितायाम्- **कृतिकाद्यस्त्रिनक्षत्रो मध्यदेशगणो यदा। पापैरूपहतो हन्ति मध्यदेशाखिलांस्तथा।।** अनेन प्रकारेण कूर्मस्य नाभिस्थानभागस्य चर्चा। ततः परं मुखमण्डलस्य ।

**ख) कूर्मस्य मुखमण्डलगताः देशाः-** मुखमण्डलं नाम पूर्वस्यां दिशि त्रिणि नक्षत्राणि (आर्द्रा-पुनर्वसु-पुष्य) स्थितानि। पूर्वदिग्भागे ये देशाः निर्दिष्टाः तेषां नामनि यथा- अञ्जन- वृषभध्वज- पद्म-माल्यवान् गिरि-व्याघ्रमुख- सुह्म- कर्वट-चान्द्रपुर- शूर्पकर्ण- खस- मगध-शिबिरगिरि- मिथिला- समतट-ओड्र(उडीशा)- अश्ववदन- दन्तुरक- प्राग्ज्योतिष- लौहित्यनद- क्षीरोदसमुद्र- पुरुषाद-उदयगिरि-भद्र- गौडक- पौण्ड्र- उत्कल- काशी- मेकल- अम्बष्ठ- एकपद- ताम्रिलप्तक- कोशलक-वर्धमानाश्च। उक्तञ्च वृहत्संहितायाम्-

**अथ पूर्वस्यामञ्जनवृषभध्वजपद्ममाल्यर्विरयः।**
**व्याघ्रमुखसुह्यकर्वटचान्द्रपुराःशूर्पकर्णाश्च।।**
**खसमगधशिबिरगिरिमिथिलसमतटोड्राश्ववदनदन्तुरकाः।**
**प्राग्ज्योतिष लौहित्यक्षीरोदसमुद्रपुरुषादाः।**
**उदयगिरिभद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः।**
**एकपदताम्रिलप्तककोशलका वर्धमानाश्च।(१३)**

एते देशाः कूर्मस्य मुखे अथवा भारतस्य पूर्वदिग्भागे स्थिताः सन्ति। मगध-लाटादिदेशाः अपि पूर्वभागे अस्तीति नारदसंहितायां मिलति। तद्यथा- प्राच्यां मगध-लाटादि देशास्तन्मुखमण्डलम्।(१४) अपि च नारदमहापुराणे- प्राच्यां मागधलाटोत्थादेशास्तन्मुखमण्डलम्।(१५) कूर्मचक्रस्य शिरसि नाम पूर्वस्यां गौडहस्तिबन्धः, पंचराष्ट्रकामरूपचरेन्द्रीमागधरेवातटनेपालादिदेशाः स्थिताः। अत्र स्थितेषु नक्षत्रेषु यदि पापग्रहः शनिर्वा समागच्छेत्तदा तस्मिन्नब्दे विचारितदेशानां कृते पीडाकारकः भविष्यति। उक्तञ्च नरपतिजयचर्यास्वरोदये-

**रौद्रं पुनर्वसुः पुष्यं कूर्मस्य शिरसि स्थितम्। सगौडो हस्तिबन्धश्च पञ्चराष्ट्रं च कामरुः।।**
**चरेन्द्री च तथा ज्ञेया मगधश्च तथैव च। रेवातटं च नेपालः पूर्वदेशो विनश्यति।(१६)**

**ग) दक्षिणबाहुमण्डलम्** (अग्निकोणे)- अग्निकोणे कूर्मस्य दक्षिणबाहुमण्डलम्। तत्र आश्लेषा-मघा-पूर्वाफाल्गुनीनक्षत्राणि आग्येयां न्यस्तानि। इत्यस्मिन् दिद्भागे कोशल-कलिङ्ग-वङ्गो-उपवङ्ग-जठरांग-शौलिक-विदर्भ-वत्स-आन्ध्र्-चेदिक-उर्ध्वकण्ठ-वृष-नालिकेर-चर्मद्वीप-विन्ध्याचलान्तवासिन-त्रिपुरी-श्मश्रुधर-हेमकुट-व्यालग्रीवा-महाग्रीवा-किष्किन्धा-कण्टकस्थल-निषादराष्ट्र-पुरिक-दाशार्ण-नग्नशबर-पर्णशबरदेशाः सन्ति। उक्तञ्च वाराहीसंहितायाम्-(१७)

**आग्नेयां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः।**
**शौलिकविदर्भवत्सान्ध्रचेदिकाश्चोर्ध्वकण्ठाश्च।।**
**वृषनालिकेरचर्मद्विपा विन्ध्यान्तवासिनस्त्रिपुरी।**
**श्मश्रुधरहेमकुड्यव्यालग्रीवा महाग्रीवाः।।**
**किष्किन्धकण्टकस्थलनिषादराष्ट्राणि पुरिकदाशार्णाः।**
**सह नग्नपर्णशबरैराश्लेषाद्ये त्रिके देशाः।।**

समाससंहितायामपि सुस्पष्टरूपेण आग्नेयदिशि स्थितानां देशानां नामान्यधिकसुस्पष्टतया लिखितानि सन्ति। तद्यथा-

**आश्लेषाद्ये त्रिपुरी निषादराष्ट्राणि चेदिकदर्शाणाः।**
**शूलिकविन्ध्यान्तस्था वत्सान्ध्रविदर्भकालिंगाः।।(१८)**

नारदसंहितायां कूर्मस्य दक्षिणबाहुमण्डले स्त्रीकलेयकिरातनामधेयाः देशाः स्थिताः सन्ति। उक्तञ्च-

**स्त्रीकलेयकिराताख्याः देशास्तद्बाहुमण्डलम्।।** (१९)

नारदीयमहापुराणेऽपि उक्तं यत्- **स्त्रीकलिंगकिराताख्या देशास्तद्वाहुमण्डलम्।** (२०)। नरपतिजयचर्यास्वरोदये कूर्मचक्रे कूर्मस्य एतस्मिन्नङ्गे अंग-वंग-कलिङ्ग-कोशल-डाहली-जयन्ती-सुलज्जित्- उडियाम-वराडादिदेशाः सन्ति। तद्यथा-

**आश्लेषा च मघा पूर्वा पादे आग्नेयगोचरे। अंग वंग कलिंगाश्च पूर्वजाश्चैव कोशलाः।।**
**डाहली च जयन्ती च तथा चैव सुलज्जिका। उडियामं वराडं च अग्निदेशो विनश्यति।। (२१)**

**घ) दक्षिणदिग्भागे स्थिताः देशाः-** दक्षिणदिग्भागे कूर्मस्य दक्षिणकुक्षिमण्डलं भवति। अस्मिन् मण्डले उत्तराफाल्गुनी-हस्त-चित्रा नक्षत्राणि न्यस्तानि सन्ति। वराहमिहिरः तत्र दक्षिणदिग्भागे बहवः देशाः प्रतिपादितः।

**अथ दक्षिणेन लङ्का कालाजिनसौरिकीर्णतालिकटाः।**
**गिरिनगरमलयदर्दुरमहेन्द्रमालिन्द्यभरुकच्छाः।।**
**कङ्कटकङ्कणवनवासिशिविकफणिकारकोङ्कणाभीराः।**
**आकरवेणावर्तकदशपुरगोनर्दकेरलकाः।।**
**कर्णाटमहाटविचित्रकूटनासिक्यकोल्लगिरिचोलाः।**
**क्रौञ्चद्वीपजटाधरकावेर्यो रिष्यमूकश्च।।**
**वैदूर्यशंखमुक्ताऽत्रिवारिचरधर्मपट्टनद्वीपाः।**
**गणराज्यकृष्णवेल्लूरपिशिकशूर्पाद्रिकुसुमनगाः।।**
**तुम्बवनकार्मणेयकयाम्योदधितापसाश्रमा ऋषिकाः।**
**काञ्चीमरुचीपट्टनचेर्यार्यकसिंहला ऋषभाः।।**
**बलदेवपट्टनं कण्डकावनतिमिङ्गिलाशना भद्राः।**
**कच्छोऽथ कुञ्जरदरी सताम्रपर्णीति विज्ञेयाः।।(२२)**

प्रसङ्गेऽस्मिन् नरपतिजयचर्यास्वरोदये वर्णिताः देशाः यथा-

**उत्तराहस्तचित्राश्च दक्षिणां कुक्षिमागताः। दर्दुरं च महेन्द्रं च वनवासं ससिंहलम्।।**
**तापी भीमरथी लङ्का त्रिकूटं मलयस्तथा। श्रीपर्वतश्च किष्किन्धा इति नश्यन्त दक्षिणे।।(२३)**
**अपिच नारदमहापुराणे- अवन्ति द्राविडा भिल्ला देशास्तत्पार्श्वमण्डलम्। (२४)**

**ङ) नैर्ऋत्यकोणे स्थिताः देशाः-** कूर्मस्य नैर्ऋत्यां दिशि स्थिते पादे स्वाती-विशाखा-ऽनुराधाख्यानि त्रिणि नक्षत्राणि स्थितानि। आचार्यवराहमिहिरः स्व ग्रन्थे नैर्ऋत्यां दिशि के देशाः स्थिताः सन्ति तेषां नामानि न्यस्तानि। तद्यथा-

**नैऋत्यां दिशि देशाः पह्लवकाम्बोजसिन्धुसौवीराः।**
**वडवामुखारवाम्बष्ठकपिलनारीमुखानर्ताः।।**
**फेणगिरियवनमार्गरकर्णप्रावेयपारशवशूद्राः।**
**भर्बरकिरातखण्डक्रव्यादाभीरचंचूकाः।।**

**हेमगिरिसिन्धुकालकरैवतकसुराष्ट्रवादरद्रविडः।**
**स्वात्याद्ये भत्रितये ज्ञेयश्च महार्णवोऽत्रैव।।(२५)**

पुनश्च समाससंहितायां, नारदसंहितायां, नारदपुराणेऽपि नैर्ऋत्यां देशानां नामानि उट्टङ्कितानि सन्ति। दिगनुरोधेन निर्दिष्टे नक्षत्रे यदि पापग्रहाणामवस्थितिः स्युस्तदा लिखिताः देशाः विप्लवपीडिताः, नष्टाश्च जायन्ते।

**ङ) पश्चिमकोणे स्थिताः देशाः-** पश्चिमभागे कूर्मस्य पुच्छमस्ति। कूर्मपुच्छमण्डले ज्येष्ठा-मूल-पूर्वाषाढानक्षत्राणां स्थितिः। नरपतिजयचर्यायामुत्तमस्ति- यदा ज्येष्ठा-मूल-पूर्वाषाढानक्षत्रे कश्चित्पापग्रहो गोचरीयवेधयुक्तः स्यात्तदा कूर्मपुच्छे स्थिताः पारावत-मरुत्-कच्छ-अवन्ती-पूर्वमालव-पाराशर-वर्वर-सौराष्ट्र-स्त्रीराज्य-सैन्धवदेशाः पीडिताः सन्ति। उक्तञ्च-

**ज्येष्ठामूलं तथाषाढा पुच्छे कूर्मस्य संस्थिताः। पारावत मरुत्कच्छमवन्तीपूर्वमालवम्।।**
**पारासरं बर्वरं च द्वीपं सौराष्ट्रसैन्धवम्। जलस्थाश्च विनश्यन्ति स्त्रीराज्यं पुच्छपीडने।।(२६)**

अपिच बृहत्संहितायाम्-

**अपरस्यां मणिमान् मेघमान् वनौघः क्षुरार्पणोऽस्तगिरिः।**
**अपरान्तकशान्तिकहैहयप्रशस्ताद्रिवोक्काणाः।।**
**पञ्चनदरमठपारततारक्षितिजङ्गवैश्यकनकशकाः।**
**निर्मर्यादा म्लेच्छा ये पश्चिमदिक्स्थितास्ते च।।(२७)**

**ङ) वायव्यकोणे स्थिताः देशाः-** वायव्यकोणे कूर्मस्य वामपादमण्डलम्। तस्यां दिशि उत्तराषाढा-श्रवणा-धनिष्ठानक्षत्राणि स्थितानि। इत्यस्मिन् दिग्भागे माण्डव्य- तुषार- ताल- हल- मद्र- अश्मक- कुलूत- हलड- स्त्रीराज्य- नृसिंहवन- खस्थ- वेणुमतीनदी- फल्गुलुका-गुलुहा- मरुकुच्छ- चर्मरङ्ग- एकविलोचन- शूलिक- दीर्घग्रीव- आस्यकोशादयः देशाः भवन्ति। उक्तञ्च बृहत्संहितायाम्-

**दिशि पश्चिमोत्तरस्यां माण्डव्यतुषारतालहलमद्राः।**
**अश्मककुलूतहलडाः स्त्रीराज्यनृसिंहवनखस्थः।।**
**वेणुमती फल्गुलुका गुलुहा मरुकुच्छचर्मरङ्गाख्याः।**
**एकविलोचनशूलिकदीर्घग्रीवास्यकोशाश्च।।(२८)**

नारदमहापुराणेऽपि प्रसङ्गेऽस्मिन् वर्णनमुपलभ्यते। तद्यथा- 'पुलिन्दचीनयवनगुर्जराः पादमण्डलम्"(२९)। नरपतिजयचर्यायां कूर्मस्य वामपादे गुर्जर-यामुन-मरु-सरस्वती-जालन्धर-वराट-मेरुश्रृङ्गादिदेशाःसन्ति। तत्र पापग्रहैः नक्षत्रपीडिते तद्-तद् देशे पीडा-कष्टादयः भवन्ति। उक्तञ्च-

**उत्तराषाढाभत्रीणि पादे वायव्यगोचरे। गुर्जराह्वं यामुनं च मरुदेश सरस्वती।।**
**जालन्धरं वराटं च बालुकोदधिसंयुतम्। मेरुश्रृङ्गं विनश्यन्ति ये चान्ये कोणसंस्थिताः।। (३०)**

**ङ) उत्तरस्यां स्थिताः देशाः-** कूर्मस्य वामकुक्षिमण्डले सौम्यभागे शतभिषा-पूर्वाभाद्रपदोत्तराभाद्रपदनक्

षत्राणि संस्थितानि। वराहसंहितानुसारं सौम्यभागान्तर्गतदेशानां नामानि यथा-

**उत्तरतः कैलासो हिमवान् वसुमान् गिरिर्धनुष्मांश्च। क्रौञ्चो मेरुः कुरवस्तथोत्तराः क्षुद्रमीनाश्च।।**
**कैकेयवसातियामुनभोगप्रस्तार्जुनायनाग्नीध्रः। आदर्शान्तद्वीपित्रिगर्ततुरगाननाः श्वमुखाः।।**
**केशधरचिपिटनासिकदासेरकवाटधानशरधानाः। तक्षशिलपुष्कलावतकैलाबतकण्ठधानाश्च।।**
**अम्बरमद्रकमालवपौरवकच्छारदण्डपिङ्गलकाः। माणहलहूणकोहलशीतकमाण्डव्यभूतपुराः।**
**गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च। यौधेयदासमेयाः श्यामाकाः क्षेमधूर्ताश्च।।(३१)**

नरपतिजयचर्यायां कूर्मस्य वामकुक्षिमण्डले सौम्यभागे नेपाल-कीर-काश्मीर-गृभ्जन-खुरसान-माथुर-म्लेच्छदेश-खश-केदारमण्डल-हिमालयाश्रितदेशाः वर्तन्ते। तत्र विचारितनक्षत्राणां पापप्रभाववशात् सौम्यभागे विद्यमानानां देशानां कृते पीडाकारकाः भवन्ति। तद्यथा-

**शतभादित्रयं चैव उत्तरां कुक्षि माश्रतिम्। नैपालं कीरकाश्मीरं गृज्जनं खुरसानकम्।।**
**माथुरं म्लेच्छदेशश्च खसं केदारमण्डलम्। हिमाश्रयाश्च नश्यन्ति देशये चोत्तराश्रिताः।।(३२)**

**ङ) ईशानकोणे स्थिताः देशाः-** ईशानकोणे कूर्मस्य वामकुक्षिमण्डलम् वर्तते। तत्र रेवती-अश्विनी-भरणीनक्षत्राणि न्यस्तानि सन्ति। ईशानस्यां दिशि मेरुक- नष्टराज्य- पशुपाल- कीर- काश्मीर- अभिसार- दरद- तङ्गण- कुलूत-सौरिन्ध्र- वनराष्ट्र- ब्रह्मपुर- दार्वडामर- वनराज्य- किरात- चीन- कौणिन्द- भल्ल- पटोल- जटासुर- कुनट- खस- घोष- कुचिक- एकचरण- अनुविद्ध-सुवर्णभू-वसुधन-दिविष्ट-पौरव-चीरनिवासी-त्रिनेत्र-मुञ्जाद्रि-गन्धर्वादयः देशाः सन्ति। उक्तञ्च-

**ऐशान्यां मेरुकनष्टराज्यपशुपालकीरकाश्मीराः। अभिसारदरदतङ्गणकुलूतसौरिन्ध्रवनराष्ट्राः।।**
**ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौणिन्दाः। भल्लाः पटोलजटासुरकुनटखसघोषकुचिकाख्याः।।**
**एकचरणानुविद्धाः सुवर्णभूर्वसुधनं दिविष्टाश्च। पौरवचीरनिवासित्रिनेत्रमुञ्जाद्रिगान्धर्वाः।।(३३)**

अनेन कूर्मचक्रविभागेन ये देशाः वराहमिहिरेण कथिताः तेषु साम्प्रतं कतिपय देशाः तस्यां तस्यां दिशि नोपलभ्यन्ते। परन्तु कदाचिदासीत्। तदर्थं तस्मिन्नेव काले बृहद्भारतस्य परिकल्पना आसीत्। मिहिरेणोक्तं यत्- कृतिकादित्रये पांचाल- आर्द्रादित्रये मगधः- आश्लेषादित्रये कलिङ्ग- उत्तराफाल्गुन्यादित्रये अवन्ती- स्वात्यादित्रये आनर्त- ज्येष्ठादित्रये सिन्धुसौवीर- उत्तराषाढादित्रये हारहौर- शतभिषगादित्रये मद्र- रेवत्यादित्रये कौणिन्ददेशस्याधिपतीनां विनाशो जायते। उच्यते वाराहीसंहितायाम्-

**वर्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः। पाञ्चालो मागधिकः कालिङ्गश्व क्षयं जान्ति।।**
**आवन्तोऽथानर्तो मृत्युं चायाति सिन्धु सौवीरः। राजा च हारहौरो मद्रेशोऽन्यश्च कौणिन्दः।।(३४)**

स्वरोदये नरपतिकविः लिखति यस्मिन् देशे शनेर्वेधः युतिर्वा कूर्मचक्रानुसारं जायते तस्य देशस्य यत्नेन रक्षां कुर्यात्। परदेशे चेच्छनिः स्तात्तर्हि तस्योपरि आक्रमणं कृत्वा तं देशं जयेत्। यस्य देशस्य नाम नक्षत्रे शनिः तिष्ठति, तस्य देशस्य अवस्यमेव छत्रभङ्गो भवति। एतदेव समेषां संहिताग्रन्थानां तत्त्वम्। परन्तु स्वरोदये कूर्मचक्रस्य देश-नगर-क्षेत्र-ग्राम-गृहादिभेदेन अनेकधावर्णनं संलक्षते। तद्वयं सामान्यरूपेणालोचयामः।

देशस्य, नगरस्य, क्षेत्रस्य, ग्रामस्य, गृहस्य मानचित्रं संस्थाप्य पूर्वदिशं मुखं कृत्वा कर्मस्य स्थापना कार्या। पूर्ववदेव नक्षत्राणां स्थापनां कृत्वा, कस्मिन् नक्षत्रे शनैश्चरस्य स्थितिः अथवा कं नक्षत्रं पापग्रहैः प्रभावितो भवति तत्परिशीलनं कृत्वा तद्तद् स्थानानां शुभाशुभं निर्दिशेत् दैवज्ञः। तत्र गृहकूर्मविचारे गृहस्य शुभाशुभफलं विचारयन् नरपतिजयचर्याकारः-**गृहकूर्मं समालिख्य गृहद्वारमुखस्थितम्। गृहनामर्क्षंपूर्वं तु कृत्वा वीक्षं शुभाशुभम्।।** (३५) पूर्वनियमानुसारं गोचरवशात् शनेर्युतिवेधयोः परिशीलनं कृत्वा शुभाशुभं वदेत् दैवज्ञः। कूर्मचक्रे शनिः यदि गृहमध्येऽस्ति तदा गृहस्थाः शोकसन्तापकारकाः भविष्यन्ति। द्वारे बज्रापातः, पाकशालायाम् वह्निदायकः, याम्ये मृत्युप्रदः, राक्षसभयं नैऋते, पश्चिमे शुभफलदायी, वायव्ये शून्यफलदः, उत्तरे अर्थलाभप्रदः, ईशानस्थः यदा सौरी सर्वसिद्धिप्रदायकः भवति। अतिवीर्यवान् शनिः भवेत्तदा अशुभफलस्याधिक्यता, हीनबले शुभफलं गृहस्य कृते प्रयच्छति.। उक्तञ्च नरपतिजयचर्यायाम्-

**गृहमध्यगतः सौरि शोकसन्तापकारकः। द्वारे विद्युत्प्रदो ज्ञेयः पावके वह्निदायकः।।**
**ज्ञेयो मृत्युप्रदो याम्ये राक्षसे राक्षसाद्भयम्। वारुणे शुभदो ज्ञेयो वायव्ये शून्यताप्रदः।।**
**अर्थलाभप्रदः सौम्ये शाम्भवे सर्वसिद्धिदः। सौरिर्विलादिको दुष्टो स्वल्पवीर्यः शुभावहः।।(३६)**

अनेनैव प्रकारेण प्रत्येकस्य स्थानस्य शुभाशुभत्वस्य विचारः कर्तुं शक्यते। इति दैवज्ञानां कूर्मचक्रीया परिकल्पना।

## सन्दर्भग्रन्थसूची-

१- सिद्धान्तशिरोमणि कालमान- श्लो. सं.-१०
२- सिद्धान्तशिरोमणि कालमान- श्लो. सं.-११
३- सिद्धान्तशिरोमणिः, का.मा. श्लो. सं.-९
४- श्रीमद्भगवींता षोडशोध्यायः- श्लो. सं.-२३
५- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.- १ तः ६
६- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.- ७ तः ११
७- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.- १२
८- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-१
९- बृहत्संहितायां कूर्मचक्रे, प्रतिपादित-गर्गवचनम्।
१०- नारदसंहिता, ३६/०१
११- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-२ तः ४
१२- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.- १६-१७
१३- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-५ तः ७

१४- नारदसंहिता, ३६/०२
१५- नारदीयमहापुराणे, पूर्वभागे- ५६/७४१
१६- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.- १८-१९
१७- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-८ तः १०
१८- बृहत्संहितायाः कूर्मचक्रे, समाससंहितावचनम्, पृ.सं.२६७
१९- नारदसंहिता, ३६/०२
२०- नारदीयमहापुराणे, पूर्वभागे- ५६/७४१
२१- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.-२१-२२
२२- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-११ तः १६
२३- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.-२३-२४
२४- नारदीयमहापुराणे, पूर्वभागे- ५६/७४२
२५- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-१७ तः १९
२६- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.-२७-२८
२७- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-२० तः २१
२८- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-२२ तः २३
२९- नारदीयमहापुराणे, पूर्वभागे- ५६/७४३
३०- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.-२९-३०
३१- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-२४ तः २८
३२- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.-३१-३२
३३- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-२९ तः ३१
३४- बृहत्संहितायां, कूर्मचक्रे श्लो.सं.-३२ तः ३३
३५- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.-४१
३६- नरपतिजयचर्यास्वरोदये कूर्मचक्रे श्लो. सं.-४३ तः ४५

**गृहस्थाश्रम की विशेषताः-**

सानन्दं सदनं सुताश्च सुधयः कान्ता न दुर्भाषिणी सन्मित्रं सुधनं स्वयोषितिरतिश्चाज्ञापराः सेवकाः।
**आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः।।**
**यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः। तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ।।**
**किं जातैः बहुभिः पुत्रैः शोकसन्तापकारकैः। वरमेकः कुलालम्बी यत्र विश्रायते कुलम्।।**
**पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।**
**तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ।।**

# आयुर्दायविचारः

**विनायकशर्मा**
फलितज्यौतिषाचार्यः(NET)
केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः (बलाहर)
e-mail:- hpvinayak2020@gmail.com
चलदूरवाणी-7807447441

आजीवने कर्मणः एव प्रामुख्यं विद्यते। यतोहि मनुजः किमपि शुभाशुभं कर्म विदधाति तस्य शुभाशुभं फलमपि सः अवश्यमेव भुङ्क्ते। यथा[1]-

**यथा धेनुसहस्त्रेषु वत्सो विदन्ति मातरम्।**
**तथा पूर्वं कृतं कर्म कर्तारमनुगच्छति।।**

तस्यैव शुभाशुभफलस्य प्रतिपादनम्, अशुभफलस्य निराकरणञ्च ज्योतिषशास्त्रं सम्यक्तया करोति। यतोहि शुभाशुभफलविवेचनं ज्योतिषशास्त्रस्य मुख्य प्रयोजनम्। पूर्वजन्मनि कृतानां कर्मणां शुभाशुभफलबोधकं शास्त्रं ज्योतिषशास्त्रमिति आचार्यमिहिरेण लघुजातकाख्यग्रन्थस्य प्रयोजन - निरूपणप्रसङ्गे प्रतिपादितम्[2]-

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।**

यथा तमसि विद्यमानानि वस्तुनि दीपकस्य प्रकाशेन दृग्गोचराणि भवन्ति, तथैव पूर्वजन्मनि कृतानि कार्याणि शास्त्रमेतत् अर्कादिग्रहाणां शुभाशुभस्थितिवशात् प्रत्यक्षरूपेण प्रकटीकरोति। अतः पूर्वजन्मस्थितिवशादेव सुखं-दुःखं, दारिद्रयमैश्वर्यं,आयुषः निर्धारणं सञ्जायते। तत्र कालविधानशास्त्रे आयुषः निर्धारणं स्पष्टतया प्रतिपादितम्। यथा आयुषः दायः नाम आनयनं आयुर्दायः इत्युच्यते। अरिष्टयोगरहितानामेव जनिमताम् आयुर्दायविचारः कर्तव्यः। समुपस्थिते च आयुर्विचारे प्राक्तनैः पराशराद्यैः यदुक्तं तदत्रोच्यते[3]-

**निसर्गपैण्ड्यांशकरश्मिचक्रनक्षत्रदायाष्टकवर्गजानि।**
**पराशराद्यैः कथितानि यानि संगृह्य तानि क्रमशः प्रवच्मि ।।**

परशराद्यैर्मुनिभिः कथितानि यानि निसर्ग- पिण्डांशक- रश्मि- चक्र-नक्षत्रदायाष्टकवर्गजानि अष्टावायूंषि उक्तानि तानि संगृह्य क्रमशोऽहं प्रवच्मि ।

**निसर्गायुषो वर्षसङ्ख्याः[4]-**

1. चाणक्यनीतिदर्पणम्-13/15
2. लघुजातकम्-1/2
3. जातकपारिजातः अ-5,श्लो-1
4. जातकपारिजातः अ-5,श्लो-2

**नखाः शशी द्वौ नवकं धृतिश्च कृतिः खबाणा रविपूर्वकाराणां ।**

**इमा निरुक्ताः क्रमशो ग्रहाणां नैसर्गिके ह्यायुषि वर्षसंख्याः ।।**

अथ नैसर्गिके सूर्यादीनां नखाद्या वर्षसंख्या बोद्धव्याः। सूर्यस्य-२० वर्षाणि, चन्द्रस्य-१ वर्षाणि, भौमस्य-२ वर्षाणि, बुधस्य-९ वर्षाणि, गुरोः-१८ वर्षाणि, शुक्रस्य-२० वर्षाणि, शनेः- ५० वर्षाणि सन्ति। उक्तञ्च सारावल्याम्[5] –

**विंशतिरेकं द्वितीयं नव धृतिरिह विंशतिश्च पञ्चाशत्।**

**वर्षाणामपि सङ्ख्याः सूर्यादीनां निसर्गभवाः ।।**

अथ पिण्डायुषो वर्षसंख्याः[6]-

**नवेन्दवो बाणयमाः शरक्ष्मा दिवाकराः पञ्चभुवः कुपक्षाः।**

**नखाश्च भास्वत्प्रमुखग्रहणां पिण्डायुषोऽब्दा निजतुङ्गगानाम् ।।**

निजतुङ्गगानां स्वकीयोच्चगतानां भास्वत्प्रमुखग्रहाणां सूर्यादीनां नवेन्द्वादयः पिण्डायुषोऽब्दाः पठितास्ते चाङ्केन द्योत्यन्ते। तद्यथा- सूर्यस्य-१९ वर्षाणि, चन्द्रस्य-२५ वर्षाणि, भौमस्य-१५ वर्षाणि, बुधस्य-१२ वर्षाणि, गुरोः-१५ वर्षाणि, शुक्रस्य-२१ वर्षाणि, शनेः-२० वर्षाणि, तथैव सारावल्यां[7]-

**एकोनविंशतिर्भानोः शशिनः पञ्चविंशतिः।**

**तिथयः क्षितिपुत्रस्य द्वादशैव बुधस्य तु।।**

**गुरोः पञ्चदशाब्दानि शुक्रस्याप्येकविंशतिः।**

**विंशती रविपुत्रस्य पिण्डायुः स्वोच्चसंस्थिते ।।**

अथ पिण्डायुषः स्पष्टीकरणविधिः निगद्यते[8]-

**निजोच्चशुद्धः खचरो विशोध्यो भमण्डलात् षड्भवनोनकश्चेत् ।**

**यथास्थितः षड्भवनाधिकश्चेल्लिप्तीकृतः सङ्गुणितो निजाब्दैः।।**

**तत्र खाभ्ररसचन्द्रलोचनैरुद्धृते सति यदाप्यते फलम्।**

**वर्षमासदिननाडिकादिकं तद्धि पिण्डभवमायुरुच्यते।।**

**स्वोच्चोनस्फुटखेचरं यदि रसादल्पं भचक्रोद्धृतम्।**

**लिप्तीकृत्य निजायुरब्दगुणितं तच्चक्रलिप्ताहृतम्।**

**लब्धं वासरनायकादिखचरैर्दत्तायुरब्दादिकं**

**नीचार्द्धक्रमशो वदन्ति मुनयः पैण्ड्ये च नैसर्गिके ।।**

अथाधुना आयुषः स्पष्टीकरणमुच्यते। अर्थात् तत्काले ग्रहस्य कियन्मितमायुः स्यात्तदानयनं क्रियते। निजोच्चशुद्धः आत्मीयोच्चेन रहितो ग्रहः षड्भवनोनकः राशिषट्कादल्पश्चेद्भवेत्तदा भमण्डलात्

5. सारावली अ-39,श्लो-20

6. जातकपारिजातः अ-5,श्लो-3

7. सारावली अ-39,श्लो-13-14

8. जातकपारिजातः अ-5,श्लो-4-6

द्वादशराशेर्विशोध्यस्तथोच्चोनो ग्रहः षड्भवनाधिकश्चेत्तदा यथास्थितोऽविकृत एव स्थाप्यः। एतदुक्तं भवति। यस्य ग्रहस्यायुः साध्यते तस्माद् ग्रहादुच्चं विशोधयेत् । यदि ग्रहादुच्चमेवाधिकं भवेत्तदा ग्रहे द्वादश राशीन् संयोज्य तस्मादुच्चं विशोधयेत्। एवमुच्चोनो ग्रहो यदि षड्भादूनं भवेत्तदा तदुच्चोनं ग्रहं द्वादशराशौ विशोधयेत्। षड्भादधिके उच्चोने ग्रहे तं यथास्थितमेव संस्थापयेदिति। ततस्तथाभूतो ग्रहो लिप्तीकृतः= कलाकृतस्तथा निजाब्दैः= स्वायुः प्रमाणवर्षैः सङ्गुणितः कार्यः। तत्र=तस्मिन् गुणनफले खाभ्ररसचन्द्रलोचनैः २१६०० उद्धृते= भक्ते सति यत्फलं वर्षमासदिननाडीकादिकमवाप्यते =लभ्यते, तद्धि= तदेव पिण्डभवं= पिण्डाज्जायमानं स्पष्टायुरुच्यते। उच्चस्थाने विद्यमाने ग्रहे तस्य पठिताङ्कतुल्यं पूर्णमायुर्भवति ।

इष्टस्थानीयमायुः=आ- आ xयं = 12xआ-आx=पं =आ( 12-अं_ ) अतः उपपद्यते उच्चोनो
ग्रहो २x६ १२ १२
यदि षड्भवनोनस्तदा भमण्डलाद्विशोधयः इति।।

**अथ अंशकायुः**

**स्वमतेन किलाह जीवशर्मा ग्रहदायं परमायुषः स्वरांशम्।**
**ग्रहभुक्तनवांशराशितुल्यं बहुसाम्यं समुपैति सत्यवाक्यम्।।**
**सत्योक्ते ग्रहमिष्टं लिप्तीकृत्वा शतद्वयेनाप्तम् ।**
**मण्डलभागविशुद्धेऽब्दाः स्युः शेषात्तु मासाद्याः।।**
**स्वतुङ्गवक्रोपगतैस्त्रिसंगुणो द्विरुत्तमस्वांशकभत्रिभागगैः।**
**इयान् विशेषस्तु भदत्तभाषिते समानमन्यत् प्रथमेऽप्युदीरितम्।।**
**किन्त्वत्र भांशप्रतिमं ददाति वीर्यान्विता राशिसमं च होरा।**
**क्रूरोदये योऽपचयः स नात्र कार्यं च नाब्दैः प्रथमोपदिष्टैः।।**
**सत्योपदेशो वरमत्र किन्तु कुर्वन्त्ययोग्यं बहुवर्गणाभिः।**
**आचार्यकत्वञ्च बहुघ्नातायामेकं तु यद् भूरि तदेव कार्यम्**[9] ।।

अथाधुना जीवशर्म- सत्याचार्ययोर्मतेनायुषः प्रमाणम् उच्यते। तत्र सत्याचार्यस्यांशायुरेव अभिमतम। अंशायुर्नामांशवशात्साधितमायुः। अस्मिन्नायुषि राशेः प्रयोजनं न भवति। परमायुषः= पञ्चदिनोत्तरस्य विंशाधिकशताब्दस्य स्वरांशं= सप्तमाशं १७/१/२२/८/३४/ वर्षादि ग्रहदायं= प्रत्येकस्य ग्रहस्य तुल्यमायुः जीवशर्मा नामाचार्यः स्वमत्तेन किलाह। परमुच्चस्थानामिति। नीचस्थानां तथैवार्ध्दं क्षीयते। अथ सत्याचार्यमतमुच्यते। ग्रहभुक्तनवांशराशितुल्यं यत्र तत्र राशौ ग्रहो यस्मिन्नवांशे भवेत्तन्नवांशराशिसङ्ख्यातुल्यानि वर्षाणि तस्य ग्रहस्यायुर्भवति। यथा कुत्रापि राशौ ग्रहो सिंहनवांशे तदा ५ वर्षाणि, मकरनवांशे १० वर्षाण्येवं सर्वत्र ज्ञेयम्। एतत् सत्याचार्यस्य वाक्यं बहुसाम्यं= बहुनामाचार्याणां

9. जातकपारिजातः अ-5, श्लो-17-21

वाक्येन सादृश्यमुपैति। यथा वचनम्- "आयूंषि राश्यंकाचारयोगात्[10] " इति यवनेश्वरः।

अथ सत्यमते लग्नायुषि विशेषमाह- किन्त्वत्रेति। अत्र सत्यमतायुर्द्याये लग्नं भांशप्रतिमं= भस्य राशेर्नवांशो भवति तद्राशिसंख्यातुल्यवर्षमिति। यथा मेषनवांशे वर्षमेकं, वृषनवांशे वर्षद्वयमेवं यथा क्रमेण मीननवांशे द्वादश वर्षाणि। मासाद्यनुपाततो यथा सत्योक्ते ग्रहमिष्टमित्यादिना ग्रहायुरानीयते तथा कर्त्तव्यम् । यदि होरा= लग्नं वीर्यान्विता=होरा स्वामिगुरुज्ञवीक्षितयुता' इति लक्षणलक्षिता भवेत् तदा राशिसमं= लग्नेन यावन्तो राशयो मेषादयो भुक्तास्तावन्ति वर्षाण्यायुर्दायं ददाति। तत्रापि मासाद्यं भुक्तांशवसाज्ज्ञेयम्।

**अथ रश्मिजायुः**

**दशगोशरबाणाद्रिवसुसायकरश्मयः।**
**दिननायकमुख्येषु निजतुङ्गगतेषु च।।**
**स्वोच्चोनमिष्टखचरं यदि षड्गृहोनं चक्राद्विशोध्य कृतलिप्तकमंशुमानैः ।।**
**हत्वाभचक्रकलिकाहृतमब्दपूर्वं रव्यादिरश्मिजानितायुरिति ब्रुवन्ति [11] ।।**

इदानीं ग्रहाणां रश्म्यानयनमुच्यते। निजतुङ्गगतेषु दिननायकमुख्येषु= सूर्यादिग्रहेषु दशादिसङ्ख्यका रश्मयः सन्ति । सूर्यस्य दश । चन्द्रस्य गावः=नव। भौमस्य शरः पञ्च। बुधस्य बाणाः=पञ्च। गुरोरद्रयः=सप्त। शुक्रस्य वसवः=अष्टौ, शनेः सायकाः=पञ्चरश्मयो ज्ञेयाः। नीचगता ग्रहा रश्मिरहिताः, नीचाद् भ्रष्टा ग्रहा अभिमुखरश्मयः, उच्चाद भ्रष्टाः पराङ्मुखा उच्यन्ते।

**अथोच्चनीचयोर्मध्ये ग्रहस्य रश्म्यानयनम्-** इष्टं खचरं स्वकीयोच्चेनोनं कृत्वा यदि षड्गृहोनोऽर्थाद्राशिषट्कादूनो भवेत्तदा तं चक्राद् (१२) विशोध्य कृतलिप्तकं=कलीकृतं तं स्वकीयैरंशुमानैरुच्चपठितरश्मिप्रमाणैः हत्वा=सङ्गुण्य भचक्रकलिकाभिः २१६०० हृतं = भक्तं लब्धमब्दपूर्वं=वर्षाद्यं रव्यादीनां रश्मिजनितमायुर्भवति, इति विज्ञा ब्रुवन्ति। अत्र प्रकृतग्रन्थकृता पिण्डाद्यायुर्वदुच्चगते ग्रहे पूर्णां रश्मिंस्तथा नीचे तदर्धमुररीकृत्य नीचोच्चान्ते षड्राशिमिते रश्मेरर्द्धमवशिष्यते तदेष्टग्रहोच्चान्तरे किमित्यनुपातागतं फलं पठितपूर्णरश्मिमानाच्छशोध्येष्टरश्मिसाधनं कृतम्।

र-र xअं = र x१२-र xअं =र (१२-अं) = इ. र
२ प १२ १२

**अथ चक्रायुः**

**रव्यादिसप्तग्रहतारकांशभुक्तावशेषाब्दसमूहमायुः।**
**सव्यापसव्योपगवाक्यजं वा वदन्ति चक्रायुरिनादिकानाम्[12] ।।**

अधुना चक्रायुरुच्यते- इह दिग्दर्शनमात्रमेव क्रियते। रव्यादि सप्तग्रहैस्तारकांशानां भुक्तावशेषा ये तैः साधितम् अब्दसमूहं वर्षसङ्कुलमायुः। अत्रेदमुक्तं भवति। सूर्यादिसप्तग्रहैः पृथक् पृथग् भुक्तस्य

10. जातकपारिजातस्य सुधाशालिनी व्याख्या

11. जातकपारिजात अ-5,श्लो-22-23

12. जातकपारिजातः अ-5,श्लो-26

नक्षत्रस्य ये भागा अवशिष्टास्तेभ्योऽनुपातेनोर्वरितान्यायुर्वर्षाणि समानीय तेषां योगश्चक्रायुर्भवति।

**तत्रानुपातः-** यदि नक्षत्रमानैः (भभोगैः) पठितमायुस्तदा भोग्यघटीभिः किमिति सर्वेषामायुः पृथक् पृथक् भवति। "भूतेकविंशद्भिरयो नवदिक् षोडशाब्धयः सूर्यादीनां क्रमादब्दाः" इति वद् सव्यापसव्योपगवाक्यजं (वक्ष्यमाणम्) इनादि[13]कानां ग्रहाणां चक्रायुरार्या वदन्ति।।

**अथ दशायुः**

**आदित्यमुख्यनवखेचरयोगताराभुक्तावशिष्टघटिकाजनिवत्सराद्यम्।**
**आयुर्दशाजनितमष्टकवर्गजातं यत्प्रोक्तमेव सकलं प्रवदन्ति तज्ज्ञाः[13] ।।**

आदित्यमुख्यनवखेचराणां= सूर्यादिनवग्रहाणां योगताराभुक्तावशिष्टघटिकाजनिवत्सराद्यम् दशायुषः प्रमाणं भवति। सूर्यादयोः नवग्रहाः पृथक् पृथक् येषु नक्षत्रेषु भवेयुस्तेषां भोग्यघटीभ्योऽनुपात-वशाज्जायमानं वर्षाद्यं यत्तत्तेषां दशाजनितमायुः (दशायुः) स्यात्। अथ अष्टकवर्गजातं यदायुः प्रोक्तं तत्सकलमेवायुः तज्ज्ञा आयुर्विषयज्ञाः प्रवदन्ति। अष्टकवर्गायुषि भुक्तभोग्यानयनं न कर्तव्यमिति भावः। अथ पराशराद्यैर्दशायुरेव नक्षत्रायुरपरनाम्ना व्यवह्रियते। तत्र कृतिकादिनवनक्षत्राणां प्रथमावृत्तौ, उत्तरफल्गुनी प्रभृतिनवनक्षत्राणां द्वितीये पर्यये, उत्तराषाढादिनक्षत्रनवकानां तृतीये पर्यये सूर्यादयो नव ग्रहाः स्वामिनो भवन्ति। कृतिकायां जन्म चेत् तदा सूर्यस्य दशा। रोहिण्यां चन्द्रस्य, इत्थमग्रे मंगल-राहु-गुरु-शनि-बुध-केतु-शुक्राणां क्रमेण दशा अवगन्तव्या। एतेषां मानानि विंशोत्तरीयदशानुसारं ज्ञेयम्।

**अथ आयुग्रहणम्-**

**विलग्नपे बलोपेते शुभदृष्टेंऽशसम्भवम्।**
**रवौ पिण्डोद्भवं कुर्याच्चन्द्रे नैसर्गिकं क्रमात्।।**
**उच्चङ्गते रवौ चान्ये बलिष्ठाः केन्द्रकोणगाः।**
**सर्वेषु स्वोच्चभावेषु बलिष्ठे शशहंसके ।।**
**एवं चिरायुषां योगेष्वन्येषु गणितेषु च ।**
**चान्द्रयोगेषु तुर्ये तु चन्द्रे च बलसंयुते।।**
**महापुरुषयोगेषु वीर्योत्कटयुतेषु च ।**
**राजयोगेषु सर्वेषु पैण्ड्यमाह पराशरः।।**
**लग्ने गुरौ कर्मगते च भानौ चन्द्रे सुखे वाऽस्तगते बलाढये।**
**केन्द्रत्रिकोणोपचये च साम्ये पापेष्वथापोक्लिमगेषु पैण्ड्यम्।।**
**पैण्ड्यं भानौ निसर्गप्रभवमुडुपतौ रश्मिजं सोमपुत्रे ।**
**भौमे भिन्नाष्टवर्गोदितमसुरगुरौ कालचक्रोद्भवायुः।।**
**देवाचार्ये दशायुर्दिनकरतनये सामुदायं बलिष्ठे।**
**लग्ने यद्यंशकायुर्भवति बलयुते चाहुराचार्यमुख्याः[14] ।।**

इदानीं पूर्वोक्तानामायुषां कतमं ग्राह्यमित्युच्यते- विलग्नप इति विलग्नप =जन्मलग्नपतौ

---

13. जातकपारिजातः अ-5, श्लो-27

14. जातकपारिजातः अ-5, श्लो-28-33

बलोपेते=स्ववर्गादिगते शुभग्रहावलोकिते चांशसम्भवमंशायुर्गाह्यम्। चन्द्रे बलवति नैसर्गिकमायुः कुर्यादिति क्रमाद् बलयुक्ते कथितग्रहे कथितमायुरेव ग्राह्यमिति। अथ चेदुक्तेषु लग्नसूर्यचन्द्रेषु कयोश्चित् द्वयोस्तुल्यं बलं स्यात्तदा तयोरायुषोर्योगार्ध्दमेवं यदि त्रयोऽपि तुल्यबलास्तदा त्रयाणामायुषां योगत्रिभागं ग्राह्यम्। यदि लग्नसूर्यशशिनस्त्रयोऽपि विबलास्तदा जीवशर्मकथितमायुः (ग्रहदायं परमायुषः स्वरांशमित्युक्तम्) ग्रहितव्यम्। तथोक्तं केशवाचार्येण[15]-

**"अंशायुश्च तनाविनेऽधिकबले पैण्डं, निसर्गं विधौ**
**स्याच्चेत्तुल्यबलं द्वयोर्युतिदलं तज्जायुषोश्चेत् त्रयः।।**
**त्र्यायूंषि त्रिबलैर्निहत्य च युतिर्वीर्यैक्यहृद्वा त्रिजा-**
**युर्युत्यास्त्रिलवोऽथ जैवमुदितं चेद्धीनवीर्यास्त्र्यः"** ।।

अस्मादन्येष्वपि (२९-३२) श्लोकोक्तयोगेषु पिण्डायुः ग्राह्यम्। अथ च जन्मकाले सूर्ये बलवति (सर्वोपेक्षया बलिनि) पिण्डायुः। चन्द्रे बलिनि निसर्गायुरेवं बुधे रश्मिजायुः। भौमेऽष्टकवर्गायुः (वक्ष्यमाणाम्) शुक्रे कालचक्रायुः। देवाचार्ये दशायुः। शनौ समुदायजम्। लग्ने बलवति अंशायुर्भवति इति प्राचीना आचार्यप्रवरा आहुः। अनेन प्रकारेण सम्यक् रीत्या आयुर्दायविचारः कर्तुं शक्यत इति मे मतिः।।

| प्रभवादिगौरवसम्वत्सरनामानि- | | | | |
|---|---|---|---|---|
| 1. प्रभवः | 13. प्रमाथी | 25. खरः | 37. शोभकृत् | 49. राक्षसः |
| 2. विभवः | 14. विक्रमः | 26. नन्दनः | 38. क्रोधी | 50. अनलः |
| 3. शुक्लः | 15. वृषः | 27. विजयः | 39. विश्वावसु | 51. पिङ्गलः |
| 4. प्रमोदः | 16. चित्रभानुः | 28. जयः | 40. पराभवः | 52. कालः |
| 5. प्रजापतिः | 17. सुभानुः | 29. मन्मथः | 41. प्लवंगः | 53. सिद्धार्थी |
| 6. अङ्गिरा | 18. तारणः | 30. दुर्मुखः | 42. कीलकः | 54. रौद्रः |
| 7. श्रीमुखः | 19. पार्थिवः | 31. हेमलम्बी | 43. सौम्यः | 55. दुर्मतिः |
| 8. भावः | 20. व्ययः | 32. विलम्बी | 44. साधारणः | 56. दुंदुभिः |
| 9. युवा | 21. सर्वजित् | 33. विकारी | 45. विरोधकृत् | 57.रुधिरोद्गारी |
| 10. धाता | 22. सर्वधारी | 34. शार्वरी | 46. परिधावी | 58. रक्ताक्षी |
| 11. ईश्वरः | 23. विरोधी | 35. प्लवः | 47. प्रमादी | 59. क्रोधनः |
| 12. बहुधान्यः | 24. विकृतिः | 36. शुभकृत् | 48. आनन्दः | 60. क्षयः |

15. जातकपारिजातस्य सुधाशालिनीव्याख्या तः

# वास्तुशास्त्रदृष्ट्या ग्रहमेलापकम्

**डॉ. विष्णुकुमारनिर्मलः**
सहायकाचार्यः ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
जयपुरपरिसरः

वास्तुराशास्त्रे शुभाशुभाज्ञानाय ग्रहमेलापकमप्यावश्यकम्। तत्र शुभमुहूर्त्तज्ञाने तु ग्रहचारस्यौचित्यं वर्तत एव। गृहायुष्यनिर्धारणेऽपि द्युचरचारस्य महन्महत्त्वं विद्यते। किञ्च गृहनिर्माणार्थं शुभग्रहैर्युक्ते, दृष्टे, स्थिरेऽथवा द्विस्वभावयुक्तलग्ने निर्माणकार्यं करणीयम् अथवा यस्माल्लग्नात् त्रिकोणे शुभग्रहाः सन्ति तथा च त्रिषडायस्थे (३ /६ /११) पापग्रहाः सन्ति, तस्मिन् लग्ने वास्तुकर्म शुभं भवति। अष्टमभावः यदि पापग्रहैर्युक्तो भवति तदा गृहेशस्य मृत्युर्भवति। यथोक्तं राजवल्लभवास्तुशास्त्रे-

**द्व्यंगे वा स्थिरभे च सौम्यसहिते लग्ने शुभैर्वीक्षिते**
**सौम्यैः वीर्यसमन्वितैश्चदशभिः निर्माणमाहुबुधैः।**
**तैर्वाधीर्नवकेन्द्रगैस्तु फलदं पापैस्त्रिषष्ठायगैः**
**क्रूरो ह्यष्टमसंस्थितोऽपि मरणं कर्त्तुविधत्तेतराम्।।१**

भवननिर्माणं स्थिरलग्ने वृषे, सिंहे, वृश्चिके, कुम्भे च शुभं भवति। मतान्तरेण द्विस्वभावलग्ने मिथुने, कन्यायां, धनुषि, मीने च गृहारम्भः शुभो भवति। चरलग्नं त्याज्यमस्ति। यथोक्तं विश्वकर्मप्रकाशे-

**श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेत्।**
**चरलग्ने चरांशे च सर्वथा परिवर्जयेत्।। २**

लग्नशुद्धौ रामदैवज्ञस्य मतमस्ति यत् रविभौमवासरौ रिक्तामावस्यासप्तम्यादितिथयः चरलग्नं बाणपञ्चकञ्च त्यक्त्वा अष्टमद्वादशभावे च शुद्धा भवन्ति। केन्द्रे शुभाः ग्रहास्स्युः। त्रिषडायस्थानं पापयुक्तं भवेत्। तथा चैतादृशे लग्ने गृहारम्भः शुभो भवति।

विशेषः-अत्र बाणपञ्चकस्य विपञ्चकस्यार्थोऽस्ति यत् पञ्चमराशौ सिंहराशेर्ग्रहणं करणीयम्। यथोक्तं मुहूर्त्तचिन्तामणौ-

**भौमार्करिक्तामाद्यूने चरोनाङ्गे विपञ्चके।**
**व्यष्टान्त्यस्थैः शुभैर्गेहारम्भस्त्रयायारिगैः खलैः।। ३**

बृहद्वास्तुमालानुसारेण-गृहारम्भः शनिवासरे, स्वातिनक्षत्रे, सिंहलग्ने, शुक्लपक्षे, सप्तम्यां तिथौ, श्रावणमासे, शुभयोगे चैतेषु सकारयुक्तेषु सप्तसु योगेषु वास्तुकर्मकरणेन गृहेशः पुत्रैर्धनैर्धान्यैर्हस्तिभिः सदैव परिपूर्णो भवति। यथोक्तं बृहद्वास्तुमालायाम्-

**शनौ स्वाति सिंहलग्नं शुक्लपक्षश्च सप्तमी।**
**शुभयोगः श्रावणश्च सकाराः सप्तकीर्तिताः।।**

**सप्तानां योगतो वास्तुः पुत्रवित्तप्रदः सदा।**
**गजश्च धनधान्यादि पुरोतिष्ठन्ति सर्वदा।।४**

गृहनिर्माणसमये यदि गुरुर्बलवानस्ति तदा सुखम्, भृगुजः, बलवान् भवेत्तदा धान्यम्, चन्द्रो बलवानस्ति तदा लक्ष्मीः, यदि सूर्यो बलवनस्ति तदा सुखकारकः भवति। किन्तु यद्येते चत्वारो ग्रहाः नीचाः अथवा अस्तराशिस्थिताः सन्ति तदा बलहीना भवन्ति। गृहारम्भसमये यदि बृहस्पतिः लग्ने भवेत्, बुधो यदि सप्तमभावे, सूर्यः यदि षष्ठे, शुक्रो यदि चतुर्थे, शनिस्तृतीये भावे स्थितो भवेत्तदा तद्गृहं शतवर्षपर्यन्तं स्थिरं भवति। यथोक्तं वास्तुराजवल्लभे-

**जीवः सौख्यमुपाकरोति भृगुजो धान्यं श्रियं चन्द्रमाः**
**सूर्यो वेश्मपतिश्चतुष्टयमिदं नीचास्तगं दुर्बलम्।।**
**जीवे लग्नमुपागते शशिसुते यामित्रगेऽर्के रिपौ**
**शुक्रेऽब्धौ सहजे शनौ च शरदां गेहं शतं तिष्ठति।।५**

अस्मिन्नेव सन्दर्भे बृहद्वास्तुमालाकारेण अग्रे कथितं यच्छुक्रो लग्ने, सूर्यः एकादशभावे, बुधो दशमभावे, जीवो केन्द्रे स्थितो भवेत्तदा तद् गृहं शतवर्षपर्यन्तं जीवितं तिष्ठति। शुक्रो यदि लग्नस्थो भवेत्, तृतीयभावे सूर्यो भवेत्, पंचमभावे गुरुर्भवेत्, एवञ्च षष्ठभावे भौमो भवेत्तदा तद् गृहं शतवर्षपर्यन्तं जीवितं तिष्ठति। यथोक्तं तत्रैव-

**भृगुसुत इह लग्ने ह्यायगेऽर्के च खे ज्ञे।**
**गृहमपि शतमब्दान्स्थायि केन्द्रे सुरेज्ये।।**
**द्विगुणमपि च शुक्रे मूर्तिगे विक्रमेऽर्के।**
**सुरगुरु सुतसंस्थे भूमिपुत्रे च षष्ठे।।६**

गृहारम्भसमये यदि सूर्यो निर्बलो भवेत्, गृहेशश्चन्द्रोऽपि निर्बलोऽस्तो वा भवेत् गृहस्वामिनः शुक्रो निर्बलो नीचगतोऽस्तो वा भवेत्, धनुराशिस्थो गुरुर्यदि निर्बलो नीचाऽस्तंगतो वा भवेत्तदा सौख्यनाशो भवति। यथोक्तं वास्तुरत्नाकरे-

**रवौ गृहस्थे गृहिणी शशाङ्के धनं सिते देवगुरौ च सौख्यम्।**
**विनाशमायान्ति बलेन हीने नीचस्थिते चास्तमुपागते च।।७**

गृहारम्भकालिके लग्ने यदि शुक्रः स्वोच्चे मीनराश्युपरिस्थितो भवेत्तथा च यदि देवपूज्यो गुरुः स्वोच्चे कर्के चतुर्थभावे भवेदथवा शनिः स्वोच्चराश्युपरि तुलायामेकादशे भावे स्थितो भवेत्तदा गृहकर्तुः कुलवृद्धिकर्तारो भवन्ति। यथोक्तं वास्तुरत्नाकरे-

**स्वोच्चवर्तिनि भृगौ विलग्नगे देवमन्त्रिणि रसातलेऽथवा।**
**स्वोच्चगे रविसुतेऽथवायगे स्यात् स्थितिः खलु चिरं सह श्रिया।।८**

**ग्रहमेलापके अशुभयोगाः**

गृहारम्भसमये त्रयो ग्रहाः शत्रुक्षेत्रिणो, नीचराश्युपरिगताः सन्ति वा पराजिता भवेयुरेतादृश्यां स्थितौ

गृहारम्भकरणाल्लक्ष्मीनाशो भवति। यदि च सप्तमभावे दशमभावे च यदि कश्चिद् ग्रहः शत्रुवंशोभूत्वा स्थितो भवेत्तदैकस्मिन्नेव वर्षे तद्‌गृहमपरहस्तगतेषु गच्छति। यथोक्तं बृहद्वास्तुमालायाम्-

**शत्रुक्षेत्रगतः खेटैः नीचस्थैर्वा पराजितैः।**
**प्रारम्भे यस्य भवने लक्ष्मीस्तस्य विनश्यति।।**
**द्यूनाम्बरे यदैकोऽपि परांशस्थो ग्रहो गृहम्।**
**अब्दान्तः परहस्तस्थं कुर्याच्चेद्वर्णपोऽबलः।।९**

गृहारम्भदिने यदि पुष्यनक्षत्रमुत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदम्, मृगशिरा, श्रवणाश्लेषा, पूर्वाषाढादि नक्षत्रणि यदि गुरुयुक्तानि भवेयुरेवं च तस्मिन् दिने गुरुवासरो भवेत्तदा अस्मिन् योगे निर्मितं गृहं पुत्रदायकम्, राज्यदायकं च भवति। यथोक्तं बृहद्वास्तुमालायाम्-

**पुष्यध्रुवेन्दुहरिसर्प जलैस्सजीवैस्तद्वासरेण च कृतं सुतराज्यदं स्यात्।**
**द्वीशाश्वितक्षवसुपाशिशिवैः सशुक्रे वारे सितस्य च गृहं धनधान्यदं स्यात्।।१०**

गृहारम्भसमये हस्तः, पुष्यः, रेवती, मघा, पूर्वाषाढा, मूलमेतेषु, नक्षत्रेषु यदि कस्मिन्नपि नक्षत्रे भौमोऽस्ति तथा च तस्मिन्नेव नक्षत्रे भौमवासरो अस्ति चेत् गृहारम्भः पुत्रपीडाऽग्निभयदायको भवति। रोहिण्यश्विन्युत्तराफाल्गुनिचित्रहस्तैस्तेषु कस्मिन्नपि नक्षत्रे बुधो स्थितो चेत् तदेव नक्षत्रं यदि बुधवासरे पतितं भवेत्तदा गृहारम्भात् सुखं धनप्राप्तिश्च भवति। यथोक्तं वास्तुरत्नाकरे-

**सारैः करेज्यान्त्यमघाम्बुमूलैः कौजेऽह्नि वेश्माग्नि सुतार्तिदं स्यात्।**
**राज्ञैः कदास्त्रार्यमतक्षयहस्तैः ज्ञस्यैववारे सुखपुत्रदं स्यात्।।११**

शनिवासरे पूर्वा-उत्तराभाद्रपदं ज्येष्ठाऽनुराधा, स्वातिनक्षत्रेषु यदि शनिः स्थितो भवेत्तदा तस्मिन्न शनिवासरे गृहारम्भः तस्मिन् गृहे बहूनामात्मानां (भूतप्रेतादिनाम्) निवासो भवति। यथोक्तं बृहद्वास्तुमालायाम्-

**अजैकपादहिर्बुधन्यशक्रमित्रनिलान्तकैः।**
**स मन्दैमन्दवारेस्याद्रक्षोभूतयुतं गृहम्।। १२**

गृहस्यारम्भसमये गुरुशुक्रबुधचन्द्राश्च नीचा अथवा शत्रुराश्युपरि यदि स्थिताः स्युस्तदा गृहकर्तुरस्तित्वं तस्मिन् गृहे नैव भवति।

**नीचे शत्रुगते जीवे शुक्रे वा यदि वा बुधे।**
**शशाङ्के वा कृतं गेहमतिनिःस्वत्वमाप्नुयात्।।१३**

गृहनिर्माणसमये सप्तशलाकाचक्रेणाऽपि शुभाऽशुभयोर्ज्ञानं भवति। पिण्डगतनक्षत्रं चन्द्रनक्षत्रं वा यदि सप्तशलाकाचक्रे दक्षिवामभागे वा स्थितो भवेत् तदा शुभदो भवति। किन्तु सन्मुखे पृष्ठे चाऽशुभो भवति। लग्नसप्तशलाकाचक्रस्य निर्माणं सरलतया कर्त्तुं शक्यते। सप्तरेखाः पूर्वाऽपराः सप्तरेखाः दक्षिणोत्तराः परस्परं मिलिता आकृष्यचतुर्दिक्षु संस्थाप्य चैशानकोणे कृतिकादिनक्षत्रणि चित्रनुसारेण स्थापनेन सप्तशलाकाचक्रस्य निर्माणं भवति। अस्मिन् वास्तुनक्षत्रं चन्द्रनक्षत्रं च (गृहारम्भ नक्षत्र)

यद्यग्रे पृष्ठे वा पतेदर्थादेकं पूर्वस्थनक्षत्रेषु द्वितीयं पश्चिमनक्षत्रेषु भवेत्तदा गृहारम्भोऽशुभो भवति। यदि च दक्षिणोत्तरस्थेषु नक्षत्रेषु पतेत्तदा गृहारम्भः शुभो भवति।

सप्तशलाकाचक्रानुसारेण कृतिकादि सप्तनक्षत्रणि (७ -७ साभिजित्) क्रमेण पूर्वादिदिक्षु स्थापितव्यानि। अस्मिन् चक्रे यदि वास्तुनक्षत्रं चन्द्रनक्षत्रं च सन्मुखे पूर्वापरदिक्षु पतेत्तदा गृहारम्भोऽशुभो भवति। यथोक्तं वास्तुरत्नावल्याम्-

**चक्रे सप्तशलाकाख्ये कृत्तिकादीनि विन्यसेत्।**
**ऋक्षं चन्द्रस्य वास्तोश्च पुरः पृष्ठे च नो शुभम्।।१४**

गृहारम्भसमये यदि शनिभौमौ लाभभावे, बृहस्पतिश्चतुर्थभावे, उदितः चन्द्रः दशमभावे भवेत्तदा तस्य गृहस्याशीतिवर्षस्थितिः भवति। यथोक्तं राजवल्लभवास्तुशास्त्रे-

**प्रारम्भकाले यदि मन्दभौमौ लाभाश्रितौ देवगुरुश्चतुर्थे।**
**चन्द्रोदये चेच्छरदामशीतिः स्थितिर्नियुक्ता भवनस्य सद्भिः।।१५**

गृहनिर्माणकाले कर्कलग्ने यदि चन्द्रस्तथा बृहस्पतिः केन्द्रे स्थितो भवेत्, अन्ये च ग्रहाः स्वाच्चे अथवा मित्रनवांशे स्थिताः भवेयुरेतादृशसमये गृहारम्भात् भवनपतिगृहं लक्ष्म्या पूरितं भवति। यदि चान्ये ग्रहाः नीचांशे स्थिताः सन्ति तदा निर्धनता भवति। तथा च यदि एकोऽपि ग्रहः शुत्रुनवांशेऽथवा शत्रुराशियुतो भूत्वा दशमभावे स्थितो भवेत् तदैकस्मिन्नेव वर्षे तद् गृहं द्वितीय-हस्ते गतं भवति। यथोक्तं तत्रैव-

**लग्नं कर्कटमाश्रितो हिमकरे देवार्चिते केन्द्रगे**
**लक्ष्मीवद्भवनं खगैश्च सुहृदः स्वांशोच्चभागैस्तथा।**
**नीचांशैरपि निर्धनं तु खचरो ह्येकः परांशस्थितः**
**यामित्रे दशमेऽब्दमध्यत इदं गेहं परैर्नीयते।।१६**

एवं रीत्या वास्तुशास्त्रीय विविधेषु ग्रन्थेषु वास्तुशास्त्रदृष्ट्या ग्रहमेलापकं विविक्तमस्ति। अतः शास्त्ररीत्या तत्परीक्षणं मेलापकक्रमे नितान्तमावश्यकमिति दिक्।

**वास्तुशास्त्रदृष्ट्या मेलापकस्य वैज्ञानिकत्वविवेचनम्**

वास्तुशास्त्रं मेलापकत्वेन मानवस्य पञ्चतत्त्वैस्सह संतुलनं ज्ञायते। वास्तुशास्त्रे विद्यते किञ्चन् वैज्ञानिकत्वं, यतो हि शास्त्रमिदं मानवजीवनं तत्त्वानुरोधेन प्रभावयति, यथा जानीमो वयं यत् यानि प्रमुखानि पञ्चतत्त्वानि भूजलाग्न्याकाशसलिलादीनि सन्ति तेषां गुणानुरोधेनैव विचारो विधीयते। वास्तुशास्त्रे प्रतिपदे वैज्ञानिकत्वं वरीवर्ति, किं बहुना नैकानां गणितीयानां वैज्ञानिकविषयाणाञ्च बीजान्यत्र प्राप्यन्ते। वास्तुशास्त्रस्य इदं वैज्ञानिकत्वं वैशिष्ट्यञ्चास्ति यदिदं शास्त्रं पृथिव्यादि पञ्चमहाभूतैः निर्मितायाः पृथिव्याः मानवजीवनस्य तैरेव महाभूतैः निर्मितेन भवने वातावरणेन सह सामञ्जस्य स्थापना एव सर्वोच्च प्राथमिकता वर्तते। दर्शनस्य विज्ञानस्य कलायाः शिल्पस्य च महत्त्वमुपयोगिताञ्च सर्वाणि शास्त्रणि स्वीकुर्वन्ति यद् सर्वेऽपि प्राणिनः पञ्चमहाभूतैः विनिर्मिताः सन्ति। तेन मानवमात्रस्य शरीरं मनः जीवानां च एतेषां महाभूतानां सन्तुलनेन स्वतः सक्रियं भवति। वास्तुमण्डलोऽपरि विभिन्नानां अधिपतिदेवानां

प्रकल्पनेन साकं सूर्यादि ग्रहाणामपि कल्पना क्रियते। आधारस्वरूपं भवति वास्तुमण्डलम्। तदुपरि विश्वनियन्त्रितदेवानां निवासः भवति। कस्मिन् क्षेत्रे, नक्षत्रे, मासे, तिथौ च भवनकार्यारम्भो विधेयः? निवेश्यवस्तुनः दिक् सामुख्यादिकं कीदृक् भवेत्? शिलान्यासाय का वेला शुभा भवति? एतेषां प्रश्नानां समाधानं ज्योतिषशास्त्रे मिलति। एतत् सर्वं ज्योतिषम्। अत एव तु वास्तुशास्त्रं ज्योतिषशास्त्रस्याङ्गभूतम्। जनोपयोगिविषयत्वात् देशकालपरिस्थितिषु वास्तुग्रन्थानां स्वतन्त्ररूपेण महर्षिभिः प्रतिपादनं कृतम्। यस्य विस्तृतशृंखला विद्यते। सा शृंखला अस्य शास्त्रस्य महिमां प्रदर्शयति। शास्त्रेऽस्मिन् सर्वेषां वर्णानां निवासाय आवासीय व्यवस्था वर्णिताऽस्ति। मनुष्याणां सहचराः पशवः वनस्पतयश्च सदैव भवन्ति। तैर्विना मानवजीवनं असम्भवम्। प्राचीनकालादारभ्य धेनवः, वृषभाः, अश्वाः, गजाः इत्यादः पशवो मनुष्याणां कृते उपयोगिनः सन्ति। अनेन प्रकारेण यस्मिन् भूप्रदेशे वनस्पतीनां विकासो भवेत् तत्र वास्तुशास्त्रमाधारीकृत्य गृहनिर्माणं कर्त्तव्यम्। वास्तुशास्त्रे भूचयनादारभ्य वास्तुपुरुषनिर्धारणपुरस्सरं गृहनिर्माणप्रक्रियामनुश्रित्य गृहप्रवेशादीनां सन्निवेशे च मेलापकस्य वैज्ञानिकत्वं वर्तत एव। अत्र नास्ति कश्चन् सन्देहावसरः।

सन्दर्भग्रन्थाः-


१ - राजवल्लभवास्तुशास्त्रम् ११ /१७

२ - विश्वकर्मप्रकाशः ३ /१८

३ - मुहूर्त्तचिन्तामणिः १२ /१८

४ - वृहद्वास्तुमाला पृ- ७६ /८० -८१

५ - राजवल्लभवास्तुशास्त्रम् ११ /१८

६ - तत्रैव ११ /१९

७ - वास्तुरत्नाकरः ९ /४६

८ - तत्रैव ९ /५४

९ - तत्रैव ९ /४९

१० - वृहद्वास्तुमाला पृ- ८१ /११०

११ - वास्तुरत्नाकरः ९ /७८

१२ - वृहद्वास्तुमाला पृ- ८३

१३ - तत्रैव पृ- ८१ /१०९

१४ - वास्तुरत्नावली ९६

१५ - राजवल्लभवास्तुशास्त्रम् ११ /२०

१६- तत्रैव


- 0 -

# अष्टकूटमेलापकविचारः

**डॉ. चन्द्रश्रीपाण्डेयः**
ज्योतिष-प्राध्यापिका(संविदा)
केन्द्रीयसंस्कृतविश्वविद्यालयः लखनऊ-परिसरः

मेलापकशब्दात् मेलनकर्मणा बोधो जायते। स्त्रीपुरुषयोः दाम्पत्यसम्बन्धस्य स्वरूपे शुभाशुभप्रभावप्रभृतयश्च कथमित्यस्य विचारः ज्योतिषशास्त्रं सङ्गोपाङ्गरूपेण करोति। विवाहात् पूर्वम् मेलापकविचारः करणीयः इति। वरकन्ययोः शारीरिकः, मानसिकश्च साम्यं यदि न भवेत् तदा विवाहान्तरं तयोर्मध्ये वैमनस्यं दाम्पत्यकष्टप्रदं स्यादिति भारतीयानां साधारविश्वासः। अतः विवाहात् पूर्व वरकन्ययोः पितरौ ज्योतिर्विदः साहाय्येन कुण्डल्योः मूलापकं कारयित्वा विवाह-सम्बन्ध-विषये विचारं कुरुत इति। परन्तु वर-वध्वोः कुण्डली शुद्धा तथा सूक्ष्मा च भवेत्। वर्तमानकाले विवाहे भारतीयां तत्रापि विशेषतया हिन्दूनामियं समस्या अधिका भवित। अतः विवाहसम्बन्धसमस्यानां समाधानार्थ विषयेऽस्मिन् शास्त्रीय-मानवीय-दृष्टिकोणेन तन्मूलभूतसमस्तपक्षानां ज्योतिषशास्त्र-दृष्ट्यान्वेषणं कर्तव्यमेव।

ज्योतिषशास्त्रस्य मेलापकविचारे लग्नचन्द्रयोः सर्वाधिकं प्रधान्यं वर्तते। लग्नं शरीरं चन्द्रः मनश्च वर्तते। प्रेमः मनसा भवति न केवलं शरीरेण। अतः जन्मराशेः प्राधान्यवशात् विवाहे मेलापक-विचारो अस्माभिः क्रियते। मेलापकविचारे नामराशिः तथा जन्मराशिः मध्ये जन्मराशेः ग्रहणं मुख्यतो भवति। यथा[1]-

**विवाहे सर्वमाङ्गल्ये यात्रायां ग्रहगोचरे। जन्मराशेः प्रधानत्वं नामराशिं न चिन्तयेत्॥**
**कुर्यात् षोडशकर्माणि जन्मराशौ बलन्विते। सर्वाण्यन्यानि कर्माणि नामराशौ बलन्विते॥**

जातकस्य नामराशिप्रमाणेन मेलापकादिकार्य भवति। सर्वाधिकं महत्त्वं जन्मराशेः अस्ति। जन्मराशितः जन्मराशे नामराशितः नामराशेः मेलापकः करणीयः। यदि जन्मराशिज्ञानं नास्ति चेत् तदा नामराशेः मेलापकविचारः क्रियते। यस्य नाम्नः आह्वानेन सुप्तः जातकः जागृतो भवति तेन नाम्ना मेलापकः भवेत्। यदि नाम्ना मेलापकविचारः क्रियते तदा वरकन्यायोः नामराशितः मेलापकविचारः भवेत्।

## अष्टकूटविचार-

तथा सह लग्नं शरीरं समस्तेन्द्रियाणामाधारभूतं, भोगोपभोगेन धर्म-अर्थ-काम-मोक्षाणां साधकं मनः (चन्द्रः) शरीरे मनः सर्वाधिक महत्त्वपूर्णं अस्ति। मनः समस्त इच्छायाः तथा कामनायाः मूलम्। अतः लग्नचन्द्रयोः मेलापकसम्बन्धत्वात् शरीरे मनः प्राधान्यं वर्तते। अतः चन्द्रः मुख्य इति। कन्यावरयोः समस्तशुभाशुभप्रभावस्य वैज्ञानिकनिष्पत्तिनिर्धारणार्थ वर्णादिविचारः मेलापके महत्त्वपूर्णोऽस्ति। तद्यथा[2]-

1. विवाहवृन्दावनम्
2. मुहूर्तचिन्तमणिः विवाहप्रकरणे 21

**वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।**
**गणमैत्रं भकूटं च नाडी चैते गुणधिकाः॥**

उपर्युक्त विचारे भारतस्य उत्तर भागे (1) वर्णः (2) वश्यं (3) तारा (4) योनिः (5)गृहमैत्री (6) गणमैत्री (7) भकूटं (8) नाडी चेति अष्टौ भेदाः प्रमुखतया विचार्यन्ते। एतेषामेकोत्तरवृद्धया 36 गुणाः भविन्त।

वर्णानुरोधेनोपलभ्यते यत् ब्राह्मणानां कृते 10 भेदाः, क्षत्रियाणां कृते 8 भेदाः, वैश्यानां कृते 6 भेदाः तथा 3 मुद्रणां 4 भेदाः मेलापके गृह्यन्ते। न्यूनाधिकवर्गभेदग्रहणं निराधारो न भवति, अपितु शारीरिकः, मानसिकः, बौधिकस्तथा आध्यात्मिक विकासस्य च निष्पत्या चैतन्यस्य एवं सामाजिकस्तर भेदेन च सम्बद्धोऽस्तीति मेषादिद्वादशराशीनां गुणादि भेदेन- ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादि चतुर्णा वर्णानां मध्ये विभाजनं कृतम्।

ब्राह्मणः- कर्कट, वृश्चिक, मीनाः।
क्षत्रियः - मेष, सिंह, धनवः।
वैश्यः- वृष, कन्या, कैमेसः। मकरा
शूद्रः - मिथुन, तुला, कुम्भाः।

**द्विजा झषालिकर्कटास्ततो नृपो विशोऽऽघ्रिजाः।**
**वरस्य वर्णतोऽधिका वधून शस्यते बुधैः॥**[3]
**हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जलजाश्च भक्ष्याः।**
**सर्वेऽपि सिंहस्य वशे विनालिज्ञेयं नराणां व्यवहारतोऽन्यत्।।**[4]

वरकन्ययोमध्ये कः कस्य, कस्या वा वश्यो वा अनुगतो भवतीति वश्यकूटविचारात ज्ञायते। सामाजिकदृष्ट्या पत्नी पतिवशे भवेत् तमा पारिवारिकसुखं मिलति। अन्यथा पारिवारिकसुखं नष्टं भवित। मानवराशेः वश्याः सर्वे राश्ट्रायः, चतुष्टपदराशे वश्याः कीटराशयः। ज्योतिषग्रन्थेषु राशीनां द्विपदादिसंज्ञया विभज्य वश्यकूटमेलपस्य व्यवस्थां कृता।

द्विपदः - मेष, वृष, धनोरुत्तरार्द्धः, मकरस्य पूर्वार्द्ध च
कर्क, कुम्भ, मीन मकरस्योत्तरार्द्धः
जलचरः
वनचरः
सिंहः
कीटः - वृश्चिकः

उपर्युक्तराशीनां द्विपदादिसंज्ञाभेदेन वश्य-कूटस्य विचारः लोकाचारमनुसृत्य परस्परं सम्पर्क-विचारेण ग्रहह्मयोगेन फलाफलनिर्णयः क्रियते। चतुष्पदराशयः द्विपदादिराशीनां वश्यः कीटः जलचरः

3. मुहूर्तचिन्तमणिः विवाहप्रकरणे 22
4. मुहूर्तचिन्तमणिः विवाहप्रकरणे 23

राशयः द्विपदादि राशीनां वश्यः। कन्याराशिः वरराशे वश्यो भवति चेत् भारतीय व्यवस्थायां विवाहः शुभप्रदः। तद्यथा[5]-

**कन्यार्क्षाद्वारभं यावत कन्याभं वरभादपि।**
**गणयेन्नवहच्छेषे त्रीण्वद्रिभमसत्स्मृतम्॥**

कन्यानक्षत्रात् वरनक्षत्रं यावत् तथा वरस्य जन्मनक्षात् कन्यायाः जन्मनक्षत्रपर्यन्तं गणना करणीया। अनन्तरं 9 संख्याया विभाज्यते, तदा तारायाः संख्या आयाति। तत्र 3, 5, 7 संख्यका तारा अशुभतारा कथ्यते। तद्यथा[6]-

**अश्विन्यम्बुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः**
**सिंहो वस्वजपाद्भयोः समुदितो याम्यान्त्ययोः कुञ्जरः।**
**मेषो देवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः**
**स्याद्वैश्वाभिजितोस्तथैव नकुलश्चान्द्राब्जयोन्योरहिः।।**

**ज्येष्ठामैत्रभयोः कुरङ्ग उदितो मूलार्द्रयोः श्वा तथा**
**मार्जारोऽदितिसार्पयोरथ मघायोन्योस्तथैवोन्दुरुः।**
**व्याघ्रो द्वीशभचित्रयोरपि च गौरर्यम्णबुध्न्यर्क्षयो-**
**र्योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत्॥**

वरवध्वोः योनिसुखविचारः योनिकूटात् क्रियते। योनिकूटविचारः कन्यावरयोः कामसम्बन्धो अस्ति। सप्तविंशतिनक्षत्राणि अश्व-गज-सर्प-मेष-बिडाल-मूषिक-गो-महिष-व्याघ्र-मृग-श्वान-वानर-नकुल-सिंहादि-चतुर्दश-योनिषु विभक्तानि सन्ति। कन्या-वरयोः विरुद्धयोनिः अशुभप्रदः, समयोनिः शुभफलदायको भवति। यथा सिंह- गजौ, वानर-मेषौ, गो-व्याघ्रौ, नकुल-सर्पौ, अश्व-महिषौ, श्वान-मृगौ, मूषक-मार्जारौ परस्परं शत्रू भवतः। अतः अनयोर्मध्ये परस्परं विवाहः निषिद्धो भवति। तद्यथा[7]-

**मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ**
**सौम्यश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषत्।**
**शेषाश्चास्य समा कुजस्य सुहृदश्चन्द्रेज्यसूर्या बुधः**
**शत्रुः शुक्रशनी समौ च शशभूत्सूनोः सिताहस्करौ॥**

**मित्रे चास्य रिपुः शशी गुरुशनिक्ष्माजाः समा गीण्यते-**
**मित्राण्यर्कजेन्दवो बुधसितौ शत्रू समः सूर्यजः।**
**मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ**

---

5. मुहूर्तचिन्तमणिः विवाहप्रकरणे 24

6. मुहूर्तचिन्तमणिः विवाहप्रकरणे 25-26

7. मुहूर्तचिन्तमणिः विवाहप्रकरणे 27-28

**मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्यः समः॥**

मेलापके ग्रहमैत्रीविचारः महत्त्वपूर्णः अस्ति। कन्यावरयोः जन्मराश्याधिपती मध्ये परस्परं मैत्रीसम्बन्धः भवति तदा विवाहः शुभप्रदः। ग्रहमैत्रीविचारे राशीनामाधिपत्ययोर्मध्ये शत्रुमित्रस्य ज्ञानम् आवश्यकं भवति। कन्यावरयोः राश्याधिपत्योर्मध्ये मैत्री नास्ति तदा चन्द्रस्थितनवांशपत्योर्मध्ये मैत्री नास्ति तदा चन्द्रस्थितनवांशपत्योर्मध्ये सम्बन्धः द्रष्टव्यः, चन्द्रस्थितद्वयोः नवांशाधिपत्योर्मध्ये मैत्री भवेत्। राश्याधिपत्योर्मध्ये मैत्री नास्ति तदापि विवाहः शुभप्रदः भवति। लग्नाधिपतिग्रहस्य तथा लग्न-नवांशधिपतेः सम-शत्रु-मित्र विचारं कृत्वा मेलापकस्य विचारः कर्तव्यः।

मघा, अश्लेषा, धनिष्ठा, ज्येष्ठा, मूलं, शतभिषा, कृतिका, चित्रा, विशाखा च एतानि नवनक्षत्राणि 'राक्षस' गणे भवन्ति। पूर्वात्रयं, उत्तरात्रयं, रोहिणी, भरणी, आर्द्रा च नवनक्षत्राणि मनुष्य-गणे भवन्ति। अनुराधा, पुनर्वसुः, मृगशिरा, श्रवणा, रेवती, स्वाती, हस्तः, अश्विनी, पुष्यश्च नवनक्षत्राणि 'देव' गणे भवन्ति। सत्त्व-रज-तमो गुणेषु सप्तविंशतिः नक्षत्राणि देव-नर-राक्षश्चेति गणत्रयेषु विभक्तानि सन्ति। देवगणाः सात्विकाः, नरगणाः राजसिकाः तथा राक्षसगणाः तामसिकाः भवन्ति। देव-राक्षसयोर्मध्ये कलहः, नरः राक्षसयोः मध्ये नरस्य मृत्युस्तथा स्व-स्व गणे परस्परं चोत्तमोत्तमो भवति। कन्यावरयोः जन्मनक्षत्रानुसारेण समगणः अत्यन्तं शुभः भवति। देव-नरयोः मध्यमफलं, देव-राक्षसयोः शत्रुता अशुभफलदायको भवति। ग्रहमैत्री, राशिकूटः, योनि-शुद्धिः अथवा नाडीनां पार्थक्ये शुभत्वे गणदोषस्य विचारः नैव क्रियते। गणविचारेण वरकन्ययोः खाद्य-परिधानस्य रुचेश्च विचारोऽपि ज्ञायते। वरकन्ययोः उत्तमवैवाहिकजीवनयापने मानसिकस्तरः सम्यक् भवेत्। अतः वरकन्ययोः राशिगतशुभत्वेन पारस्परिक-मानसिक-सामञ्जस्य तथा आचारस्य विचारोऽपि क्रियते। प्रायः ज्योतिर्वित् राशिमेलापकोपरि अधिकं बलं ददाति। राजयोगः भवति चेत् अन्यान्यदोषग्रहणं नैव कर्तव्यम्। अतः भारतीयवैवाहिक-दाम्पत्यसुखस्य वास्तविकपक्षनिरूपणार्थम् अष्टविधमेलपाकविचारः क्रियते। मेलापकविचारेण वैवाहिक-दाम्पत्यं मानसिकं, शारीरिकं तथा पारिवारिकञ्च सुखं निश्चयेन प्राप्यते।

# ज्योतिषशास्त्रीय ग्रहस्पष्टीकरणपरम्परा

**डॉ. अश्विनीपाण्डेयः**
सहायकाचार्यः( अं.का. )
ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः

जिज्ञासा एव प्राणिनां विज्ञानात्मकस्योत्कर्षस्याऽऽधारशिलाः तथा तत्र जिज्ञासवो प्राणिनः सर्वदैव स्वं परितो घटितघटनां प्रति संवेदनशीलाः विद्यन्ते। एवं मानवानां खगोलीयघटनां प्रत्याकर्षणमपि नैसर्गिकमेवाऽस्ति। अतस्तत्राऽनुमानेन प्रतीयते यत् सभ्यताया आदिकालत एव मानवः स्वजिज्ञासावशेनैव ब्रह्माण्डगोलभूतानां घटनानां रहस्यं ज्ञातुं समुद्यतो विद्यते। तत्र यदि वेदस्य संहिताब्राह्मणारण्यकोपनिषत्-सूत्रादिशास्त्राणां निष्पक्षभावेनाऽध्ययनं क्रियेत तदेदं ज्ञानं भवति यत्प्रागैतिहासिककालेऽपि खगोलीय-घटनानां कीदृशं समुन्नतं ज्ञानमासीत्। तत्र तज्ज्ञानानां व्यावहारिकं स्वरूपं दृष्ट्वा प्रतीयते यत्- तत्कालेऽपि साधारणतया खगोलीयविषयोपरि सविस्तरं च विशदं बहुवार्त्तालापमपि कृतमासीत्। यतश्चेन्न, तथा भूतं तदाऽयनविन्द्वोर्विभिन्नेषु नक्षत्रेषु भूतस्य विचारो तत्र कथं दृश्यते। तथा मासर्तुतिथिनक्षत्राणां सम्बन्धः केन प्रकारेण ज्ञातुं शक्यते स्म। अतो ज्ञातुं शक्यते यदस्माकमृषयो मुनयश्चाऽऽकाशे खगोलीय-घटनानां निरीक्षणं कृत्वा तासां घटनानां शुभाशुभप्रभावस्यापि समन्वेषणं कृतवन्तः। तत्र ताः खगोलीयघटनाः कथं कदा कुत्र च भवन्ति इत्यस्याप्यनुसन्धानेन सुदीर्घकालं यावज्ज्ञानं कृतवन्तः। तैः तासां घटनानां सुचिन्तितः कालोऽपि निर्धारितः। एवमनुसन्धानानुभवेन चैतेषां विषयाणां सिद्धान्तं प्रतिपादितम्। येन दिनरात्रिः तिथिर्मासो पक्षर्तू अयने गोलौ वर्षश्चेति विषयविशेषाणां ज्ञानं समाभवत्। तथा तत्र च तेनैव ग्रहगणितस्यापि सम्यक् रूपेण ज्ञानं प्रकटीभूतम्। यस्य कालान्तरे सुविस्तृतः क्रमिक-विकासोऽपि सञ्जातः। एवमैतेषां विषयाणां क्रमागतेषु वैदिकसाहित्येषु समुपवर्णनं समुपलभ्यते।

एवमत्रेदमपि ज्ञायते यद् वैदिकसाहित्येषु यथा समुन्नतं ज्यौतिषशास्त्रीयं ज्ञानं दृश्यते तदेककालिकं न तथा भवितुं शक्यते। अत एवाऽऽधुनिकानामैतिह्यानुसारेण ज्यौतिषपदार्थस्य ज्ञानं वेदात्पूर्वमपि सिद्धयति। यतो वेदेषु ज्यौतिषपदार्थज्ञानस्योच्चतमा-भावना तथा च तस्य सम्प्रयोगश्च समुपलभ्यते। ततो निःसंशयं प्रतीयते यत् वेदाऽऽधुनिकानामैतिह्यानुसारेण ज्यौतिषपदार्थस्य ज्ञानं वेदात्पूर्वमपि सिद्धयति। यतो वेदेषु ज्यौतिष-पदार्थज्ञानस्योच्चभावना तथा तस्य सम्प्रयोगोऽपि समुपलभ्यते। ततो निःसंशयं प्रतीयते यत् वेदाऽऽविर्भावकालत एव ज्यौतिषपदार्थस्य ज्ञानस्योपकरणस्वरूपं पञ्चाङ्गमपि व्यवहारे सम्प्रसक्तमस्ति। तथा च तत्पञ्चाङ्गमेवाऽधुना भारतीयानां वैदिकसभ्यतासंस्कृत्ययोः प्रतीकं मन्यते। यत्रत्ये वेद एव वैदिक सभ्यतासंस्कृत्ययोः मूलाधारः सम्वर्त्तते। तेन बलेनैव च अस्माकं भारतदेशः विश्वमानचित्रे सर्वोच्चतमपदे स्थितो विद्यते। तत्र सर्वविदितमेव यत् वेद एव केवलं विश्वोत्पन्नानां प्राणिनां सर्वप्रकारेण कल्याणमार्गप्रदर्शको विद्यते। यस्मिन्नेव समग्रं ज्ञानं सन्निहितमस्तीति भारतीयैः

पाश्चात्यविद्वज्जनैरपि स्वीक्रियते। तस्य वेदस्यैव ज्ञानप्रवर्त्तकानि षडङ्गानि शिक्षा-कल्प-व्याकरण-ज्यौतिष-निरुक्त-छन्दःशास्त्राणि समभिमन्यन्ते। एवमेतेषु वेदस्य षडङ्गेषु एक एव कालविधायकशास्त्रं ज्यौतिषशास्त्रं विद्यते।

एवं ज्योतिषपदार्थ-ज्ञानस्य अनुप्रयोगस्य चादिस्रोतः वेद एव विद्यते। तत्र ऋग्वेदस्य प्रथममण्डलस्य **अस्यवामीय**-सूक्तमस्ति। तस्य सूक्तस्य मन्त्रद्रष्टाऋषिः दीर्घतमा विद्यते। तस्य सूक्तस्याऽयं मन्त्रः ज्यौतिषशास्त्रस्य प्रेरणादायको मन्त्रो विद्यते । तद्यथा[1]-

**द्वादशारं न हि तज्जरायवर्तर्त्ति चक्रं परिद्यामृतस्य।**
**आ पुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः।।**

तथा चाऽथर्ववेदस्यैकोनविंशतिकाण्डे सप्तमाष्टमसूक्तौ विद्येते। ययोः ऋषिः गार्ग्योऽस्ति। तत्र सप्तविंशतिनक्षत्राणां नामानि सम्प्राप्यन्ते। तत्रैव वैदिकसाहित्येषु पञ्च सम्वत्सरनामानि अपि विद्यन्ते। तथा च तत्र किञ्चिदन्तरेण साम्प्रतिकमिवाऽन्य ज्यौतिषविषयाणां बाहुल्येन सम्प्रयोगोऽपि स्पष्टतया दृश्यते। एवमनेन वैदिकसाहित्येन सम्प्रेरितं लगधमुनिना वेदाङ्ग (ऋग्यजुःअथर्व) ज्यौतिषं विरचितम्[2]। तत्र पञ्चसमवत्सरात्मकयुगं प्रतिपादितं विद्यते[3]। येन प्रतीयते यत् पञ्चवर्षात्मकं पञ्चाङ्गं तावद् सम्प्रयुज्यते स्म। महाभारते भीष्मस्य कथनेनाऽपीदं संसिद्ध्यति। तत्र भीष्मेणोक्तं यत्[4]-

**तेषां कालातिरेकेण ज्योतिषाश्च व्यतिक्रमात्।**
**पञ्चमे पञ्चमे वर्षे द्वौ मासासुपजायतः।।**
**एषामभ्यधिकाः मासाः पञ्च च द्वादशक्षपाः।**
**त्रयोदशानां वर्षाणामिति मे वर्त्तते मतिः।।**

एवञ्ज्योतिषशास्त्रस्यान्याङ्गापेक्षया समुत्कृष्टता लगधेणैवं व्यक्तीकृतम्। तद्यथा[5]-

**शिखा मयूराणां नागानां मणयो यथा।**
**तद्वद् वेदाङ्गशास्त्राणां ज्यौतिषं मूर्ध्नि वर्तते।।**

तथा च लगधस्यातिरिक्तमपि परवर्त्त्याऽन्याचार्यैरपि ज्यौतिषशास्त्रस्य श्रेष्ठत्वं स्पष्टीकृतम्। सूर्यसिद्धान्तेऽपि ''वेदाङ्गमग्रयमखिलम्''[6] इति कथनेन ज्यौतिषस्य वैशिष्ट्यमुदबोधितम्। तत्रैव ज्यौतिष-चक्रचूड़ामणिना श्रीभास्कराचार्येण चक्षुषाङ्गमिव वेदस्य महत्त्वपूर्णाङ्गं विद्यते इत्यपि कथितम्। तद्यथा[7]-

1. ऋग्वेदस्य प्रथममण्डलम्
2. वेदाङ्गज्योतिषम्- श्लो.सं. 2, तद्यथा- **कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मना ।**
3. भारतीयज्योतिष- शिवनाथझारखण्डी-चतुर्थसंसकरण पृ.सं. 34
4. महाभारतम् वि.प.अ.५२ श्लो.३-४
5. या.ज्यौ. श्लो.४
6. सूर्यसिद्धान्तः मध्यमाधिकारः श्लो.सं. 3
7. सि.शि.म.ग्र.ग., श्लो.१०-११

**शब्द शास्त्रं मुखं ज्यौतिषं चक्षुषी श्रौत्रमुक्तं निरूक्तं च कल्पः करौ।**
**या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्दऽऽद्यैर्बुधैः।।**
**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**
**संयुतोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेण हीनो न किञ्चित्करः।।**

एवं लगधेण ज्यौतिषशास्त्रस्य प्रायोजनिकमहत्त्वमपि निगदितम्। एतदनुसारेण ''यो मानवो ज्यौतिषशास्त्रं सम्यग् रूपेण जानाति स एव यज्ञस्य यथार्थज्ञाता भवितुमर्हति। तद्यथा[8]-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालाभिपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद सवेद यज्ञम्।।**

तथा श्रीभास्कराचार्योऽपि तस्य प्रयोजनं स्फुटीकृतवान्। यथा[9]-

**वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**
**शास्त्रादस्मात् कालबोधो यतः स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्।।**

एवं वेदाङ्गज्यौतिषस्याऽनन्तरं ज्यौतिषशास्त्रस्य स्वतन्त्ररूपेण विविधक्षेत्राण्यपि सम्यग् रूपेण दृष्टिपथमायान्ति। तत्र तस्य सर्वविधं समुन्नतं स्वरूपं तथा तस्य प्रयोजनीभूतं महत्त्वमपि स्पष्टमालक्ष्येते। अस्य प्रयोजनं महर्षिनारदकथनेनापि स्पष्टं सञ्जायते। तद्यथा[10]-

**सिद्धान्तसंहिता होरारूपं स्कन्धत्रयात्मकम्। वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमनुत्तमम्।।**
**विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्ध्यति। तस्माज्जगद्धितायेदं ब्रह्मणा निर्मितं पुरा।।**

वराहमिहिरस्य कथनेनाऽपि ज्यौतिषशास्त्रस्य विभिन्नक्षेत्राणि सिद्ध्यन्ति। यथा[11]-

**ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं।**
**तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता।।**

तथा ज्यौतिषशास्त्रस्य च प्रयोजनमधस्तनपरम्पराप्राप्तपद्येनाऽपि सुस्पष्टं भवति। यत्[12]-

**शुभाऽशुभफलादेशो ज्यौतिषशास्त्रप्रयोजनम्।**
**स च लग्नबलाधीनः कथितः पूर्वसूरीभिः।।**
**भचक्रस्य समा भागा उक्ता द्वादशराशयः।**
**राशीनामुदयो लग्नं ते तु मेष-वृषादयः।**
**यान्यप्रत्यक्षशास्त्राणि विवादस्तत्र केवलः।**
**प्रत्यक्षं ज्यौतिषं यत्र साक्षिणः तारका ग्रहाः।।**

एवंप्रकारेण यज्ज्यौतिषशास्त्रस्य क्रियात्मकस्य व्यवहारिकस्य उपकरणभूतस्य ग्रहस्य स्थितिः

---

8. या.ज्यौ., श्लो.-३
9. सि.शि.ग्र.ग्र.का.मा.श्लो-९
10. ना.सं. १.४
11. बृ.सं., श्लो.९
12. बृहज्जातकस्य श्रीसीतारामझाकृत् भूमिकायाम्

सिद्धयति तदेव ग्रहगणनायां ज्योतिषशास्त्रस्य सिद्धान्तस्कन्धस्य विशेषेण महत्त्वमपि संज्ञायते। यत्र ज्यौतिषसिद्धान्तशास्त्रस्य लक्षणं श्रीभास्कराचार्येण इत्थं कृतं विद्यते। यत्[13]-

**त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमा-**
**श्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तोऽत्र उदाहृतोऽत्र गणितस्कन्ध प्रबन्धे बुधैः।।**

एतद्विषये गणेशदैवज्ञस्य कथनं केशवकृत् मुहूर्त्ततत्त्वटीकायां तथा च सिद्धान्तशिरोमणौ ग्रहगणिते वासनावार्त्तिके विद्यते यत्-''**सिद्धान्तशब्दो गणितवाचकोऽस्ति**। तत्र गण्यते संख्यायते तद् गणितम्। तत्र व्यक्तेन स्पष्टेनोच्चावचजनप्रसिद्धमार्गेण संकलनादिना यदुच्यते तद् व्यक्तम्। यावत्तावद् कालादिना सापेक्षबुद्धया गणितमव्यक्तम्। ग्रहकर्मणा ग्रहगणितम्। गोलेन वेधादिना ग्रहकर्म सवासनं गण्यत 'इति गोलाश्रितत्वाद्गोलगणितम्। इत्थं गणितं चतुष्टयात्मकम्। एवंप्रकारेण सिद्धान्ते बहुविधविषयैः सह गणितचतुष्ट्यानां विशेषेण वर्णनं प्राप्यते। तथा चाहुः- व्यक्ताव्यक्तभगोलवासनामयः सिद्धान्त आदिरिति। तत्रैव वटेश्वरसिद्धान्ते कथितं यत्-

**समयमितिरशेषा सावनं खेचराणां, गणितमखिलमुक्तं यत्र कुट्टाद्युपेतमिति।** [14]

तत्रत्यः सिद्धान्तग्रन्थोऽपि परिभाषितो विद्यते यत्-

''यस्मिन् ग्रन्थे कल्पादेर्ग्रहानयनं सः **सिद्धान्तः**, यत्र युगादेर्ग्रहानयनं सः स्कन्धः **तन्त्राख्यः**, तथा यत्र शकादेर्ग्रहानयनं सः स्कन्धः **करणसंज्ञक** इति।''

एवं सिद्धान्तस्कन्धक्षेत्रेऽपि विभिन्नसिद्धान्तानां प्रचलनं संदृश्यते। तेषु पञ्चानां सिद्धान्तानां विशेषमहत्त्वं वराहमिहिरस्य प्रसिद्धपञ्चसिद्धान्तिकाग्रन्थदर्शनेन परिलक्ष्यते। यस्मिन् ग्रन्थे पञ्चसिद्धान्तानां तुलनात्मकं विवेचनं कृतं विद्यते। तेषां पञ्चसिद्धान्तानां नामान्येवं विद्यन्ते। यथा-

''**पौलिशरोमकवाशिष्ठसौरपैतामहास्तुपञ्चसिद्धान्ताः**'' इति।

एतेषु पञ्चसिद्धान्तेषु द्वयोः पौलिश-रोमकसिद्धान्तयोः व्याख्या लाटदेवेन विहिता। वराहमिहिर-महाशयानां दृष्ट्या पौलिशसिद्धान्ते गणना यथार्थाऽस्ति। रोमकोऽपि तदासन्ना एवाऽस्ति। आभ्यामपि अधिकतरः स्पष्टः सावित्रसिद्धान्तोऽर्थात् सौरसिद्धान्तः सूर्यसिद्धान्तो वाऽस्ति। तत्राऽन्यौ द्वौ वाशिष्ठ-पैतामहसिद्धान्तौ दुरविभ्रष्टौ विद्येते। सम्प्रति पञ्चसिद्धान्तिकायाः एकं संस्करणं प्रोफेसर जी. थीबोट-महोदयेन तथा महामहोपाध्यायसुधाकरद्विवेदीना चाङ्गलभाषानुवादेन सहितं ''**पञ्चसिद्धान्तिका प्रकाशिका भाष्यम्**'' प्रकाशितं विद्यते। तदनन्तरमपि काले सम्प्रचारिताः सिद्धान्तज्यौतिषग्रन्था अनेकाः संदृश्यन्ते। तत्राऽऽर्यभटीयम्, सूर्यसिद्धान्तः, ब्राह्मस्फुट्सिद्धान्तः, शीष्यधीवृद्धिदतन्त्रं, सिद्धान्तशिरोमणिः, सिद्धान्ततत्त्वविवेकश्चेति सिद्धान्तग्रन्थाः सम्प्रत्यपि समाद्रियन्ते। तत्रैवाऽऽर्यभटीयग्रन्थदर्शनेनेदं स्पष्टं

13. सि.शि.ग्र.ग.म., श्लो. ६
14. वटेश्वरसिद्धान्ते

प्रतीयते यदार्यभटेन भारतस्य प्राचीन-ज्यौतिषस्य मंथनं कृत्वा तथा सूर्यचन्द्रादिग्रहनक्षत्राणि च वेधयित्वा पञ्चसिद्धान्तिकोक्तसूर्यसिद्धान्ताऽनुगतो आर्यभटीयसिद्धान्तः विरचितः। यथाऽऽर्यभटीयस्य गोलपादे कथितं विद्यते। यत्-

**सदसज्ज्ञानसमुद्रात् समुद्धृतं देवता-प्रसादेन।**
**सज्ज्ञानोत्तररत्नं मया निमऽनं स्वमति नावा।।**
**आर्यभटीयं नाम्नापूर्वं स्वायम्भुवं सदासद्यत्।**
**सुकृतायुषोः प्रणाशं कुरुते प्रति कञ्चूकंयोऽस्यः।।**

यत्र पञ्चसिद्धान्तिकाग्रन्थात् पूर्वस्यैवाऽऽर्यभटीयग्रन्थः संरचितो विद्यते। यतो वराहमिहिरस्य पूर्ववर्त्ति आर्यभटीयग्रन्थः सिद्धयति। अतः वराहमिहिरस्याऽऽर्यभटस्य च बहुपूर्वं सूर्यसिद्धान्तो विरचितः। सम्प्रति यो मूलः सूर्यसिद्धान्तः कथ्यते। तत्रैव वर्तमानसूर्यसिद्धान्तस्यादिरूपं तु तथैव विद्यते यथा हि पञ्चसिद्धान्तकोक्तः सूर्यसिद्धान्तो विद्यते। सूर्यसिद्धान्तस्येदं रूपं वराहमिहिस्य पूर्वमपि समासीदथवा वराहमिहिरेण संशोधितं विद्यते यस्मिन् परवर्त्तिज्यौतिषज्ञैः काले-काले संस्कृत्य वर्तमानसूर्यसिद्धान्तस्य स्वरूपं प्रकटीकृतम्।[15]

**युगे-युगे महर्षिणां स्वयमेव विवस्वताः।**

तत्संस्कारार्थं आर्यभटब्रह्मगुप्तादि-वेधकर्त्तृणां ग्रन्थैः वेधैर्वा साहाय्यमंगीकृतं भविष्यति। यथा सेनगुप्तमहोदया अपि स्वखण्डखाद्यभूमिकायां प्रतिपादयन्ति। तत्र श्रीशंकरबालकृष्णदीक्षितमहोदयानां वचनमत्र उपस्थाप्यते[16]- ''ऊपर सिद्धकर चुके हैं कि मूल सूर्यसिद्धान्त आर्यभट से प्राचीन हैं, अतः आर्यभट ने गुरु और बुध को छोड़कर शेष ग्रहों के भगण मूल सूर्यसिद्धान्त के लिए होंगे और गुरु बुध के भगण अपने अनुभवों द्वारा दृक्प्रतीति के अनुसार निश्चित किये होंगे। इत्यनेनेदं स्पष्टं प्रतीयते यदाऽऽर्यभटेन वर्तमानस्य सूर्यसिद्धान्तस्य चर्चा कथन्नकृता । एवमनेनाऽपि सिद्धयति यत् परम्पराप्राप्तः प्राचीनः सूर्यसिद्धान्तो वराहमिहिरस्यार्यभटस्य च पूर्वमप्यासीत्। तथा च तस्यैव संशोधितं सम्वर्द्धितञ्च स्वरूपं वर्तमानस्य सूर्यसिद्धान्तस्य स्वरूपे सम्प्रत्यपि सम्प्रयुज्यते समाद्रियते च। एवमस्मिन् विषये श्री महावीरप्रसादश्रीवास्तवमहोदयानां कथनमपि विचारणीयं वर्तते यत्[17]- ''इस प्रकार मत प्रकट है कि सूर्यसिद्धान्त के रचनाकाल तथा रचयिता के सम्बन्ध में जितने अनुमान है, वे सिद्ध नहीं होते। अंतरंग प्रमाणों के आधार पर केवल इतना ही कहा जा सकता है कि इसकी वृद्धि ४०० ई. के आसपास से प्रारम्भ होकर १२०० ई. तक समाप्त हुई। पहले पहल इसका विस्तार (संशोधन) वाराहमिहिर ने किया होगा। फिर अन्य संशोधकों ने आर्यभट्ट, ब्रह्मगुप्त, मुंजाल आदि के वेधों से लाभ उठाकर इसको अपटुडेट बनाने की कोशिश की होगी। यह संशोधन उस समय तक जारी था जबतक रंगनाथजी ने इसकी टीका लिखकर इसके श्लोकों को बाँध नहीं दिया।''

15. सू.सि.म.अ.श्लो.८
16. भा.ज्यो.पृ.-२६७
17. गणकतरङ्गिणी, पृ.१

इत्थं सूर्यसिद्धान्तोक्तं वचनं ''**अल्पावशिष्टे तु कृते**''[18] इत्यनेन ज्ञायते यद्ययं सिद्धान्तः कृतयुगान्तकालीको विद्यत इत्युपर्युक्तविवेचनस्याऽऽलोकेऽपि सत्याऽऽसन्नमेव प्रतीयते। यतः मूल-सूर्यसिद्धान्ते काले काले संशोधन स्वीकारेणापि आर्यभटादितः पूर्वमपि तत्र संशोधनादिक्रिया सिद्धयति। परञ्चेदं ज्ञातुं सम्प्रति साधनाभावो विद्यते। तथा कश्यप २ पराशरादित्रिः ज्यौतिषशास्त्रप्रवर्त्तकेषु भगवतः सूर्यस्य नामोल्लेखं दृष्ट्वा ज्ञातुं शक्यते यत् सूर्यसिद्धान्तः तयोः पूर्ववर्तिः निश्चप्रचञ्च विद्यते। तत्रैव पराशरेणोक्तं गुरुशिष्यपरम्परायां ''**सूर्योऽपि मयारुणकृते स्फुटं**'' इत्यनेन मयकृत् सूर्यसिद्धान्तमपि तेषां पूर्ववर्त्तिः सिद्धयति। अस्तु! इदं यदेतत् पूर्वमपि तैत्तिरीय-ब्राह्मणे (३/१०/९) वर्णितप्रसङ्गे ''**सावित्र विद्या**'' इति पदेन यत्र सविता नाम सूर्यस्य सर्वविदिततथ्यमस्ति इति सूर्येणोक्तं . (सू.सि.वि.भा.भूमिका) ज्ञानमेव प्रतीयते। यत्र वर्तमान सूर्यसिद्धान्तेऽपि सम्यगुक्तं विद्यते यत्[19]-

''**शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्कर**''

इति सार्थकोक्तिः प्रतीयते। एवमनेन ज्यौतिषशास्त्रस्य सूर्यसिद्धान्तस्य च प्राचीनतमा वैदिक-परम्परा सम्यक्तया निष्पक्षभावनया समक्षं प्रकटीभूयते। सा परम्परा कदा भंग्याऽभवदिति कथनं कठिनमस्ति। परञ्च वराहेण तथा तत्पूर्वमार्यभटेनैव च पुनरपि सा परम्परा दृष्टिपथमायाति। तथा तत्रैव वर्तमान सूर्यसिद्धान्तोऽपि सदुपर्युक्त विवेचनानुसारेण प्रचलने समागतः। एवमिदं तथ्यमपि स्वीकर्तुं शक्यते यत् वैदिककालत एव लोकव्यवहारेषु सूर्योपदिष्टसिद्धान्तोऽपि विद्यते। इति दिक्।

| **देवालये गेहारम्भे जलाशयादिनिर्माणे विदिगवस्थितो राहुमुखविचारः-** | | | | |
|---|---|---|---|---|
| **राहुमुखम्** | **ऐशान्याम्** | **वायव्याम्** | **नैरृत्याम्** | **आग्नेय्याम्** |
| **देवालये** | मीन-मेष-वृषभस्थे सूर्ये राहुमुखम् | मिथुन-कर्क-सिंहस्थे सूर्ये राहुमुखम् | कन्या-तुला-वृश्चिकस्थे सूर्ये राहुमुखम् | धनु-मकर-कुम्भ-राशिस्थिते सूर्ये राहुमुखम् |
| **गेहे गृहनिर्माणे** | सिंह-कन्या-तुला- राशिस्थिते सूर्ये राहुमुखम् | वृश्चिक-धनु-मकरस्थे सूर्ये राहुमुखम् | कुम्भ-मीन-मेषस्थे सूर्ये राहुमुखम् | वृष-मिथुन-कर्क-राशिस्थिते सूर्ये राहुमुखम् |
| **जलाशये** | मकर-कुम्भ-मीन-राशिस्थिते सूर्ये राहुमुखम् | मेष-वृष-मिथुनस्थे सूर्ये राहुमुखम् | कर्क-सिंह-कन्या-राशिस्थे सूर्ये राहुमुखम् | तुला-वृश्चिक-धनु-राशिस्थिते सूर्ये राहुमुखम् |
| **खातः-** | **अग्निकोणे** | **ईशानकोणे** | **वायव्यकोणे** | **नैरृत्यकोणे** |

18. सू.सि.म.अ.श्लो. 2
19. सू.सि.म.अ. श्लो.७

# भारतीयज्ञानपरम्परायां प्राचीनार्वाचीनाः भारतीयगणितज्ञाः

**डॉ. रामेश्वरदयालशर्मा**
सहायकाचार्यः(सं.)
ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुर-परिसरः

गणितशब्दः गण्संख्याने धातुना निष्पद्यते। संख्यायाः आवश्यकता जीवनस्य प्रत्येकऽस्मिन् क्षेत्रे प्रतीयते। सन्दर्भेऽस्मिन् गणितज्ञ-शिरोमणिना आचार्यमहावीरमहोदयेन **गणितसारसंग्रह**नामके ग्रन्थे गणितशास्त्रस्य महत्त्वविषये एवं प्रतिपादितम्[1] -

**लौकिके वैदिके वापि तथा सामायिकेऽपि यः।**
**व्यापारस्तत्र सर्वत्र संख्यानामुपयुज्यते।।**
**बहुनिर्विप्रलापैः किं त्रैलोक्ये सचराचरे।**
**यत्किंचिद्वस्तु तत्सर्वं गणितेन विना न हि।।**

वैदिकयज्ञानुष्ठाने यज्ञवेदीनिर्माणप्रक्रियायां ज्यामिते एव न अपितु बीजगणितस्यापि विकासोऽभवत्। अनेन एक-द्विघातसमीकरणानां समाधानमभवत्। शुल्वसूत्रेषु बख्शालीपाण्डुलिपीनां माध्यमेन एतेषां समीकरणानां समाधानसम्बन्धिदृष्टान्ताः प्राप्यन्ते। ज्योतिषग्रन्थेषु उपलब्धं बीजगणितस्य ज्ञानम् अभिलक्ष्य प्रो.मैकडोनाल्डो कथयति यत् एते ग्रन्थाः एकाधिकघातसमीकरणानां समाधानस्य पद्धतिं प्रस्तुवन्ति। वेदाङ्गज्योतिषे गणितशास्त्रस्य महत्त्वविषये वर्णितमस्ति[2] -

**यथा शिखा मयूराणां नागाणां मणयो यथा।**
**तद्वद्वेदाङ्गशास्त्रणां गणितं मूर्ध्नि संस्थितम्।।**

बीजगणितस्य आविष्कारे विकासे च खगोलविद्यायाः प्रयोगः भारतीयविद्वद्भिः सर्वप्रथमं कृतः। अनन्तरं भूसर-याकूबादिभिः पाश्चात्यविद्वद्भिः अरबदेशे प्रचारोऽस्य कृतः, जापानादिषु राष्ट्रेषु बीजगणितस्य विकासः भारतेनैव अभूत्।

वैदिककाले एव भारतीयरेखागणितस्य विकासः जातः, इति सर्वैरेवाङ्गीक्रियते। अस्य मूलस्रोतः बौधायनकृतं आपस्तम्बशुल्वसूत्रमस्ति। पाइथागोरस-प्रमेयस्य ज्ञानं भारतीयज्यामितेः बोधायन-प्रमेयस्यानन्तरं जातम्। तैत्तिरीयसंहितायाः शतपथब्राह्मणग्रन्थे चास्य प्रमेयाणामुपयोगोऽपि प्राप्यते। अस्याः सरलरेखायाः निर्माणं क्षेत्रफलादिविधीनां वर्णनं विद्यते। भारतीयगणितज्ञानां त्रिकोणमितेः ज्ञानमपि उच्चस्तरीयम् आसीत्। यूनानीजनः ज्याविशेषे अनभिज्ञः आसीत्। ज्यावाचकः यूरोपीय Sine शब्दः संस्कृते ज्याशब्दस्य पर्यायः। अयं अरबदेशीयशिञ्जिनीशब्दस्य अपभ्रंशस्य रूपान्तरणमस्ति।

1. गणितसारसंग्रहः 1/11
2. वेदाङ्गज्योतिषम्- श्लो.सं. 8

भारते गणितशास्त्रस्य पर्याप्तविकासः प्रथमशताब्दीपर्यन्तमभवत्। वैदिकसंहितानां ब्राह्मण-ग्रन्थानां शुल्वसूत्रणां विविधयज्ञानुष्ठानाम् आयोजनानां प्रयोजनानां स्पष्टीकरणं गणितीयसंकेतानां विकासञ्च प्रकटयति। तत्समये कस्यापि भारतीयगणितज्ञस्य आविर्भावविषये तेषां कृतीनां विषये च वर्णनं न प्राप्यते। पञ्चमशताब्द्या अनन्तरमेव भारतीयगणितज्ञानां तेषां कृतीनां विषये च सूचनाः प्राप्यन्ते।

विश्वेऽस्मिन् भारतीयगणितशास्त्रस्य खगोलशास्त्रस्य च महत्त्वपूर्णं स्थानं विद्यते। भारतीय-गणितज्ञाः ज्योतिर्वेत्तारश्च सम्पूर्णं विश्वं स्वप्रतिभया ज्योतिर्मयम् अकुर्वन्। प्राचीनगणितस्य इतिहासः अस्माकं कृते अत्यन्तोपयोगि वर्तते। ज्योतिषशास्त्रस्य सिद्धान्तः-(गणितम्) संहिता- होराश्च इत्येते त्रयः भागास्सन्ति[3]। संहिता होरा च अनयोर्मध्ये सिद्धान्तज्योतिषम् एव प्राचीनभारतीयगणितस्य महत्त्वपूर्णः विभागः वर्तते। अस्मादेव गणितज्योतिर्विज्ञानस्य विकासस्य परम्पराया आविर्भावः अभूत्। यत्र त्रिकोणमितिः ज्यामितिः आदयः समाहिताः सन्ति। वराहमिहिर-भास्कराचार्य-आर्यभट्ट-ब्रह्मगुप्तादयः प्राचीनभारतीयगणितज्ञानां रूपे प्रसिद्धास्सन्ति। आचार्यवराहमिहिरेण पञ्चसिद्धान्तिका-नामकस्य सिद्धान्तज्योतिषग्रन्थस्य रचना कृता[4]। यत्र सूर्यसिद्धान्तः पौलिशसिद्धान्तः रोमक-वासिष्ठ-पैतामहसिद्धान्ताः वर्णितास्सन्ति। आर्यभट्टेन आर्यभटीयम् नामकस्य ग्रन्थस्य रचना कृता।[5] अयं ग्रन्थः सिद्धान्तक्षेत्रे अतिप्रसिद्धो वर्तते। भास्कराचार्येण सिद्धान्तशिरोमणिः, लीलावती, भास्करीयबीजगणितादि-सिद्धान्तग्रन्थानां रचना कृता।[6] लीलावत्यां कुट्टकादीनां प्रक्रिया प्रमुखाः सन्ति।[7] भास्करीयबीजगणिते चक्रवालादयः गणितविशेषाः महत्त्वपूर्णाः सन्ति।[8] तद्यथा[9]-

**ह्रस्वज्येष्ठपदक्षेपान् भाज्यप्रक्षेपभाजकान् ।**
**कृत्वा कल्प्यो गुणस्तत्र तथा प्रकृतितश्च्युते।।**
**गुणवर्गे प्रकृत्योनेऽथवाल्पं शेषकं यथा।**
**तत्तु क्षेपहृतं क्षेपो व्यस्तः प्रकृतितश्च्युते।।**
**गुणलब्धिः पदं ह्रस्वं ततो ज्येष्ठमतोऽसकृत्।**
**त्यक्त्वा पूर्वपदक्षेपांश्चक्रबालमिदं जगुः।।**
**चतुर्द्वेकयुतावेवमभिन्ने भवतः पदे।**
**चतुर्द्विक्षेपमूलाभ्यां रूपक्षेपार्थभावना।।**

---

3. नारदसंहिता - सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।
4. भारतीयज्योतिष, शिवनाथझारखण्डी चतुर्थसंस्करण पृ.सं. 8
5. भारतीयज्योतिष, शिवनाथझारखण्डी चतुर्थसंस्करण पृ.सं. 263
6. भारतीयज्योतिष, शिवनाथझारखण्डी चतुर्थसंस्करण पृ.सं. 345
7. लीलावती पं.लषणलालझा सम्पादितम् पृ.सं. 329 - 346
8. भास्करीयबीजगणितम्- पं.बलदेवमिश्रसम्पादितम् पृ.सं. 139-160
9. भास्करीयबीजगणितम्- पं.बलदेवमिश्रसम्पादितम् पृ.सं. 139 श्लो.सं. 1-4

भास्कराचार्येण सिद्धान्तशिरोमणिग्रन्थे सिद्धान्तस्य लक्षणमित्थं वर्णितम् [10]-

**त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमा-**
**च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तः स उदाहृतोऽत्रगणितस्कन्धप्रबन्धे बुधैः।।**

अर्थात् त्रुट्यादितः (कालस्य लघुकालखण्डतः[11]) प्रलयकालपर्यन्तं यत्र कालगणना प्रतिपादिता भवति, एवमेव यत्र व्यक्ताव्यक्तगणितं, खगोलसम्बन्धिप्रश्नानाम् उत्तरं, द्युसदां (ग्रहाणां) चारविषयकं वर्णनं, नक्षत्रणां ग्रहाणाञ्च गति-स्थिति-आकारादीनां वर्णनं, वेधशालायाः विविध-यन्त्रादीनां निर्माणपद्धतिवर्णनं, ग्रहाणां वेधप्रक्रियायाः वर्णनञ्च यच्छास्त्रं करोति, तादृशं शास्त्रं सिद्धान्तज्योतिष-शास्त्रमुच्यते। गणितस्कन्धे व्यक्ताव्यक्तादीनां (अङ्कगणित-बीजगणितादीनां) यत्र वर्णनं भवति तत्सर्वमपि सिद्धान्तस्कन्धान्तर्गतं एव भवति।

## भारतीयगणितज्ञाः -

**1- आर्यभट्टः-** आर्यभट्टमहोदयस्य जन्म 476 ख्रीष्टाब्दे अभवत्[12]। अनेन 'आर्यभटीयम्' नामकोऽयं ग्रन्थः विरचितः। अयं ज्योतिषशास्त्रस्य प्रथमपौरुषेयग्रन्थः विद्यते। आर्यभट्टस्य जन्म 'पाटलीपुत्र'नामके स्थानेऽभवत्। आर्यभटीयस्य ग्रन्थस्य प्रचलनं दक्षिणभारते अधिकमस्ति, तत्रैव ग्रन्थस्यास्य हस्तलिपि अपि उपलब्धा अस्ति। 'आर्यभटीयम्' ग्रन्थः संस्कृतभाषायां सूत्ररूपेण रचितो विद्यते। अयं हि ग्रन्थः दशगीतिकापाद-गणितपाद-कालक्रियापाद-गोलपाद-इत्येतेषु चतुर्षु पादेषु निबद्धोऽस्ति। कुत्रचित् दशगीतिकापादं विहाय गणितपाद-कालक्रियापाद-गोलपादमाहत्य त्रिषु पादेषु अयं ग्रन्थः विभक्तोऽस्तीति ।[13] अस्मिन् ग्रन्थे 121 श्लोकाः सन्ति। गणितपादे अङ्कगणित-बीजगणित-रेखागणित-इत्यादिप्रमुखनियमानां वर्गमूल-घनमूल-घन-वर्गक्षेत्र-त्रिभुजफल-वृत्तक्षेत्रफल-त्रिभुज-चतुर्भुजादिवृत्तानां निर्माणविधिः श्रेणीनियमः वर्ग- समीकरणानां समाधाननियमाश्च अत्र वर्णिताः सन्ति। समीकरणानां सन्दर्भे आर्यभट्टमहोदयः विश्वस्य प्रथमगणितज्ञः अस्ति।

## 2- ब्रह्मगुप्तः -

ब्रह्मगुप्तस्य जन्म 520 शकाब्दे **भीनमाल**नगरे जालौरजनपदे अभवत्[14]। अस्य पितुर्नाम विष्णुः आसीत्। अनेन आर्यभट्टस्य परम्परां विकसयन् ब्रह्मस्फुटसिद्धान्तः खण्डखाद्यनामकग्रन्थद्वयम् अरचयत्।[15] प्रसिद्धवैज्ञानिक जॉर्जसार्टनमहोदयानुसारं ब्रह्मगुप्तः भारतस्य महान् श्रेष्ठश्च वैज्ञानिकः आसीत्।

10. सिद्धान्तशिरोमणिः, मध्यमाधिकारः, कालमानाध्यायः श्लो.सं.6
11. सूच्याभिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते
12. भारतीयज्योतिष शिवनाथझारखण्डी चतुर्थसंस्करण पृ.सं. 263
13. प्रणीपत्यमनेकं कं सत्यां देवतां परं ब्रह्म। आर्यभटस्त्रीणि गदति गणितं कालक्रियां गोलम्। आर्यभटीयम् श्लो.सं. 1
14. भारतीयज्योतिष शिवनाथझारखण्डी चतुर्थसंस्करण पृ.सं. 300
15. गणकतरङ्गिणी सम्पादक पं. सदानन्दशुक्लः पृ.सं. 17

ब्रह्मस्फुटसिद्धान्तस्य टीकाकारः पृथुदकस्वामी- महोदयानुसारं कुट्टकशब्दस्य स्थाने बीजगणितशब्दस्य प्रथमबारं प्रयोगः कृतः।

### 3- भास्कराचार्यः -

भास्कराचार्यस्य जन्म शकाब्दः 1036 आसीत्।[16] अयं भास्कराचार्यः सिद्धान्तशिरोमणिग्रन्थे पृथिव्याः गुरुत्वाकर्षणसिद्धान्तस्य प्रतिपादनमकरोत्। तेन स्पष्टम् उक्तं यत् पृथिव्यां गुरुत्वाकर्षणं विद्यते। तेन स्पष्टम् उक्तं यत् पृथिव्यां गुरुत्वाकर्षणशक्तिः निहिता अस्ति[17] -

**आकृष्टिशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या।**
**आकृष्यते तत्पततीव भाति समे समन्तात् क्व पतत्वियं खे।।**

भास्कराचार्यस्य गुरुत्वाकर्षणनियममाधारीकृत्य षोडशीशताब्द्यां न्यूटनमहोदयः पृथिव्याः गुरुत्वाकर्षणनियममप्रतिपादयत्।

### 4- बापूदेवशास्त्री -

आधुनिककालस्य संस्कृतगणितज्ञेषु बापूदेवशास्त्री प्रमुखत्वेन भजते। अस्य मातुः नाम सत्यभामा पितुश्च नाम सीताराम आसीत्। अस्य जन्म 1821 ईसवी वर्षे अभवत्[18]। एतेन रेखागणित-त्रिकोणमिति-मापनवाद-तत्त्वविवेकपरीक्षा-अंकगणितादिग्रन्थानां रचना कृता। प्राचीनकाले योजन-कोश-चतुष्टया-त्मकपरिणामादिविषये अथवा तत्त्सदृशखगोलशास्त्रस्य क्षेत्रे नैककार्याणि जातानि। एवमेव वर्तमानसमये व्यास-परिधिक्षेत्रफलानाच प्रकाराः उक्तास्सन्ति, यथा च भास्कराचार्येण कथितः[19]-

**व्यासे भनन्दाग्निहते विभक्ते खबाणसूर्यः परिधिः स सूक्ष्मः।**
**द्वाविंशतिघ्ने विहृतेऽथ शैलैः स्थूलोऽथवा स्याद् व्यवहारयोग्यः।।**

अर्थात् व्यासं 3927 इति संख्यया गुणितं कृत्वा 150 इत्यनेन भाजनेन प्राप्तफलं सूक्ष्मपरिधेः मानं भवति। एवमेव बीजगणितः भास्कराचार्यस्य वर्गान्तर-योगान्तरघातसमसूत्रेण अद्यापि प्रभावितोऽस्ति। बीजगणितस्य कुट्टकाः अनेकवर्गाः समीकरणानि एकवरणं मध्यमाहरणञ्च गणितस्याचार्यपप्रनाभः श्रीधरगुप्तेन प्रस्फुटितं भूत्वा अद्यापि उपस्थिता अस्ति।

एतावदेव पाटिगणितस्य रूपस्थानविभागाः अन्तगुणनस्य प्रक्रियाश्च क्रमशः वर्तमान, गुणा-लघुविरुद-गुणनखण्डादि-प्रक्रियानुरूपाः सन्ति। व्यवहारगणितमद्यापि उपस्थिता अस्ति। तस्य सरलप्रक्रिया क्षेत्रव्यवहारे गुणकोटिकर्णे योनिद्वयं क्षेत्रणाम् आभायाः आधारलम्बादिज्ञानसम्बन्धितनैकाः प्रश्नाः ज्ञानकोष्ठानां प्रतिष्ठा वर्धयति।

सिद्धान्ततत्त्वविवेककार-आचार्यकमलाकरस्य नैकग्रन्थेषु सूक्ष्मज्या, कोटिज्या, उत्क्रमज्या साधनेन समत्रिभुजादिकुण्डानां निर्माणप्रक्रिया तथा च वराहमिहिराचार्येण स्वसंहितायां वास्तुप्रकरणस्य

16. रसगुणपूर्णमहीसमशकनृपसमयेऽभवन्ममोत्पत्तिः। रसगुणवर्षेण मया सिद्धान्तशिरोमणिः रचितः।। सि.शि. गोला.

17. सिद्धान्तशिरोमणिः गोलाध्यायः भुवनकोशे श्लो.सं. 6


18. गणकतरङ्गिणी सम्पादकः डॉ.सदानन्दशुक्लः पृ.सं. 117

19. लीलावती क्षेत्रव्यवहारे (वृत्तक्षेत्रे करणसूत्रम्) श्लो.सं. 40

विभिन्नप्रकारकाणां भवनानां राजमार्गाणां नगरनिर्माणकलायाः यद्वर्णनं कृतमस्ति, यमाधारीकृत्य जयपुरनगरस्यापि निर्माणं कृतम्। अस्य नगरवास्तुनः उपरि अनुसन्धानमावश्यकम्।

## 5- पं. कल्याणदत्तशर्मा

अथजन्माङ्गचक्रम्




राजस्थानप्रदेशस्य दौसाजनपदस्य आभानेरीनामके विश्वप्रसिद्धपर्यटनस्थले महतः ज्योतिर्विदः जन्म 08/11/1920 दिनांके तदनुसारं कार्तिककृष्णचतुर्दश्यां सोमवासरे अभूत्। सर्वप्रथमम् अयमाचार्यः जयपुरस्य महाराजाऽऽचार्यसंस्कृतमहाविद्या लये गणितज्योतिषशास्त्रस्य प्राध्यापकत्वेन अध्यापनं प्रारम्भं कृतवान्। जयपुरे जन्तर-मन्तरवेधशालायाः अधीक्षको आसीत्। अनन्तर 2009 तमवर्षपर्यन्तं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य ज्योतिषविभागे सम्मानिताचार्यपदत्वेन कार्यमकरोत्।

तत्रैव विद्यापीठपञ्चाङ्गस्य निर्माणं प्रारब्धम्। ज्योतिषपीयूष, अनुभूत योगावली, सूर्यग्रहणसिद्धान्तः चन्द्रग्रहणप्रक्रिया पञ्चाङ्गगणितम् 'ज्योतिर्विज्ञान की वेधशाला' इत्यादीनां ज्योतिर्विज्ञानस्य मौलिकग्रन्थानां लेखनं सम्पादनं च कृतम्। आधुनिकवेधशालानां निर्माणं भारतवर्षे सर्वप्रथमं श्रद्धेयराष्ट्रपतिसम्मानितानां पं. कल्याणदत्तशर्मणां निर्देशने श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठे, जयपुरस्थगालवाश्रमगलतापीठे, गायत्रीशक्तिपीठशान्तिकुञ्जहरिद्वारे, सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयवाराणस्याम्, जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयजयपुरे (शिलान्यासः) अभवत्। एताः सर्वाः वेधशालाः समस्तसिद्धान्तज्योतिषीयपद्धतिषु आधारिताः सन्ति। एषः महानुभावः गणितशास्त्रस्य मर्मज्ञः आसीत्। एतेषां देहावसानं 2009 तमे वर्षेऽभूत्।

खगोलविज्ञानेन सह गणितशास्त्रस्य सम्बन्धः अन्योन्यः स्वीक्रियते। भास्कराचार्यस्य कथनमस्ति यत् खगोले गणिते च परस्परमनभिज्ञाः पुरुषाः तावदेव महत्त्वहीनाः यथा घृतं विना व्यञ्जनं, राजानं विना राज्यं तथा च सुष्ठुवक्तारं विना सभा भवति -

**योज्यं यथा सर्वरसं विनाज्यं राज्यं यथा राजविवर्जितं च।**
**सभा न भातीव सुवक्तृहीना गोलानभिज्ञो गणकस्तथात्र।।**

।। इति शम् ।।

# आचार्यवराहमिहिरोक्तः वृष्टिविचारः

**डॉ. अरुणकुमारः**
सहायकाचार्यः, ज्योतिषविभागः
हिमाचल-आदर्शसंस्कृतमहाविद्यालयः
जांगला, हि. प्र. - 171214

**पर्यावरणज्यौतिषयोः सम्बन्धनिरूपणम्**

चराचरेऽस्मिन् सूक्ष्मातिसूक्ष्म-अवयवा-( Atoms )दारभ्य न केवलं पृथिव्यादि-पञ्चमहाभूतानि अपितु ब्रह्माण्डस्य ग्रहाः, उपग्रहाः, नक्षत्राणि, उल्कापिण्डानि च प्रकृतेः सर्वे घटकाः तज्जीवो भवतु अथवा कश्चिदन्यः परस्परं प्रभाविताः भवन्ति। एतत् प्रभाववशादेव एते घटकाः/अवयवाः परस्परं शुभफलदायकाः अनिष्टकारकाः वा भवन्ति।

एतत्प्रभावस्य ज्ञानमेव ज्यौतिषशास्त्राध्ययनस्य विषयो वर्तते। यथा विश्वेऽस्मिन् कस्यापि घटकस्य प्रभावः अन्यस्मिन् घटके पतति तस्य प्रभावः तत्सम्बन्धिशुभाशुभफलञ्च ज्यौतिषशास्त्रे विचार्यते। अतः पर्यावरण-ज्यौतिषयोः सम्बन्धस्तु अस्त्येव। अत्र ग्रहनक्षत्रादीनां प्राणिषु प्रभावस्तु स्पष्टरूपेण स्वीक्रियते। यथा[1] -

**ग्रहाधीनं जगत्सर्वं त्रैलोक्यं स चराचरम् ।**

तथैव प्रत्येकस्य जीवस्य अन्येषु जीवेषु प्रभावोऽपि अत्र स्पष्टरूपेण स्वीक्रियते, यस्य प्रत्यक्षीकरणं मेलापकादि-विचारे द्रष्टुं शक्यते। यदि एकस्य जीवस्य जीवान्तरे प्रभावः न पतति तदा मेलापकविचारस्य किं प्रयोजनम्? यद्यपि बृहत्संहितायां पर्यावरणस्य समेषां घटकानां समानरूपेण वर्णनं कृतं वर्तते तथापि आचार्येण जलविषयकं चिन्तनम् अनेकेषु अध्यायेषु स्वतन्त्ररूपेण कृतं वर्तते। क्षिति-जल-पावकादिपर्यावरणीयतत्त्वेषु जलस्य स्थानमतीवमहत्त्वपूर्णं विद्यते ।

**पयः कीलालममृतं जीवनं भुवनं वनम्** इति अमरकोषवचनेन[2] स्पष्टं यज्जलं जीवनमस्ति। तदर्थमेव भगवता सर्वादौ जलस्य सृष्टिः विहिता यथा- **अप एव ससर्जादौ तासु बीजमवासृजत्[3]।** संस्कृतवाङ्मये प्रकृतेः रक्षणार्थमेव जले नदीषु च देवानां वासस्थानं कल्पितम्। जलस्य महत्त्वं दृष्ट्वैव व्यावहारिकजीवने जलमेव जीवनम् इति उक्तिः प्रसिद्धा वर्तते। परब्रह्मणो नारायणस्य नारायण इति नामकरणे जलमेवास्ति कारणम्[4]। यथा महाभारते अपां नारा इति पुरा संज्ञाकर्म कृतम्- तेन नारायणो-प्युक्तो ममतत्त्वयनं सदा[5]।

1. आचार्यलोकमणिदाहालप्रणीतः भारतीय-ज्योतिषशास्त्रस्येतिहासः, पृ. १३९
2. अमरकोषः प्रथमकाण्डः वारिवर्गः
3. मनुस्मृतिः 1/8
4. आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः।। मनुस्मृतिः 1/10
5. महाभारतम् - वनपर्व-189/3

आचार्यवराहमिहिरेण वृष्टिप्रक्रियायाः विवेचनाय बृहत्संहितायां स्वतन्त्ररूपेण अनेके अध्यायाः विवेचिताः सन्ति। अतोऽत्र आचार्यवराहमिहिरेण प्रतिपादिता वृष्टिप्रक्रिया सारांशरूपेण निरूप्यते-

**वृष्टिविचारः**

वृषु सेचने इत्यस्माद्धातोः स्त्रियां क्तिन् इति क्तिन्प्रत्यये कृते वर्षणार्थे वृष्टिशब्दो निष्पद्यते। वर्षणं हि तुषार-हिमकरकादीनां बहुविधं भवति, परं सामान्यतो वृष्टिशब्दो जलवृष्टिं सूचयति। मानवजीवने वृष्टेः स्थानमतीव महत्त्वपूर्णं विद्यते, यतोहि मानवजीवनस्याधारः वृष्टिरेव भवति। वृष्ट्या एव अन्नमुत्पद्यते। अन्नस्य सेवनेनैव जीवाः प्राणान्धारयन्ति। अतः जीवनस्य मूलं कारणं वृष्टिः। उक्तमपि वृष्टेः महत्त्वविषये यथा[6] -

**वृष्टिमूला कृषिः सर्वा वृष्टिमूलं च जीवनम् ।**
**तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत् ।।**

अत्र मेघानां गर्भधारणप्रसङ्गे आचार्यवराहमिहिरोऽपि यथा[7] -

**अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम् ।**
**यस्मादतः परीक्ष्य प्रावृट्कालः प्रयत्नेन ।।**

अर्थात् अस्य विश्वस्य प्राणा (असवः) अन्नम्। यतोहि अन्नैर्विना प्राणिनः प्राणान् धारयितुमसमर्थाः। तच्चान्नं वर्षाधीनम्। अस्माद्धेतोः प्रयत्नेन प्रावृट्कालः (वर्षाकालः) विचारणीयः।

वस्तुतः वृष्टिरेका प्रक्रिया वर्तते यत्र बहुविधानि ताप-वाय्वादितत्त्वानि कार्यं कुर्वन्ति। मतस्यास्य अधुना वैज्ञानिका अपि अनुसरणं कुर्वन्ति। तेषां मते सूर्यस्य प्रचण्डरश्मिवशाद् भूमौ निम्नवायुदाबः (LOW PRESSURE) उत्पद्यते येन वायोः भारः न्यूनः भवति। सः (वायुः) जलकणान् स्वीकृत्य उपरि गच्छति। एवं क्रमेणोपरि वायोः गमनेन यदा सः सन्तृप्तो भवति (जलेन पूरितो भवति) तदा जलकणाः वृष्टिरूपेण भूमौ आपतन्ति इति संघननवृष्टिनाम्ना ज्ञायते। आधुनिकवैज्ञानिकानां मतमेतदस्माकं संस्कृतवाङ्मये आचार्यैः बहुपूर्वमेव वर्णितम्। वर्षायां तापस्य प्रभावः सर्वाधिको भवतीति आदित्याज्जायते वृष्टि[8] इत्यादिवाक्यैः सर्वथा प्रमाणीक्रियते प्रत्यक्षरूपेणावलोक्यते च। अस्यैव मतस्य समर्थनं कुर्वता आचार्यवराहमिहिरेण प्रतिपादितं यत्[9] -

**उदयशिखिरसंस्थो दुर्निरीक्ष्योऽति दीप्त्या द्रुतकनकनिकाशः स्निग्धवैदूर्यकान्तिः ।**
**तदहनि कुरुतेऽम्भस्तोयकाले विवस्वान् प्रतपति यदि चोच्चै खं गतोऽतीव तीक्ष्णम्।।**

अर्थात् वर्षर्तौ यदि उदयपर्वतमूर्ध्निस्थितः (पूर्वस्यामितिभावः) अतिकान्त्या सारल्येन यद् द्रष्टुं न शक्यते, गलितस्वर्ण सदृशकान्तियुक्तः, निर्मलवैदूर्यमणेः कान्तिसदृशः सूर्यः यस्मिन् दिने मध्याह्नकाले अतीवतीव्ररश्मियुतो भवति तदा निश्चयेन वृष्टिं करुते ।

6. डॉ. शत्रुघ्नत्रिपाठिकृज्ज्योतिषनिबन्धदर्शः, वृष्टिसंसूचने वायोर्महत्त्वम्, पृ. २००
7. बृहत्संहितायाम्-गर्भलक्षणाध्यायः श्लोक-१
8. बृहत्संहिता भटोत्पली टीकायां प्रथमाध्यायस्य प्रथमश्लोकस्य प्रसङ्गे
9. बृहत्संहितायाम्-सद्योवर्षणाध्यायः - श्लोक-३

किन्तु कदाचिद्वायोः प्रभाववशादपि वृष्टिप्रक्रिया अवरुद्ध्यते सरलीक्रियते च। अर्थात् वायुः कदाचिद्वर्षणे साहाय्यं करोति कदाचित् प्रतिकूलं च भवति इति आधुनिकैः स्वीक्रियते। आधुनिकानां मतानुसारमपि वृष्टि-वाय्वोर्मध्ये घनिष्ठतमः सम्बन्धः विद्यते। वर्षणाय वायौ पर्याप्तरूपेण वाष्पकणानाम् आवश्यकता भवति। यदि तस्य अभावः स्यात्तदा मेघोत्पत्तिः नैव जायते। ऊर्ध्ववायुप्रभावेण तापाधिक्येन वा यदा आर्द्रवायुः उपरि गत्वा शैत्यं प्राप्यते तदा तस्य सापेक्ष-आर्द्रता वर्द्धते। तदरिक्तजलवाष्पस्य संघननप्रक्रियया मेघाः कणरूपेण पतन्ति। एवमत्र मेघकणानां प्रवर्षणार्थम् ऊर्ध्ववायुः आवश्यको भवति। अतः समस्तवृष्टिप्रक्रियायामूर्ध्ववायोः महत्त्वम् आधुनिका (वैज्ञानिकाः) अपि समानरूपेण स्वीकुर्वन्ति।

बृहत्संहितायां सूक्ष्मरूपेण वृष्टेर्विचारं विधातुम् आषाढ़पूर्णिमायां वातलक्षणानि दृष्ट्वा आचार्य-वराहमिहिरेण वृष्ट्यादिविचारः कृतो वर्तते । यथा[10] -

**आषाढ्यां पौर्णमास्यां यद्यैशानोऽनिलो भवेत्।**
**अस्तं गच्छति तीक्ष्णांशौ सस्यसम्पत्तिरुत्तमा।।**

आषाढ़स्य पौर्णमास्यां सूर्यास्तकाले यदि ऐशान्यां वायुर्वहेत् तदा सस्यानामुत्तमा निष्पत्तिर्भवति, सम्यग्रूपेण वृष्टिः भवति, भूश्च धनधान्ययुता शोभते। आग्नेय्यां यदि वायुर्वहेत् तदा सम्पूर्णा भूः अवर्षणेन आतपेन च पीडिता भवति । एवं दक्षिणस्याम् आषाढ़स्य पौर्णमास्यां यदा वायुर्वहति तदा ताली (वृक्षविशेषः) वृक्षस्य पत्राणि लताश्च मृगादिभिः वानरादिभिश्चालयन् वहति अर्थात वातवेगाल्लतादयश्चलन्ति तदा कदर्या इव (कृपण इव) मेघाः जलं न त्यजन्ति, अल्पवृष्टिर्भवतीतिभावः ।

नैर्ऋृत्यां यदा वायुर्वहति तदा न शुभः । यदि वायुर्वहति चेत्तदा भूः प्रेतवधूरिव चापल्ययुक्ता प्रमत्ता च प्रतिभाति। अल्पवर्षणेन (अकालेन) भूमौ शोभनानि दृश्यानि न दृश्यन्ते। पश्चिमायामपिवृष्टेरभावः। वायव्यां सुवृष्टिः, धान्यानामभिवृद्धिः भाग्यवृद्धिश्च। उत्तरस्यां मेघाः उन्मत्ता इव अतिवृष्टिं कुर्वन्ति। तथा चैशान्यां वायुर्वहति तदा सुवृष्टिः, धान्यानामभिवृद्धिः, ब्रह्मणादि-वर्णानां च रक्षणं भवति। आषाढपूर्णिमायां यदि वह्निकोणगतो वायुश्चलति तदा वर्षाहानिः जायते। यथा[11] -

**यदा वह्नै वायुर्वहति गगनेऽखण्डिततनुः।**
**प्लवत्यस्मिन् योगे प्रभवति पतङ्गे प्रसवति।।**

एवं बृहत्संहितायां तात्कालिकलक्षणानि दृष्ट्वैव वर्षायाः विचारो न विहितः वर्ततेऽपितु गर्भधारणादि विषये तु षण्मासात्पूर्वमेव वृष्टेः विचारः कृतः वर्तते। तद्यथा -

**मेघानां गर्भधारणम्-**

मनुष्यादिप्राणिवत् मेघानामपि गर्भधारणं, गर्भपातः प्रसवश्च भवति। यथा प्राणिनां जन्मनः मूलकारणं तस्य गर्भधारणं भवति तथैव वृष्टेः मूलकारणं मेघानां गर्भधारणं भवति। अर्थात् सर्वादौ मेघैः गर्भः धार्यते ततः १९५ दिनानन्तरं तस्य पुष्टिर्जायते, ततो वर्षणं जायते । मेघानां गर्भाधानं कदा कथं च

---

10. बृहत्संहितायाम्-वातचक्राध्यायः -श्लोक-१
11. बृहत्संहितायाम्-प्रवर्षणाध्यायः -श्लोक-१३

जायत इत्येतद्विषये मनीषिभिः गहनं चिन्तनं विधाय तस्य शास्त्रेऽतीव-विस्तृतरूपेणोल्लेखः कृतः वर्तते।

**मेघगर्भधारणकालः -**

मेघस्य गर्भधारणकालः न हि आवर्षं भवति किन्तु तदर्थं केचन मासाः निर्धारिताः सन्ति। तत्र आचार्य-वराहमिहिरेण मार्गशीर्षप्रतिपदारभ्य मेघस्य गर्भधारणकालः मन्यते। तद्यथा[12] -

**मार्गशिरः सितपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढ़ाम् ।**
**पूर्वा वा समुपगते गर्भाणां लक्षणं ज्ञेयम् ।।**

मार्गशीर्षमासस्य शुक्लपक्षप्रतिपदारभ्य चन्द्रे पूर्वाषाढ़ानक्षत्रं प्राप्ते (मार्गशीर्षशुक्लपक्षे यदा पूर्वाषाढ़स्थ चन्द्रमा भवति तदारभ्य) गर्भाणां लक्षणं ज्ञातव्यम्।

**अथ धारितस्य गर्भस्य प्रसवकालः-**

एवं गर्भधारणानन्तरम् आचार्यैः विचारितं यत्तस्य गर्भस्य प्रसवः कदा भवतीति। तस्य गहनान्वेषणं विधाय तैः स्वमतम् इत्थं प्रकटितम्[13] -

**यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात् ।**
**पञ्चनवते दिनशते तत्रैव प्रसवमायाति ।।**

यो गर्भो यस्मिन्नक्षत्रे व्यवस्थिते चन्द्रे भवेत् स गर्भः चन्द्रयुक्तनक्षत्रवशात् पञ्चनवते दिनशते व्यतीते प्रसवमायाति। अत्र पञ्चनवते दिनशते इत्यादि दिवसानां गणना सावनमानेन कर्तव्या न तु चान्द्रमानेन यतोहि पञ्चनवत्यधिक एकशतं (१९५) तमे दिवसे सावनमानेनैव तस्मिन्नेव (गर्भधारणकालिके) नक्षत्रे चन्द्रो भवति न तु चान्द्रमानेन। तस्मादेव निश्चीयते यच्चन्द्रकृत् गर्भलक्षणवशात्तत्रैव व्यवस्थिते चन्द्रे गर्भः प्रसवं याति। पुनश्च धारितगर्भस्य प्रसवकालं स्पष्टयति वराहमिहिरः-

अथ चात्र सार्धषड्मासानन्तरं वृष्टिः भवष्यिति इति निर्देशस्तु सामान्यतया आचार्यवराहमिहिरः विवेचितवानेव। इदानीं तमेव विषयं मासानुरोधेन स्पष्टयति आचार्यः। यथा[14] -

**सितपक्षभवाः कृष्णे शुक्ले कृष्णा द्युसम्भवा रात्रौ ।**
**नक्तं प्रभवाश्चाहनि सन्ध्या जाताश्च सन्ध्यायाम् ।।**

शुक्लपक्षसम्भूताः गर्भाः अग्रे पञ्चनवते दिनशते व्यतीते कृष्णपक्षे प्रसवमायान्ति। एवं कृष्ण-पक्षोद्भवाः शुक्लपक्षे। दिनसम्भवा गर्भा रात्रौ प्रसवमायान्ति। रात्रिसम्भवाः दिवसे प्रसवमायान्ति। पूर्वसन्ध्यायां सम्भूता अपरसन्ध्यायामपरसन्ध्यायां च सम्भूताः पूर्वसन्ध्यायामिति। तथा च आचार्य गर्गः[15]-

**दिवा भवति यो गर्भो रात्रौ स इति पच्यते।**
**शुक्लपक्षे समुद्भूतः कृष्णे पक्षे च वर्षति।।**
**पौर्णमास्यामथोत्पन्नः सोऽमावास्यां प्रवर्षति।**

12. बृहत्संहितायाम्-गर्भलक्षणाध्यायः श्लोक-६
13. बृहत्संहितायाम्-गर्भलक्षणाध्यायः-भट्टोत्पलविवृतौ- श्लोक-७
14. बृहत्संहितायाम्-गर्भलक्षणाध्यायः-भट्टोत्पलविवृतौ- श्लोक-८
15. बृहत्संहितायाम्-गर्भलक्षणाध्यायः-भट्टोत्पलविवृतौ- श्लोक-८

**अमावस्यां समुद्भूतः पूर्णमास्यां प्रवर्षति।।**
**पूर्वसन्ध्यासमुद्भूतः पश्चिमायां प्रवर्षति।**
**पश्चिमायां समुद्भूतः पूर्वसन्ध्यां प्रवर्षति।।**
**पूर्वाह्ने यः समुद्भूतः पश्चाद्रात्रौ प्रवर्षति।**
**निशायां पश्चिमे यश्च स पूर्वाह्ने प्रसूयते।।**
**निशार्द्धे तु समुत्पन्नः स निशार्द्धे प्रसूयते।।** इति।।

एवं कालभेदेन गर्भधारणस्य वर्षणेऽपि कालभेदः स्पष्टरूपेण द्रष्टुं शक्यते। कालभेदेनैव गर्भधारणस्य वर्षायामपि भेदः दृश्यते। यथा प्रत्येककाले (सर्वदा) धारितः गर्भः समानफलदायकः न भवति। कदाचिद् धारितः गर्भः अतीववृष्टिकारकः, कदाचिच्च मन्दवृष्टिकारकः भवति। अतः वृष्टिप्रक्रियायां कालभेदः अतीवमहत्त्वपूर्णः भवति। अथ गर्भधारणं जातं न वेति विचाराय आचार्येण गर्भसम्भवलक्षणानि इत्थं निरूपितानि -

**अथ गर्भसम्भवलक्षणानि** -

**ह्लादिमृदूदक् शिवशक्रदिग्भवो मारुतो वियद्विमलम्।**
**स्निग्धसितबहुलपरिवेषपरिवृतौ ................इति।।**[16]

गर्भकाले एतानि लक्षणानि शुभफलयुक्तानि भवन्ति। तद्यथा-वायुराह्लादकारकः, सुखस्पर्शः, उत्तरस्यामैशान्यां पूर्वस्यां वा दिगुद्भवा तथा आकाशं निर्मलं, चन्द्रसूर्यौ-स्निग्धौ, शुक्लेन घनेन परिवेषेण व्याप्तौ इति। आकाशं बहुलस्निग्धघनं, विस्तीर्णाः-धनाः, स्निग्धा मेघा यस्मिन् तथा यदि सूच्याकारः, क्षुराकारा लोहितवर्णाश्च मेघाः गर्भसम्भवत्वं द्योतयति।

आकाशः वायसाण्डसदृशः नीलवर्णयुक्तः (मेचको-बहिकण्ठसमवर्णः, काकाण्डमेचकवदाभा-कान्तिर्यस्मिन्) निर्मलचन्द्रो नक्षत्राणि च यस्मिन्। तथा पूर्वापरसंध्यायां इन्द्रधनुषा, मेघस्य मधुरगर्जनेन, तडित् तथा च प्रतिसूर्य एतैः युक्ताः मेघाः शुभाय भवन्ति। एवं प्रकारेण उपर्युक्ताः गुणाः गर्भाणां पुष्टिकराः भवन्ति। पुनः उपलादिवृष्टिविषये (औलावृष्टिः) विशेषास्तदुच्यन्ते[17] -

**गर्भः पुष्टः ग्रहोपघातादिभिर्यदि न वृष्टः ।**
**आत्मीयगर्भसमये करकामिश्रं ददात्यम्भः ।।**

यो मेघः गर्भधारणकाले पुष्टः प्रसवकाले (पञ्चनवत्यधिकशतं दिनानन्तरं) ग्रहोपघातादिभिरुत्पातैः (दिव्यान्तरिक्षभौमैः) यदि नैव वर्षति तदा सः पुनः (अग्रिमसमये) गर्भधारणकाले उपलयुक्तां वृष्टिं करोति। तद्यथा[18]-

**काठिन्यं याति यथा चिरकालधृतं पयः पयस्विन्याः ।**
**कालातीतं तद्वत् सलिलं काठिन्यमुपयाति ।।**

16. बृहत्संहितायाम्-गर्भलक्षणाध्यायः - श्लोक-१४-१८
17. बृहत्संहितायाम्-गर्भलक्षणाध्यायः- श्लोक-३५
18. बृहत्संहितायाम्-गर्भलक्षणाध्यायः- श्लोक-३६

यथा सक्षीरायाः धेनोः पयः चिरकालाधृतं (प्रभूतकालमुषितं) कठिनतां याति तथा कालातीतं जलमपि काठिन्यमुपयाति। सलिलम् उपलतां गच्छतीति भावः।

अथ गर्भकालिकमेघानां लक्षणान्युच्यन्ते। तद्यथा[19]-

**मुक्तारजनिकाशास्तमालनीलोत्पलाञ्जनाभासः ।**
**जलचरसत्त्वाकारा ......................इति ।।**

ये मेघाः मुक्ताफलानां रजतस्य च सदृशाः (अतिशुक्लेत्यर्थः) अथवा तमालवृक्षस्य अञ्जनस्य (कज्जलस्य) च सदृशाः (अतिकृष्णाः), जलचरप्राणिनः (इषमकरमत्स्यनक्रकूर्मादयः) कान्तिवदाकृतिवद्वा मेघाः बहुवर्षदाः भवन्ति। ये मेघाः प्रचण्डदिवाकररश्मिभिः तापिता, स्वल्पपवनयुताश्च गर्भकाले भवन्ति ते प्रसवकाले पञ्चनवते दिनशते व्यतीते क्रुद्धा इव अतिवृष्टिं कुर्वन्ति।

अथ गर्भोपघातलक्षणान्युच्यन्ते[20]-

**गर्भोपघातलिङ्गान्युल्काशनिपांशुपातदिग्दाहाः ...........**इति।।

इमानि वक्ष्यमाणानि गर्भाणां विनाशस्य चिह्ननि। तद्यथा- उल्कापातः, विद्युत्, पांशुवर्षणं, दिग्दाहः, भूकम्पः, गन्धर्वनगरं, तामसकीलकसंज्ञको केतुः, ग्रहयुद्धं, निर्घातशब्दः तथा वर्षणे रुधिरादिविकारः (रक्तमांसवसाघृततैलादिवर्षणम्), परिघ (परिघ इति मेघरेखा या तिर्यग्भास्करोदयेऽस्ते वा इति) तस्य परिघस्थेन्द्रधनुषः दर्शनम्, चन्द्रार्कग्रहणदर्शनम्, इत्येवं प्रकारैरुत्पातैः त्रिविधैः दिव्यान्तरिक्षभौमैरुत्पातैः आहताः मेघाः गर्भधारणे क्षमाः न भवन्ति।

**अथ गर्भपुष्टिलक्षणम्-**

कैर्लक्षणैर्युतः गर्भः सुवृष्टिकारकः शुभदश्च भवति इत्येतदुच्यते[21] -

**पवनसलिलविद्युर्जिताऽभ्रन्वितो यः स भवति बहुतोयः पञ्चरुपाभ्युपेतः।**
**विसृजति यदि तोयं गर्भकालेऽतिभूरि प्रसवसमयमित्वा शीकराम्भः करोति।।**

वायुः, जलं, विद्युत् (तडित्), मेघानां गर्जनं, मेघाश्चैतैः पञ्चभिर्यो गर्भो युक्तः स प्रभूतजलदो भवति, पञ्चरूपाभ्युपेतत्वात्। पञ्चभिः रूपैः संयुक्तोऽतो बहुतोयदो भवति। एवंविधो गर्भो गर्भकाले यदि प्रभूतजलं विसृजति (अतिवर्षणं करोतित्यर्थः) तदा तत्प्रसवसमयमतीत्य (१९५ दिवसानन्तरं) प्रभूतवर्षणं न करोति। एवमेव हिन्द्यामपि प्राच्यकृषिवैज्ञानिकैः गर्भस्य लक्षणानि स्वीकृतानि सन्ति।

**अथ निमित्तानुसारं वृष्टिक्षेत्रप्रमाणकथनम् -**

**पञ्चनिमित्तैः शतयोजनं तदर्द्धार्द्धमेकहान्याऽतः।**
**वर्षति पञ्चनिमित्ताद्रूपेणैकेन यो गर्भः।।**[22]

पञ्चनिमित्तैः पवनसलिलादिभिर्युक्तो गर्भः योजनशतं यावद् वर्षति। पञ्चानां निमित्तानामेकैक-

19. बृहत्संहितायाम्-गर्भलक्षणाध्यायः-भट्टोत्पलविवृतौ- श्लोक-२३-२४
20. बृहत्संहितायाम्-गर्भलक्षणाध्यायः- श्लोक-२५-२६
21. बृहत्संहितायाम्-गर्भलक्षणाध्यायः- श्लोक-३७
22. बृहत्संहितायाम्-गर्भलक्षणाध्यायः- श्लोक-३१

निमित्तहानौ सामान्येन अवशेषविधिक्रमेण अर्धमत्र योजनीयम्। चतुर्भिः निमित्तैः शतार्धं पञ्चाशद्योजनानि, त्रिभिर्निमित्तैः पञ्चविंशतियोजनानि, द्वाभ्यां सार्द्धानि द्वादशयोजनानि तथा चैकेन निमित्तेन पञ्चयोजनानि वर्षति। अथ वृष्टिसन्दर्भे विशेषः[23] -

**चतुर्दशीं पञ्चदशीं तथाष्टमीं तमिस्त्रपक्षस्य तिथिं भृगोसुतः ।**
**यदा व्रजेद् दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते ।।**

शुक्रः कृष्णपक्षस्य चतुर्दशीम् अमावास्यामष्टमीं वा तिथिं समाश्रित्य उदयं याति (सूर्यमण्डलादुर्च्छति) अस्तं वा याति (तत्रैव सूर्यमण्डले प्रविशति) तदा भूः जलमयीव दृश्यते (अतिवृष्टिर्भवतीतिभावः) ।

**अन्यद् वृष्टिलक्षणम् -**

**प्रायो ग्रहाणामुदयास्तकाले समागमे मण्डलसंक्रमे च ।**
**पक्षक्षये तीक्ष्णकरायनान्ते वृष्टिर्गतेऽर्के नियमेन चार्द्राम् ।।**[24]

ग्रहाणामुदयकाले सूर्यमण्डलान्निर्गमकाले तत्रैवास्तकाले च, चन्द्रेण सह ताराग्रहाणां समागमे, मण्डलसंक्रमे भरणी पूर्णमण्डलमित्यादि षण्मण्डलानि शुक्रचारोक्तानि तेषां दक्षिणोत्तरयोरयनयोः समाप्तौ (कर्कटमकरसंक्रान्तौ इति भावः) अपि च सूर्यस्य आर्द्रानक्षत्रप्राप्ते निश्चयेन वृष्टिर्भवति ।

**वृष्टिविचारे जैविकं पर्यावरणम्-**

बृहत्संहितायां न केवलं प्राकृतिकलक्षणानिदृष्ट्वैव वृष्टेर्लक्षणानि निरूपितानि वर्तन्तेऽपितु जैविक/मानवीयपर्यावरणान्तर्गतविविधजीवानां लक्षणानि दृष्ट्वा अपि वृष्टिर्भविष्यतीति निरूपितं वर्तते। यथा -

**मार्जारा भृशमवनिं नखैर्लिखन्तो लोहानां मलनिचयः सविस्त्रगन्धः।**
**रथ्यायां शिशुरचिताश्च सेतुबन्धाः संप्राप्ते जलमचिरान्निवेदयन्ति ।।** [25]

बिडालाः नखैः अत्यधिकं भूमिं लिखन्ति, आयसभाण्डानां कांस्यानां वा मलसमूहः विस्त्रगन्धेन (मत्स्यसदृशगन्धेन इत्यर्थः) युक्तः भवेत् तथा च मार्गे बालविचरिता सेतुबन्धाः यदि दृश्यन्ते तदा यथाशीघ्रमेव जलस्य लक्षणानि वदेत्। पिपीलिकानामुपघातेन विना (अकारणमेव इत्यर्थः) अण्डानां अन्यदेशे नयनम्, सर्पाणां मैथुनम्, तेषां वृक्षारोहरणं तथा च गवामकारणमेव प्लवनं (कूर्दनम्) एतानि सर्वाणि वृष्टेर्निमित्तानि भवन्ति।

**तरुशिखरोपगताः गगनतलस्थितदृष्टिनिपाताः।**
**यदि च गवां रविवीक्षणमूर्ध्वं निपतति वारि तदा न चिरेण ।।**[26]

वृक्षाणां शिखरोपगता कृकलासाः प्राणिविशेषाः आकाशमेव पश्यन्ति, गावश्चापि सूर्यमवलोकयितुं

23. बृहत्संहितायाम्-शुक्रचाराध्यायः -श्लोक-३६
24. बृहत्संहितायाम्-सद्योवर्षणाध्यायः -श्लोक-२०
25. बृहत्संहितायाम्-सद्योवर्षणाध्यायः -श्लोक-५
26. बृहत्संहितायाम्-सद्योवर्षणाध्यायः -श्लोक- ८

चेष्टन्ते तदा शीघ्रमेव जलं वर्षति ।

**नेच्छन्ति विनिर्गमं गृहाद्धुन्वन्ति श्रवणान् खुरानपि।**
**पशवः पशुवच्च कुक्कुरा यद्यम्भः पततीति निर्दिशेत् ।।** [27]

यदा पशवो गवादयो गृहान्निष्क्रमणं नेच्छन्ति तथा कर्णान् पादानपि कम्पयन्ति तदा जलं वर्षति। पशुवद्यदि-कुक्कुरा अपि गृहान्निष्क्रमणं नेच्छन्ति, श्रवणान् खुरानपि कम्पयन्ति तदापि वृष्टिर्भवतीति ज्ञातव्यम्। कुक्कुराः (श्वानो) यस्मिन् काले गृहपटलेषु-गृहाच्छादनेषु स्थित्वा सततमाकाशं पश्यन्त रुदन्ति (शब्दं कुर्वन्तीत्यर्थः) अपि च ऐशान्यां विद्युद्गर्जनमपि भवति तदा भूः (जलेन) समा दृश्यते (अतिवृष्टिर्भवतीति भावः)। यथा आचार्यवराहमिहिरः -

**यदा स्थिता गृहपटलेषु कुक्कुरा रुदन्ति वा यदि विततं वियन्मुखाः।**
**दिवा तडद्यदि च पिनाकिदिग्भवा तदा क्षमा भवति समैव वारिणा।।** [28]

यस्मिन् काले चन्द्रो शुककपोतलोचनसदृशो, तत्सदृशशोभायुक्तो, मधुसदृशकान्तियुक्तो वा प्रतिभाति तथा च अकाशे यदि द्वितीयचन्द्रो (प्रतिचन्द्रो) दृश्यते तदा शीघ्रमेव जलं वर्षति। इत्त्थं बृहत्संहितायां वृष्टिसन्दर्भे मेघानां गर्भधारणं, धारितस्य गर्भस्य प्रसवकालः, वृष्टिप्रक्रियायां वायोर्महत्त्वं, गर्भकालिकमेघानां लक्षणम्, उपलादिवृष्टेः प्रतिपादनं, वर्षायाः परिमाणादिकथनञ्चेति बहुविधाः विषया प्रतिपादितास्सन्ति। मेघानां गर्भधारणं तत्प्रसवकालश्च वृष्टिविचारे सर्वथा नवीनाः विषयाः सन्ति। अस्य मतस्य चर्चा आधुनिकविज्ञानेऽपि न श्रूयते। अतः मतमेतद् आधुनिकवैज्ञानिकानां कृतेऽपि सर्वथा अनुसरणयोग्यं वर्तते। यतोहि आधुनिकं विज्ञानं तत्क्षणमेव यन्त्रादिमाध्यमेन लक्षणानि दृष्ट्वा वर्षादिविषयकं ज्ञानं (पूर्वज्ञानं) प्रयच्छति किन्तु आचार्येण १९५ दिनानि पूर्वमेव वर्षाविषयकं यद्विज्ञानमत्र प्रस्तुतं तत् सर्वथा अनुसरणयोग्यम्। अत्र यन्त्राणि विनैव प्रकृतेः लक्षणानि दृष्ट्वा वर्षायाः ज्ञानं तस्य प्रमाणं च ज्ञातुं शक्यते। कस्मिन्काले गर्भधारणेन कदा वृष्टिः, उपलवृष्टिः, कदा च अनावृष्टिर्भविष्यतीति ज्ञानं सम्यग्रूपेण कर्तुं शक्यते। आचार्यस्य मतानुसारं सर्वे जनाः व्ययं विनैव प्राकृतिकलक्षणानि विज्ञाय वैज्ञानकियुक्तीनां प्रयोगं वृष्टिसन्दर्भे कर्तुं शक्नुवन्ति।

एतत्सर्वं विवरणं यदाचार्येणोपस्थापितं तत्सर्वं सम्यक्तया विचार्य परीक्ष्य च यदि वृष्टेः विचारः अधुनापि क्रियते चेत्तदा निश्चितरूपेण अत्यल्पव्ययेन प्राकृतिकसंसाधनैरेव वर्षायाः ज्ञानं कर्तुं शक्यते। आचार्यवराहमिहिरेण प्रतिपादितवर्षासम्बन्धिविधयः केवलमनुसन्धानकर्तृणामेव मार्गदर्शनं न कुर्वन्तिऽपितु एतास्तु सामान्यजनानां कृषकादीनां कृष्यादिकर्मण्यपि साहाय्यं कर्तुमर्हति। यथा षण्मासात्पूर्वमेव गर्भलक्षानि दृष्ट्वा अस्मिन् वर्षे न्यूना अधिका वा कीदृशी वृष्टिर्भविष्यतीति विचार्य स्वकीयां कृषियोजनां निर्मातुं शक्नुवन्ति। अतः बृहत्संहितायां प्रतिपादितः वृष्टिविचारः अतीव वैज्ञानिकः आधुनिकयुगाय लाभकरश्च वर्तते। इति दिक्।

---

27. बृहत्संहितायाम्-सद्योवर्षणाध्यायः -श्लोक-९

28. बृहत्संहितायाम्-सद्योवर्षणाध्यायः -श्लोक-१०

# ज्योतिषशास्त्रे गुप्तरोगाणां विचारः

**डॉ. रमेशशर्मा**
(सहायकाचार्यः, ज्योतिषम्)
राजकीय-नेहरु-संस्कृत-महाविद्यालयः
फागली (शिमला) -04 (हि.प्र.)

"**शरीरमाद्यं खलु धर्मसाधनम्**"[1] इत्यनुसारं मानवशरीरमिदम् ईश्वरस्य सर्वोत्तमा कृतिरस्ति। अनेन माध्यमेन मानवः इहलौकिकं पारलौकिकञ्च सिद्धिं प्राप्तुं सक्षमो भवति। भारतीयदर्शनशास्त्रेषु मानवशरीरमिदं धर्मार्थकाममोक्षरूपस्य पुरूषार्थचतुष्टयस्य आधारस्तम्भः मन्यते। स्वस्थशरीरेण सर्वविधम् ऐहलौकिकं पारलौकिकञ्च सुखं प्राप्तुं शक्यते, परञ्च अस्वस्थशरीरेण किमपि कर्तुं न शक्यते। अत एव मानवस्य सर्वप्रथमं कर्तव्यं शरीरस्य स्वास्थ्यरक्षणमस्ति। अनेन कारणेन प्रातः-सायं-कालीनसन्ध्यामन्त्रेषु वैदिकाः ऋषयः ऊचुः[2] -

"**पश्येम शरदः शतं श्रृणुयाम शरदः शतमदीना स्यामः शरदः शतं भूयश्च शरदः शतात्**" । अर्थात् वयं शतवर्षपर्यन्तं रोगशोकरहिताः भूत्वा जीवेम। येन अस्माकं शारीरिकं मानसिकं आध्यात्मिकञ्च बलमुच्चतमं स्यात्। ज्योतिषशास्त्रेण भौतिकजगतः वास्तविकं रहस्यं ज्ञातुं शक्यते। मनसि शरीरे च विविधाः विकाराः रोगाः वा उत्पन्नाः भवन्ति । ततः अस्माकं शारीरिकं मानसिकञ्च दुःखं प्राप्यते । तान् विकारान् वयं रोगान् ब्रूमः। अस्मिन् शास्त्रे राशिभावग्रहाणां चानुमानेन होरास्कन्धे रोगस्यैव चिन्ता भवति। यथोक्तम्[3]-

**रोगस्य चिन्तामपि रोगभावस्थितैर्ग्रहैर्वा व्ययमृत्युसंस्थैः।**
**रोगेश्वरेणापि तदन्वितैर्वाद्वित्रयादिसम्वादवशाद्वदन्तु ।।**

ज्योतिषशास्त्रे रोगस्य विषये निम्नलिखितप्रकारेण विचारणीयम् । यथा –

1- षष्ठभावस्थितेन ग्रहेण ।
2- अष्टमभावस्थितेन ग्रहेण ।
3- द्वादशभावस्थितेन ग्रहेण ।
4- षष्ठभावाधिपेन ।
5- षष्ठभावाधिपेन सह युतेन ग्रहेण ।

एवं यदा द्वित्रिप्रकारैः एक एव रोगः निर्दिष्टः भवेद्, तदा रोगनिर्णयं कृत्वा रोगविषये कथनीयम्।

1. कुमारसम्भवम्- 5/33
2. यजुर्वेद-
3. फलीपिका-14/1

रोगस्य हेतुः- आयुर्वेदशास्त्रे रोगोत्पत्तिः द्विधा कर्मप्रकोपेण दोषप्रकोपेण च कथितास्ति। संयमितजीवन-यापनेन नियमिताहारविहारकरणेन च यदा रोगो भवेद् स कर्मप्रकोपेण उत्पन्नः कर्मजन्यः रोग उच्यते, तथा वातपित्तकफत्रिविधदोषप्रकोपेण उत्पन्नः दोषजन्यः रोग उच्यते ।

**कर्मप्रकोपेण कदाचिदेके दोषप्रकोपेण भवन्ति चान्ये।**
**तथापरे प्राणिषु कर्मदोषप्रकोपजाः कायमनोविकाराः ।।**[4]

परञ्च ज्योतिषशास्त्रे रोगस्य हेतुः बहुधा कल्प्यते । यथा –

1. भूतावेशाद् (पंचमहाभूतदोषवशाद् अथवा अनिष्टस्थानेषु ग्रहाणां गोचरवशाद् देवात् राक्षसात् वा मानवानां या पीडा भवति )
2. ग्रहगतिवशाद् (प्रतिकूलस्थानेषु ग्रहाणां गमनेन) ।
3. त्रिविधदोषकोपेन (वातपितकफविपर्ययेन असंतुलनेन वा )

**रोगार्तानामिह तु बहुधा कल्प्यते रोगहेतु-**
**र्भूतावेशाद् ग्रहगतिवशाद्वातपितादिकोपात् ।।**
**एतत्तथ्यं त्रिविधमुदितं प्रायशः स्वीयपाप्मा**
**रोगोत्पत्तेर्भवति हि नृणां हेतुरेकस्त्रिधा स्यात् ।।** [5]

अतः रोगोत्पत्तेः एक एव हेतुः जन्म-जन्मान्तरकृतं पापं वर्तते। स एव उपर्युक्तैः विविधप्रकारैः दृष्टिपथमायाति। ज्योतिषशास्त्रं जन्म-जन्मान्तरकृतं पापं तथैव प्रकटीकरोति यथा अन्धकारे स्थितं वस्तु दीपकः प्रकाशयति ।

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पंक्तिम् ।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।** [6]

रोगास्तु अनेकविधाः सन्ति, परञ्च शोधपत्रमिदं गुप्तरोगाणां विषये वर्णयति। ज्योतिषशास्त्रे ये जननेन्द्रियसम्बन्धिनः रोगाः सन्ति ते गुप्तरोगा उच्यन्ते। तेषु रोगेषु उपदंशशूकादिलिंगरोगाः, वीर्य-क्लीबादिरोगाः, वन्ध्यात्वादिस्त्रीरोगाः, एच.आई.वी/.एड्सादिरोगाः जननेन्द्रियरोगाश्च सम्मिलिताः सन्ति।

**ज्योतिषशास्त्रे गुप्तरोगस्य कारकत्वम् –**

ज्योतिषशास्त्रे राशिषु कन्याराशिः संक्रामकाणां एवं गुप्तरोगाणां, तुलाराशिः दाम्पत्यकालीनरोगाणां तथा च वस्तिमूत्राशयगर्भाशयसम्बन्धिरोगाणां, वृश्चिकराशिः जननेन्द्रियगुदासंबन्धिरोगाणां कारकः वर्तते। भावेषु पंचमभावः गर्भाशयसम्बन्धिरोगाणां, षष्ठभावः मूत्र-मूत्रकृच्छादिरोगाणां, सप्तमभावः मूत्राशयवीर्यसंबन्धिरोगाणां, अष्टमभावः जननेन्द्रियगुदारोगाणां कारकः वर्तते। ग्रहेषु शुक्रः यौनवीर्यरोगाणां, भौमः मूत्रकृच्छ-ऋतुस्रावगर्भसम्बन्धिरोगाणां, बृहस्पतिः उदरसम्बन्धिगुर्दादिरोगाणां, शनिः एवं राहुः

4. त्रिशठाचार्यः चरकसंहिता-कर्मजा व्याधयः केचिद् दोषजाः सन्ति चापरे। उतरतंत्र अ- 40
5. प्रश्नमार्ग अ. 13 श्लो. 30
6. लघुजातक अ.1 श्लो. 2

जननेन्द्रियगुदारोगाणां कारकः जायते ।

**गुप्तरोगस्य योगाः –**

ज्योतिषशास्त्रे जननेन्द्रियसम्बधिनः रोगाः गुप्तरोगा उच्यन्ते। आधुनिकसन्दर्भे ते एव यौनरोगाः कथ्यन्ते। एते रोगाः निम्नलिखितानां ग्रहयोगानां प्रभाववशेन भवन्ति।

**कुलीरकुम्भालिनवांशयुक्ते चन्द्रे समन्दे यदि गुह्यरोगी।**[7]

1. यदि जन्मकुण्डल्यां शनियुक्तचन्द्रः कर्कस्य वृश्चिकस्य कुम्भराशेर्वा नवांशे स्थितः स्यात्, तदा जातकः जननेन्द्रियरोगेण पीडितः भवति।

**पापान्विते शशिनि रन्ध्रपलग्नराशौ**
**सर्पेक्षिते निधनपे यदि गुह्यरोगी ।**
**रन्ध्रे चतुस्त्रितयपापयुक्ते तथैव**
**सौम्यग्रहेण सहिते यदि रोगहीनः ।।**[8]

2. पापग्रहेण युक्तः चन्द्रः अष्टमेशस्य राशौ स्थितः भवेत्, तथा च अष्टमभावाधिपतिः राहुणा दृष्टः भवेत्, तदा जातकः गुह्यांगरोगेण जननेन्द्रियरोगेण वा ग्रस्तो भवति।

3. यदि शुभग्रहदृष्टिरहिताः अष्टमभावे त्रयः चत्वारः वा पापग्रहाः स्थिताः स्युः, तदा जातकः गुह्यांगरोगेण जननेन्द्रियरोगेण वा ग्रस्तो भवति।

**जलचरगृहगेन्दौ तत्पतौ षष्ठयाते जलगृहगतखेटैरीक्षिते मूत्रकृच्छ्रम् ।**
**परिभवरिपुयाते शीतगौ भौमदृष्टे रविसुतयुतलग्ने शोणितं रोगमेति ।।**[9]

4. कर्कराशिः, मकरराशेरुत्तरार्धं तथा मीनराशिः एते जलचरराशयः सन्ति। यदि चन्द्रः जलचरराशौ स्थितः भवेत्, तथा चन्द्राधिष्ठितराशेरधिपः षष्ठभावे जलचरराशौ स्थितः अथवा जलचर-राशिस्थग्रहेण दृष्टः स्यात्तदा जातकः मूत्ररोगेण पीड़ितो भवति।

**उपदंशशूकादिलिंगरोगाणां योगाः –**

जननेन्द्रियेषु घातादिदोषेण उत्पन्नरोग उपदंशः तथा च शोफादिदोषेण उत्पन्नरोगः शूक इत्युच्यते । एते रोगाः निम्नलिखितग्रहयोगानां प्रभाववशेन भवन्ति । -

**षष्ठेश्वरश्चन्द्रसुतेन युक्तः सागुर्विलग्ने स्वयमत्र शिश्नम् ।**
**छिनत्त्यसौ सौम्यदृशा विहीनः सभूमिपुत्रो यदि लिंगरोगी ।।**[10]

1. राहुणा केतुना वा युतः बुधः षष्ठेशसहितः यदि लग्ने स्यात्तदा जातकस्य स्वाज्ञानवशात् चरित्रहीनतावशात् वा उपदंशरोगी भवति ।

---

7. जातकपारिजातः - 6/82
8. जातकपारिजातः - 6/87
9. तत्रैव - श्लो. सं. 88
10. जातकपारिजातः - 6/75

2. शुभग्रहदृष्टिविहीनः भौमः यदि षष्ठेशयुतः स्यात्, तदा लिंगरोगी भवति ।

3. बुधभौमौ, षष्ठेशयुतौ स्याताम् ।

**अन्तर्दशा दशायां सित्तस्य शशिनो यदा भवति चिह्नम् ।**
**नखदशनशिरोरोगैः सह भवति च कामिला रोगः ।।** [11]

4. शुक्रमहादशायां चन्द्रान्तर्दशा तथा चन्द्रमहादशायां शुक्रान्तर्दशाः स्याताम्, तदा उपदंशशूक-लिंगादिरोगाः भवन्ति ।

**रोगारिव्यसनक्षतानि वसुधापुत्रारितश्चिन्तये-**
**दुक्तं रोगकरं तदेव रिपुगे जीवे जितारिर्भवेत् ।**
**षण्ढोऽरीशबुधौ विधुन्तुदयुतौ लग्नेशसम्बन्धिनौ**
**लिंगस्याममयकृद् व्रणेन रुधिरः षष्ठे सलग्नाधिपः ।**[12]

5. यदि लग्नेशः भौमसहितः षष्ठस्थाने स्यात्, तदा लिंगे व्रणादिरोगः भवति ।

**शेफच्छेदो नराणामथ तपनसुते भूमिकेन्द्रेऽर्कयुक्ते**
**दृष्टे काव्योडुपाभ्यां यदि दिवसपतेश्चोपरागोऽत्र तद्वत् ।।** [13]

6. यदि जन्मकाले सूर्यग्रहणं भवेत्, लग्ने सूर्यशनैश्चरयोर्युतिर्भवेत्, तत्र शुक्रचन्द्रयोर्दृष्टिर्भवेत्, अस्मिन् योगे यस्य जन्मं जातं, तस्य लिंगच्छेदः जननेन्द्रियसम्बन्धी वा रोगो भवति ।

**वन्ध्यात्वादिस्त्रीरोगाणां योगाः-**

स्त्रीकुण्डल्यां अनपत्यदोषं,वैधव्यदोषं, मासिकधर्मे अनियमितता, योनिव्रणादिविविधाः रोगाः स्त्रीरोगाः सन्ति । एते रोगाः अधोलिखितानां ग्रहयोगानां प्रभाववशेन भवन्ति। तद्यथा-

**शशि-शुक्रौ यदा लग्ने मन्दाराभ्यां युतौ तदा ।**
**वन्ध्या भवति सा नारी सुतभे पापदृग्युते ।।**
**लग्नादष्टमगौ स्यातां चन्द्रार्कौ स्वर्क्षगौ तदा ।**
**वन्ध्याऽथ काकबन्ध्या चेदेवं चन्द्रबुधौ यदा ।।**
**शनिमंगलभे लग्ने चन्द्रभार्गवसंयुते ।**
**पापदृष्टे च सा नारी वन्ध्या भवति निश्चयात् ।।**[14]

1. यस्याः स्त्रियाः जन्मांगे लग्ने चन्द्रशुक्रौ शनिना भौमेन वा युतौ, पंचमभावः पापग्रहेण युतः दृष्टः वा स्यात्, तदा स्त्री वन्ध्या भवति ।

2. यदि लग्नाद् अष्टमभावे स्वराशिस्थितौ सूर्यचन्द्रौ भवेताम्, तदा स्त्री वन्ध्या भवति ।

3. यदि लग्नाद् अष्टमभावे स्वराशिस्थितौ बुधचन्द्रौ भवेताम्, तदा स्त्री काकवन्ध्या भवति ।

11. सारावली- 42/43

12. जातकपारिजात; - 13/71

13. जातकालङ्कारः - 3/18

14. बृहत्पाराशरहोराशास्त्रम् - 82/34,38,39

4. लग्ने मेष-वृश्चिक-मकर- कुम्भराशिषु चन्द्रशुक्रौ स्यात्, तथा पापग्रहाणां लग्ने दृष्टिः भवेत् । तदा स्त्री निश्चयेन वन्ध्या भवति ।

**सूर्यऽष्टमगते जाता दुःखदारिद्र्यसंयुता।**
**क्षतांगी खेदयुक्ता च भवेद्धर्मपरांगमुखी ।।**[15]
**चन्द्रेऽष्टमगते नारी कुभगा कुस्तनी कुदृग् ।**
**वस्त्राभरणहीना च रोगिणी चातिगर्हिता ।।**
**कुजेऽष्टमगते बाला कृशांगी रोगसंयुता ।**
**विधवा कान्तिहीना च शोकसंतापदुःखिता ।।**
**कुजांशेऽस्तगते सौरि दृष्टे नारी सरूग्भगा ।।**

**क्षितितनयनवांशे लग्नतः सप्तमस्थे दिनकरबुधदृष्टे व्याधियोनिः प्रजाता ।** [16]
**शुभकरनवभागे सप्तमस्थानसंस्थे सुभगसुतवती सा चान्यथा दुर्भगा स्यात् ।।**

5. यदि स्त्रियाः जन्मांगे अष्टमभावे सूर्य भवेत् तदा स्त्री दुःखदारिद्रययुक्ता, क्षतांगी च भवति ।

6. यदि स्त्रियाः जन्मांगे अष्टमभावे चन्द्रः भवेत् तदा स्त्री कुभगा कुदृष्टियुक्ता रोगिणी च भवति ।

7. अष्टमभावे यदि भौमः स्यात् तदा स्त्री रोगसंयुता, विधवा, शोकसंतापदुःखिता च भवति ।

8. लग्नाद् सप्तमभावे भौमनवांशः (मेष-वृश्चिक) यदि शनैश्चरेण दृष्टः अथवा सूर्यबुधभ्यां दृष्टः, तदा स्त्री योनिरोगयुक्ताः दुर्भाग्यशालिनी च भवति ।

**द्यूने तु कुजनवांशे शनिना दृष्टे सरोगयोनिः स्त्री ।** [17]

9. सप्तमभावे भौमनवांशः स्यात् तथा सप्तमभावं शनिः पश्येत् , तदा स्त्री योनिरोगयुक्ता भवति ।

**व्यभिचारियोगाः –**

जन्मांगे केचन् व्यभिचारियोगाः भवन्ति। येन कारणेन यौनसम्बन्धिनः एच.आई.वी/ एड्सादिसदृशाः रोगाः भवन्ति। सप्तमभावेन शुक्रेण च यौनरोगविषये विचारणीयम्। यथा [18] -

**शुक्रज्ञौ द्यूनयातौ गगनविलयगौ मानवः पुंश्चलः स्यात् ।**
**कामाज्ञामंदिरस्थौ कविधरणिसुतौ तद्वदाज्ञाम्बुयातौ।।**
**काव्यारौ तद्वदिन्दोर्नभसि रविसुतादास्फूजिन्नीरयायी ।**
**तद्वत्कामास्पदस्था बुधसितशनयः स्वर्क्षगे भार्गवे हि ।।**

1. जातकस्य जातिकायाः वा जन्मांगे सप्तमभावे शुक्रबुधौ स्याताम्, तदा व्यभिचारी भवति।

2. जातकस्य जातिकायाः वा जन्मांगे अष्टमभावे दशमभावे वा शुक्रबुधौ, तदा व्यभिचारी भवति।

---

15. बृहत्पाराशरहोराशास्त्रम् - 82/26,28,35
16. जातकपारिजातः -16/33
17. सारावली - 46/20
18. जातकालङ्कारः -3/17

3. जातकस्य जातिकायाः वा जन्मांगे शुक्रभौमौ सप्तमे दशमे वा भावे स्यतान्तदा व्यभिचारी भवति।
4. जातकस्य जातिकायाः वा जन्मांगे शुक्रभौमौ चतुर्थे दशमे वा स्यातां तदा व्यभिचारी भवति।
5. यदि जन्मांगे चन्द्रात् दशमभावे शुक्रः भवेत्तदा व्यभिचारी योगः भवति।
6. यदि जन्मांगे शनैश्चरात् चतुर्थभावे शुक्रः भवेत्तदा व्यभिचारी योगः भवति।
7. सप्तमभावे दशमभावे वा बुधशुक्रशनैशचराः स्युः, तदाऽपि व्यभिचारी भवति।
8. जन्मांगस्थशुक्रः स्वगृही भवेत्तदापि व्यभिचारी भवति।
अपि च-

**राहावष्टमभावस्थे कुरूपा पतिवर्जिता।**
**कठोरहृदया रोगैर्युक्ता च व्यभिचारिणी ।।**[19]

9. जातिकायाः जन्मकुण्डल्यां यदि राहुः अष्टमभावे स्यात् तदा सा कुरूपा, पतिसुखोज्झिता, दुःस्वभावाः, रोगिणी व्यभिचारिणी च भवति ।

**स्त्रीजन्मलग्नान्मदगे शशांके शुक्रारयुक्ते यदि जातकन्या ।**
**सा पत्यनुज्ञापरगामिनी स्यात्सौराराभांशोपगते तथैव ।।**[20]

10. स्त्रीकुण्डल्यां जन्मलग्नात् सप्तमभावे चन्द्रशुक्रभौमाः स्युः तदा सा व्यभिचारिणी भवति ।
11. जातिकायाः जन्मकुण्डल्यां यदि चन्द्रः शनिभौमनवांशगतं स्यात् तदापि सा व्यभिचारिणी परगामिनी वा भवति ।

**सौरारगृहे तद्वच्छशिनि सशुक्रे विलग्नगे जाता ।**
**मात्रा साकं कुलटा क्रूरग्रहवीक्षिते भवति ।।** [21]

12. लग्ने शनिभौमयोः राशयः ( मेषवृश्चिकमकरकुम्भाः ) स्युः, तत्र चन्द्रशुक्रौ भवेताम् तथा पापग्रहदृष्टिः लग्ने भवेत् तदा कुलाचारगुणैर्विहीना मात्रा सार्धं पुत्र्यपि व्यभिचारिणी स्यात् ।

**शुक्रासितौ यदि परस्पर भागसंस्थौ शौक्रे च दृष्टिपथगावुदये घटांशे ।**
**स्त्रीणामतीव मदनाग्निमदवृद्धिः स्त्रीभिः शमं च पुरूषाकृतिभिर्लभन्ते ।।**[22]

13. शनिशुक्रौ अन्योन्यं नवांशगतं स्यात् ।
14. शौक्रे लग्ने वृषतुलोदये कुम्भनवांशः भवेत्तथा च शनिशुक्रावपि परस्परं नवांशगतौ दृष्टिसम्बन्धिनौ च स्याताम् ।
अनयोर्योगयोः पुरुषोऽपि पुरुषेण साकं स्त्रीणामपि स्त्रीभिः साकं वाऽप्राकृतिकसाधनैः कामवासनां शमं नयतीति विशेषोऽवगन्तव्यः ।

---

19. बृहत्पाराशरहोराशस्त्रम् - 82/33
20. जातकपारिजातः - 16/31
21. सारावली - 46/19
22. सारावली - 46/14

**वीर्यरोग एवं क्लीबत्वादियोगाः –**

स्वप्नदोषशीघ्रपतनधातुक्षयादयः वीर्यरोगाः सन्ति, तथा सन्तानोत्पादने पुरूषस्याक्षमत्वं क्लीबत्वमित्युच्यते। एते रोगाः अधोलिखितानां ग्रहयोगानां प्रभाववशेन भवन्ति। तद्यथा-

**स्यादार्तिः पञ्चशाखे तदनु दशमगे सूर्यसूनौ सिताढ्ये**
**क्लीबः स्यात्सूर्यसूनौ व्ययरिपुगृहगे शुक्रतः क्लीबरोगः ।।**[23]

1. जन्मांगे दशमभावस्थे शुक्रशनिभ्यां युतिः भवेत्, तदा जातकः नपुंसकः जायते ।
2. यदि शुक्रात् षष्ठभावे द्वादशभावे वा शनिः स्यात्, तदा जातकः क्लीबरोगेण युक्तः जायते ।

**अपि च अन्यः क्लीबयोगः-**

**अन्योऽन्यं यदि पश्यतः शशिरवी यद्यार्किसौम्यावपि**
**वक्रो वा समगं दिनेशमसमे चन्द्रोदयौ चेत्स्थितौ ।।**
**युग्मौजर्क्षगतावपीन्दुशशिजौ भूम्यात्मजेनेक्षितौ**
**पुंभागे सितलग्नशीतकिरणाः क्लीबयोगास्त्विमे ।।**[24]

3. समविषमराशिगतौ सूर्यचन्द्रौ यदा परस्परं पश्यतः, तदा जातकः पौरुषत्वहीनः क्लीबः वा जायते ।
4. समविषमराशिगतौ शनिबुधौ यदा परस्परं पश्यतः, तदापि जातकः क्लीबः जायते ।
5. विषमराशिगतः भौमः यदि समराशिगतं सूर्यं पश्यति, तदा जातकः क्लीबो जायते ।
6. विषमराशिगतौ लग्नचन्द्रौ समराशिगतेन भौमेन दृष्टः, तदा जातकः क्लीबो जायते ।
7. समविषमराशिगतौ चन्द्रबुधौ यत्र-तत्रावस्थितेन भौमेन दृष्टः, तदा जातकः क्लीबः जायते ।
8. विषमराशिगताः विषमनवांशस्थाश्च लग्नचन्द्रशुक्राः यदा स्युः, तदा क्लीबत्वं भवति । अनेन प्रकारेण षट् क्लीबयोगाः अत्र प्रदर्शिताः ।

**षष्ठेशो देहसम्बन्धी बुधः षष्ठगतो यदि।**
**बुधक्षेत्रे च जननं यस्य स स्त्रीनपुंसकः ।।** [25]

बुधस्थानेन शनिना पुंनपुंसकता भवेत् ।

9. षष्ठभावे शनिबुधौयुतिः स्यात्, तदा क्लीबत्वं भवति ।
10. बुधराशिगतः षष्ठेशः लग्ने तथा लग्नेशः षष्ठभावे यदि भवेत् तदापि क्लीबत्वं भवति ।
11. विषमराशिगतः शुक्रः लग्ने स्यात्, तदा वीर्यविकारो भवति ।
12. चतुर्थभावे शनिचन्द्रौ स्याताम्, तदा वीर्यविकारो भवति ।
13. कन्यालग्ने शनिबुधयोः दृष्टिः भवेत्, तथा शुक्रः शनेश्चरस्य राशौ स्यात् तदा शीघ्रपतनं भवति ।
14. यदि अष्टमभावे शनिः षष्ठभावे भौमः तथा द्वितीयभावे सूर्यः स्यात्, तदा स्वप्नदोषः भवति ।

---

23. जातकालङ्कारः 3/28
24. बृहज्जातकम्- 4/13
25. जातकपारिजातः 3/33

**गुदारोगः-**

गुदारोगेषु अर्शभगन्दराघातशोफादि प्रमुखरोगाः सन्ति । एतेषां रोगाणां निम्निलिखिताः ग्रहयोगाः भवन्ति। तद्यथा-

**रिष्फस्थानस्थितचेद्विबुधपतिगुरूर्गुप्तरोगी नितान्तं**
**भूमिमार्तण्डपुत्रौ व्ययभवनगतौ शत्रुगौ वा व्रणी स्यात् ।** [26]

1. जन्मकाले देवगुरुः बृहस्पतिः द्वादशभावे स्यात्, तदा जातकः अवश्यमेव गुदालिंगादौ रोगी जायते ।
2. षष्ठभावे द्वादशभावे वा शनिभौमौ युतौ भवेताम्, तदा गुदास्थाने व्रणः स्यात् ।

**लग्नेशभूपुत्रशशांकपुत्राः सह स्थिताः सौम्यतरान्यभावाः।**
**अपानरोगं त्वथाऽपवित्रं पश्यन्ति षष्ठं मुनयोः वदन्ति।।**[27]

3. षष्ठभावे लग्नेशभौमबुधानां दृष्टिः भवेत् ।
4. जन्मांगे लग्नेशभौमबुधाः अशुभभावे पापाक्रान्तभावे वा स्युः ।

**शोफभगन्दररोगैः सन्तप्तो बन्धुभिः सह विरक्तः।**
**कर्कटके दिननाथे भौमेन निरीक्षिते पिशुनः।**[28]

5. कर्कराशिगते सूर्ये भौनस्य दृष्ट्या अर्शभगन्दरादिविविधारोगाः भवन्ति ।

अपि च-

**कुष्ठभगन्दररोगैरभितप्तं ह्स्वजीवितं निधने।**
**सर्वारम्भविहीनं जनयति रविजं सदा ।।**[29]

6. यदि अष्टमभावे शनिः स्यात् तदा कुष्ठभगन्दरादिरोगाः भवन्ति ।
7. अष्टमभावे पापग्रहयुतः षष्ठेशः स्यात्, तदा जातकः गुदार्तो भवेत् ।

।। इति दिक्।।

---

26. जातकालङ्कारः 3/9
27. जातकपारिजातः 6/71 तथा अध्यायः -13/77
28. सारावली - 22/29
29. सारावली - 30/81

# शुक्लयजुर्वेदीय रुद्राष्टाध्याय्यां ज्यौतिषम्

**डॉ.वेदप्रकाशपाण्डेयः**
ज्योतिषाचार्यः
राजकीय-संस्कृत-महाविद्यालयः,
क्यार्टूः, शिमला, हिमाचलप्रदेशः

संस्कृतवाङ्मयं सम्पूर्णविश्ववाङ्मयसमुदाये मूर्धन्यमिति। अस्य हि विस्तृतं सुसमृद्धञ्च सर्वाङ्गपूर्णं कलेवरं सर्वानपि विस्मापयतीति नैवात्युक्तिः। अत्रत्यो हि शाश्वतः सार्वभौमश्च ज्ञाननिधि-रनादिकालादारभ्य वर्तमानयुगपर्यन्तमप्यनवरतररूपेणोपचीयमानो दृश्यते । वाङ्मयमिदमेवादाय-

"**यन्नेहास्ति न चान्यत्र यदिहास्ति न तत्क्वचित्**"[1] इत्युक्तिश्चरितार्था दृश्यते। पुरुषार्थ-चतुष्टयसिद्धिरेवास्यवाङ्मयस्य चरमं लक्ष्यम्। तत्र धर्मो हि बुद्धेर्विषयः। अर्थश्च शरीरविषयः। कामस्तु मनसो विषयः भोगलक्षणः। मोक्षस्तु आत्मनो विषयः चरमनिवृत्तिलक्षणः। समस्तमपि वाड्मयं मूलतश्चत्वारो वेदास्तस्य षडङ्गानि पुराणं न्यायो मीमांसा धर्मशास्त्रञ्चेति चतुर्दशधा विभक्तमस्ति। तेषाञ्च शाखाः प्रशाखाः सहस्त्रधा विभक्ताः। मूलतश्चत्वारो वेदाश्चतस्त्रो मूलसंहिता वा ऋग्यजुसामाथर्वाख्याः। सर्वधर्माणां मूलो वेदः। यथोक्तं मनुना[2]- **वेदोऽखिलो धर्ममूलम्**। वेदस्य षडङ्गानि सन्ति । पाणिनीयशिक्षायां लिखितम् [3]-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।**

ज्योतिषं वेदस्य नयनम् । भास्कराचार्येण तु ज्योतिषस्य महत्त्वमित्थं कथितम् [4]-

**वेदश्चक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।**
**संयुतोपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः ।।**

अपरिमिते गगनमण्डले यानि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव ज्योतिः शब्देनोच्यन्ते। ज्योतिषशास्त्रं वेदस्यैव भागं सिद्धमेवेदम् । अतः वेदेषु ज्योतिषोल्लेखः यत्र कुत्रापि प्राप्यत एव। वेदस्य महत्त्वपूर्णांगं ज्योतिषम्। तत्र गगनमण्डलस्य सूर्यचन्द्रयोः नक्षत्राणां मासानामृतुनां वर्णनं समुपलभ्यते।

---

1. प्रकीर्णे
2. मनुस्मृतिः-२/६
3. पाणिनीयशिक्षा श्लो.सं. ४१-४२
4. सिद्धान्तशिरोमणिः मध्यमाधिकारः कालमाना. श्लो.सं. ११

आकाशते द्योतते इत्याकाशः। अन्तरिक्षमधिकृत्य यजुर्वेदे वर्णनं दृश्यते [5]-

**नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः ।**

वेदेषु युगादिविषयेऽपि चर्चा लभ्यते । यथा[6] -

**देवानां पूर्वे युगे सतः सदजायत ।**

तैत्तिरीयसंहितायां तु द्वादशमासानां नामान्यपि लिखितानि सन्ति[7]-

**मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्च ।।**

तत्रैव ऋतुनां व्यवस्थाऽपि कथिता । यथा[8]-

**मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतु नभश्च नभस्यश्च वार्षिकावृतु इषश्चोर्जश्च शरदावृतु सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू।**

तद्यथा अस्मिन् चक्रे द्रष्टव्यम् -

| **वैदिकमासाः** | **लौकिकमासाः** | **ऋतुनामानि** |
|---|---|---|
| मधु-माधव | चैत्र-वैशाख | वसन्त |
| शुक्र-शुचि | ज्येष्ठ-आषाढ | ग्रीष्म |
| नभ-नभस्य | श्रावण-भाद्रपद | वर्षा |
| इष-ऊर्ज | आश्विन्-कार्तिक | शरद |
| सह-सहस्य | मार्गशीर्ष-पौष | हैमन्त |
| तप-तपस्य | माघ-फाल्गुन | शिशिर |

दिवसस्य प्रातः-संगव-मध्याह्न-अपराह्ण-सांयभेदात् पञ्चभागाः तत्र निर्दिष्टाः। यथाकालं कृत्यान्यपि विभक्तानि सन्ति। यथा प्रातःकाले होमादिकार्याणि, पूर्वाह्णे देवादिपूजनं, मध्याह्ने पितृकर्म, अपराह्णे भोजनादि तथा सांयकाले सायंतनकृत्यानि कथितानि। तैत्तिरीयब्राह्मणे तु मुहूर्तानां नामान्यपि लिखितानि। ऋग्वेदे सूर्यस्य राहुणाऽऽछादनमप्युक्तम्[9] -

**यं वै सूर्यं स्वर्भानुस्तमसाऽविध्यदासुरः।**

अथर्ववेदे आकाशीयनक्षत्रपिण्डानां वर्णनं कृतम्[10] -

**चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि ।**

---

5. यजुर्वेदः- १६/६५
6. ऋग्वेदः-१०.७२.१२
7. तैत्तिरीयोपनिषद् ४.१.१४
8. तत्रैव - ४.४.४
9. ऋग्वेदः - ५.४०.५९
10. अथर्ववेदः - १९.७.१

पुनश्च तत्र चन्द्राधिष्ठितानां नक्षत्राणां प्रार्थना वर्तते[11] –
**यानि नक्षत्राणि दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु ।**
**प्रकल्पयंश्चन्द्रमा यान्येतानि सर्वाणि ममैतानि शिवानी सन्तु ।।**

अत्र नक्षत्राणां संख्याऽपि अष्टाविंशत्येव कथिता[12]-
**अष्टाविंशानि शिवानी शग्मानि सह योगं भजन्तु मे.......**

यजुर्वेदेऽपि ज्योतिषसम्बन्धितानि बहुविधप्रसंगानि सन्ति। यजुषः शुक्लकृष्णाख्यौ द्वौ भागौ। शुक्लयजुर्वेदीयसंहितायाः मुख्यांशः रुद्राष्टाध्यायी। उपनिषत्सु, स्मृतिपुराणमीमांसासूत्रेषु अस्या उल्लेखः प्राप्यते। अत्र दशाध्यायानां संग्रहो वर्तते। आदित अष्टमाध्यायपर्यन्तं मूल-मन्त्रभागः। अन्तिमौ द्वौ अध्यायौ शान्तिपाठरूपेण संगृहीतौ।

शुक्लयजुर्वेदीयरुद्राष्टाध्यायामपि ज्योतिषोल्लेखोऽस्ति यस्य वर्णनम् अस्माकं ज्योतिषग्रन्थेषु दृश्यते। यथा पुरुषसूक्तस्य एकस्मिन् सुप्रसिद्धमन्त्रे चन्द्रसूर्यादीनामुत्पत्तिः कथिता। तद्यथा[13]-

**चन्द्रमा मनसो जातश्च्चक्षोः सूर्योऽअजायत।**
**श्श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत।।**

सिद्धान्तज्योतिषस्य सुप्रसिद्धग्रन्थे सूर्यसिद्धान्तेऽपि एवमेव कथितम्[14]-

**अथ सृष्टयां मनश्चक्रे ब्रह्माऽहंकारमूर्तिभृत् ।**
**मनसश्चन्द्रमा जज्ञे सूर्योऽक्ष्णोस्तेजसां निधि : ।।**

फलितज्योतिषग्रन्येष्वपि मनसा चन्द्रसम्बन्धः कथितः। यथा बृहज्जातके लिखितम्[15]-

**कालात्मा दिन्कृन्मनस्तुहिन्गुः सत्वं कुजो ज्ञो वचो........**

इत्थमेव सारावल्याम्[16] -

**आत्मा रविः शीतकरस्तु चेतः सत्त्वं धराजः शशिजोऽथ वाणी........**

अस्माकं सर्वेषु शुभकार्येषु यात्राविवाहोत्सवादिषु चन्द्रबलशुद्धिरेव दृश्यते । विवाहमेलापकेऽपि तत्र चन्द्रराशिवशादेव मिलानं भवति न तु लग्नवशात् । यथोक्तम् [17]-

**जन्मलग्नमिदमंगमंगिनां मेनिरे मन इतीन्दुमन्दिरम् ।**

---

11. अथर्ववेदः - १९.७.१
12. तत्रैव-१९.८.२
13. रुद्राष्टाध्यायी २. १२
14. सूर्यसिद्धान्तः १२.२२
15. बृहज्जातकम्- २.१
16. सारावली ४.१
17. विवाहवृन्दावनम् २.१

**सौहृदं हि मनसोर्न देहयोर्मेलकस्तदयमिंदुगेहयोः।।**

तत्र कारणं वर्तते यन्मैत्री मनसो भवति। वैवाहिकजीवनस्य सफलतायै वर-वध्वोर्मध्ये मैत्री परमावश्यकी। अतस्तत्र मनसा सम्बन्धत्वाच्चन्द्रबल एव दृश्यते ।

"**चन्द्रमा मनसो जातः**[18]**.......**अस्य वेदमन्त्रस्यैव अयं सिद्धान्तः फलितज्योतिषग्रन्थेषु सर्वत्र दृश्यते। अत्र वेदमन्त्रे चक्षुषा सूर्यसम्बन्धः कथितः। फलितज्योतिषग्रन्थेष्वपि यत्र तत्र नेत्रेण सूर्यसम्बन्धो लिखितः। यथा यदि जन्मांगचक्रे सूर्यो दोषयुक्तस्तदा नेत्रे दोषो भवत्येव।

पुनश्च रुद्राष्टाध्याय्यां मैत्रसूक्ते आत्मना सूर्यः सम्बन्धः कथितः[19]-

**आप्प्राद्यावापृथिवीऽअन्तरिक्षं सूर्यऽआत्त्मजगतस्तस्त्थुषश्च.......**

इत्थं पूर्वमेवोक्तं ज्योतिषग्रन्थेषु यथा मनसा चन्द्रमसः सम्बन्धः कथितस्तद्वदेव आत्मना सूर्यस्य सम्बन्धः । यथा- **आत्मा रविः शीतकरस्तु चेतः**[20] **.......**। पुनश्च पुरुषसूक्तस्य एकस्मिन्मन्त्रभागे अहोरात्रपदो वर्तते । यथा[21] -

"**श्रीश्च्चते लक्ष्मीश्चपत्कन्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौव्यात्तम्.....**

ज्योतिषशास्त्रस्य होरास्कन्धे अहोरात्रपदस्य अत्यधिकं महत्त्वं वर्तते । यथा[22]-

**होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।**
**कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति ।।**

अर्थादहोरात्रशब्दस्य आदिवर्णस्य अकारस्य तथा अन्तिमवर्णत्रकारस्य लोपाद् 'होरा' शब्दस्य निष्पत्तिर्भवति। होराशास्त्रस्य ज्ञानादेव जातकस्य शुभाशुभकर्मफलनिर्णयः कर्तुं शक्यते। अत्रोक्तवेदमन्त्रे तु नक्षत्रोल्लखोऽपि कृतः । यथा[23] -"**नक्षत्राणि रूपमश्विनौ.........**

ज्योतिषग्रन्थेषु अष्टाविंशतिनक्षत्राणामुल्लेखस्तु प्राप्यत एव पुनश्च तत्र उल्लेखो वर्तते यन्नक्षत्रचन्द्रादिषु सूर्यस्य प्रकाश एव देदीप्यमानं भवति । रुद्राष्टाध्याय्यां मैत्रसूक्ते कथितम्[24]-

"**तरणिर्व्विश्श्वदर्शतोज्योतिष्कृदसि सूर्य्यः...........**

अयमेव सिद्धान्तो वर्तते यदस्माकं भूवैज्ञानिकाः कथयन्ति यच्चद्रमसि स्वप्रकाशो न विद्यते अपितु सूर्यस्य प्रकाशादेव चन्द्रो भासते। आचार्यवराहमिहिरस्तु अस्मिन्विषये बृहज्जातकस्य मंगलाचरणे एव कथयति[25]-

---

18. रुद्राष्टाध्यायी- 2/12, पुरुषसूक्तम्-12
19. रुद्राष्टाध्यायी - ४.७
20. सारावली-४.१
21. रुद्राष्टाध्यायी- २.२२
22. बृहज्जातकम् - १.३
23. रुद्राष्टाध्यायी- २.२२
24. रुद्राष्टाध्यायी - ४.१०
25. बृहज्जातकम् - १.१

**मूर्तित्वे परिकल्पितः शशभृतो वर्त्माऽपुनर्जन्मना-**
**मात्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषाम् ।।**
**लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ ।**
**वाचं नः स ददात्वनेककिरणैस्त्रैलोक्यदीपो रविः ।।**

अर्थात् स सूर्यः चन्द्रमसि मूर्तरूपेण (प्रकाशरूपेण) विद्यमानो वर्तते। रुद्राष्टाध्याय्यां दिशां मासादिनामुल्लेखोऽपि प्राप्यते। दिक्साधनं, मासनिर्णयादयः ज्योतिषशास्त्रस्य महत्त्वपूर्णविषयाः सन्ति। यथा रुद्राष्टाध्याय्यां पञ्चमाध्याये दिशां नामानि कथितानि[26]-

**नमोऽस्तु रुद्रभ्यो ये दिवि येषांव्वर्षमिषवः।**
**तेभ्योदशप्राचीर्द्दशदक्षिणादशप्रतीचीर्द्दशोदीचीर्द्दशोर्ध्वा :।।**

पुनश्चाष्टमेऽध्याये द्वादशमासानां नामान्यपि कथितानि । तद्यथा[27]-

**"व्वाजायस्वाहाप्प्रसवायस्वाहाऽपिजायस्वाहाक्क्रतवे स्वाहाव्वसवे स्वाहाऽहर्प्पतये स्वाहाव्वसवे स्वाहाऽहर्प्पतयेस्वाहा ह्नेमुग्ग्धायस्वाहाव्वैनंशिनायस्वाहाव्विनंऽशिनऽआन्त्याय स्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतये स्वाहाधिपतये स्वाहाप्प्रजापतये स्वाहा ।।**

अत्र क्रमशः चैत्रवैशाखज्येष्ठाषाढादीनां द्वादशमासानामुल्लेखः क्रियते । यथा –

वाजाय= चैत्राय, प्रसवाय=वैशाखाय, अपिजाय= ज्येष्ठाय, क्रतवे= आषाढाय, वसवे= श्रवणाय, अहर्पतये=भाद्रपदाय, मुग्धाय= आश्विनाय, अमुग्धाय वैनं शिनाय=कार्तिकाय, अविनंशिने आन्त्यायनाय = मार्गशीर्षाय, आन्त्याय भौवनाय = पौषाय, भुवनस्य पतये= माघाय, अधिपतये=फाल्गुनाय ।

एवं सिद्ध्यति यत् सम्पूर्णे वैदिकवाङ्मये तु अस्त्येव परन्तु शुक्लयजुर्वेदीयरुद्राष्टाध्याय्यामपि बहुषु स्थलेषु ज्योतिषशास्त्रे प्रयुक्तानां शब्दानामुल्लेखः प्राप्यते। इति दिक्।।

---

26. रुद्राष्टाध्यायी- ५.६४
27. रुद्राष्टाध्यायी - ८.२८

# प्रश्नस्याद्याक्षराल्लग्नज्ञानम्

**वेदप्रकाशपाठकः**
फलितज्योतिषाचार्यः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः-517502

ऋषिमुनिभिः भूरि-भूरिशब्दैः मण्डितमभिनन्दितञ्चास्ति वेदस्य चक्षुर्भूतमिदं ज्योतिषशास्त्रम्। शास्त्रस्यास्य ज्ञाता पुरुषार्थचतुष्टयसम्पन्नो भवति। आचार्यगर्गेण विषयस्यास्य महत्त्वप्रतिपादनावसरे निगदितम्-

**म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम् ।**
**ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्-द्विजः ।।** [1]

अर्थात् म्लेच्छाः अपि शास्त्रमिदं ज्ञात्वा ऋषिवत् पूज्यन्ते तर्हि अन्येषां जनानां का कथा? शास्त्रस्यास्याधिकारी कः भवितुमर्हतीति विषये वदन्ति आचार्याः-

**ज्योतिषशास्त्रविदग्धो गणितपटुवृत्तवांश्च सत्यवचाः ।**
**विनयी वेदाध्यायी ग्रहयजनपटुश्च भवतु दैवज्ञः ॥**
**दैवविदेवम्भूतो यद्वदति फलं शुभाशुभं प्रष्टुः ।**
**तत्सर्वं न च मिथ्या भवति प्राज्ञैस्तथा चोक्तम् ॥**
**दशभेदं ग्रहगणितं जातकमवलोक्य निरवशेषं यः।**
**कथयति शुभमशुभं वा तस्य न मिथ्या भवेद्वाणी ॥**
**अनेकहोरातत्त्वज्ञः पञ्च सिद्धान्तकोविदः ।**
**उहापोहपटुः सिद्ध मन्त्रो जानाति जातकम् ।।**[2]

एवम्भूतः जनः एव कुशलदैवज्ञः भवति। ज्योतिषशास्त्रमिदं सिद्धान्तसंहिताहोरेति रूपेण स्कन्धत्रयाधिष्ठितं वर्तते। परञ्च केचन् आचार्याः तान् भेदान् अतिरिच्य "प्रश्नशास्त्रम्" इत्यपरशास्त्ररूपेण स्वीक्रियन्ते। अद्य इदानीमेवम्भूतस्य प्रश्नशास्त्रस्य महत्त्वप्रतिपादयितुं "प्रश्नाद्याक्षरलग्नज्ञानं" इति विषयं स्वीकृत्य स्वीयमभिमतम् उपस्थापयामि। प्रश्नकुण्डल्यां प्रष्टुः प्रश्नवाक्यस्य प्रथमाक्षरेण लग्नं विज्ञाय शुभाशुभफलं प्रश्नशास्त्रविद्भिः विवेचनीयम्। तद्यथा-

**प्रष्टुवाक्यादिवर्णेन लग्ने संगृह्य चामुना ।**
**वाच्यं शुभाशुभं सर्वं तत्कारोऽथ कथ्यते ।।** [3]

---

1. प्रश्नमार्गः 1/14
2. प्रश्नमार्गः 1/15-18
3. प्रश्नमार्गः 2/110

इदानीं श्रीभट्टोत्पलमतानुसारं वर्गपद्धति उपस्थाप्यते। अत्र क्रमशः वर्ग-वर्गाधिपतिविषयः उपस्थापितो विद्यते। अयं सिद्धान्तः प्रश्नाद्याक्षरात् प्रश्नोत्तरप्रदाने महद् योगदानं करोति। सामान्यरूपेण दैवज्ञाः पञ्चाङ्गेषु प्रदत्तलग्नसारिणीद्वारा लग्नं निर्धारितं कृत्वा प्रश्नोत्तरं प्रयच्छन्ति। परन्तु अनेन सिद्धान्तेन एककालावच्छेदेन बहूनां प्रश्नकर्तृणां समाधानं सम्यक्तया भवितुं नार्हति। अतः भट्टोत्पलदैवज्ञस्यायं सिद्धान्तः सर्वथा सूक्ष्मः दैवज्ञानां कृते परमाह्लादकारकश्च विद्यते। प्रसङ्गादत्र प्रश्नाद्यवर्णात् ग्रहज्ञानं राशिज्ञानञ्च कथं भवतीति निरूप्यते। तद्यथा-

**अकचटतपया वर्गा रविकुजासितसौम्यजीवसौराणाम् ।**
**चन्द्रस्य च निर्दिष्टं प्रश्ने प्रथमोद्भवं वर्णम् ।।**
**ज्ञात्वा तस्माल्लग्नं संगृह्य शुभाऽशुभं वदेत्प्रष्टुः ।**
**वर्गादिमध्यचरमैर्वर्णैः प्रथमोद्भवैर्विषमम् ।।**
**राशि लग्नं प्रवदेच्छिष्टैर्युग्मं कुजज्ञजीवानाम् ।**
**सितरविजयोश्च नैवं रविराशिनोरेकराशित्वात् ।। ।।**
**तस्माल्लग्नात्प्रवदेत् पृच्छासमये शुभाऽशुभं सर्वम् ।**
**कालस्य विज्ञानादेतच्चिन्त्यं बहुप्रश्ने ।।**[4]

अर्थात् एते रविकुजासितसौम्यजीवसौरचन्द्र-ग्रहाः क्रमशः अवर्ग-कवर्ग-चवर्गादि-वर्गाणामधिपतयः भवन्ति। अत्रेदानीमवधेयं यत् सूर्यचन्द्रौ विहाय अन्येषां समेषां पञ्चताराग्रहाणामाधिपत्यं द्वयोः-द्वयोः राश्योपरि भवति। अतः अत्र विचारणायावसरो वर्तते यत् कः राशिः कस्य वर्गस्याधिपत्यं करोति? विषयेऽस्मिन् उच्यते यत् युग्मवर्णस्य विचारः युग्मराशिना, ओजवर्णस्य विचारः ओजराशिना कर्तव्यः। अत्र अवर्गस्य समेषां वर्णानां स्वामी सूर्यः,यवर्गस्य समेषां वर्णानां स्वामी चन्द्रः अवगन्तव्यः। यतः सूर्य-चन्द्रौ एकैकस्य राशेः अधिपतित्वं कुरुतः। भौमादयः पञ्चताराग्रहाः द्वयोर्द्वयोः राश्योः आधिपतित्वं कुर्वन्ति। अतः प्रश्नाद्याक्षरात् लग्ननिर्धारणार्थं तेषां भौमादिपञ्चताराग्रहाणां निर्दिष्टवर्गस्य सम-विषमवर्णानुसारं राशिः अथवा लग्नस्य निर्धारणं कर्तव्यम्। यथोदाहरणं प्रस्तूयते।

तद्यथा-**'ट'वर्गस्य स्वामी बुधः वर्तते। तर्हि टवर्गस्य ट,ड,ण इत्येषां प्रथम-तृतीय-पञ्चम-(विषम)अक्षराणां विचारः मिथुन-राशिना एवं ठ,ढ इत्यनयोः द्वितीय-चतुर्थ-(सम) अक्षरयोः विचारः कन्याराशिना करणीयः। यतः बुधस्य एकः राशिः मिथुनः विषमः तथा अपरः कन्याराशिः समः वर्तते।**

एवमेव यदि प्रश्नकर्तुः प्रश्नाद्यक्षरः क वर्तते, तर्हि **अकचटतपया वर्गा रविकुजासित-सौम्यजीवसौराणाम् । चन्द्रस्य च निर्दिष्टं प्रश्ने प्रथमोद्भवं वर्णम्** इत्यनुसारं कवर्गस्य स्वामी मङ्गलः सञ्जातः। मङ्गलः द्वयोः राश्योरधिपतिर्भवति। लग्नस्थने कः राशिः भवेदिति जिज्ञासायामुच्यते यत् भौमादि पञ्चताराग्रहाणां निर्दिष्टवर्गाणां प्रथम-तृतीय-पञ्चमवर्णानां विषमराशिः तथा अवशिष्टयोः द्वितीय-

4. प्रश्नमार्गः 2/111-114

चतुर्थवर्णयोः समराशिः । यथा काद्यक्षरादुच्चार्यमाणस्य प्रश्नस्य कृते मेषराशिः, ख अक्षरादुच्चार्यमाणस्य प्रश्नस्य कृते वृश्चिकराशिः, पुनः ग अक्षरादुच्चारिते प्रश्ने कवर्गस्य विषमस्थाने स्थितत्वात् तदधिपतिः मेषराशिः, तद्वदेव घकाराद्यक्षरस्य वृश्चिकराशिः, एवमेव ङकारस्य विषम (पञ्चम)स्थानीयत्वात् मेषराशिः अवगन्तव्यः। एवं प्रकारेण निम्नलिखितचक्रानुसारेण अन्येषामपि अक्षराणां राशिनिर्द्धारणं कर्तव्यम्।

| वर्गः/स्वामी | क्रमः | विषयः | समः | विषमः | समः | विषमः |
|---|---|---|---|---|---|---|
| अ-वर्गः (सूर्यः) | अक्षरलग्नम् | अ,आ,इ,ई, सिंहः | उ,ऊ,ऋ, सिंहः | ॠ,लृ, सिंहः | ए,ऐ,ओ,औ, सिंहः | अं,अः, सिंहः |
| क-वर्गः (भौमः) | अक्षरलग्नम् | क,कि,कु,के, को, मेषः | ख,खी,खू,खे, खो, वृश्चिकः | ग,गी,गु,गे,गो, मेषः | घ,घि,घु,घे, घो, वृश्चिकः | ङ मेषः |
| च-वर्गः (शुक्रः) | अक्षरलग्नम् | च,चि,चु,चे, चो, वृषः | छ,छि,छु,छे, छो, तुला | ज,जि,जु,जे, जो, वृषः | झ,झि,झु,झे, झो, तुला | ञ वृषः |
| ट-वर्गः (बुधः) | अक्षरलग्नम् | ट,टि,टु,टे,टो, मिथुनः | ठ,ठि,ठु,ठे, ठो, कन्या | ड,डि,डु,डे, डो, मिथुनः | ढ,ढि,ढु,ढे, ढो, कन्या | ण मिथुनः |
| त-वर्गः (गुरुः) | अक्षरलग्नम् | त,ती,तू,ते,तो, धनुः | थ,थि,थु,थे, थो, मीनः | द,दि,दु,दे,दो, धनुः | ध,धि,धु,धे, धो, मीनः | न,नी,नू,ने,नो धनुः |
| प-वर्गः (शनिः) | अक्षरलग्नम् | प,पी,पु,पे,पो, कुम्भः | फ,फि,फु,फे, फो, मकरः | ब,बि,बु,बे, बो, कुम्भः | भ,भी,भु,भे,भो मकरः | म,मी,मु,मे,मो कुम्भः |
| य, र, ल, व, श, ष, स, ह इत्येषां स्वामी (चन्द्रः) | अक्षरलग्नम् | य, यि, यु, ये, यो, कर्कः | र, रा, रि,रु, रे, रो कर्कः | ल, ला, लि, लु, ले, लो, कर्कः | व, वि, वु, वे, वो, कर्कः | |
| | | श, शि, शु, शे, शो | ष, षि, षु, षे, षो | स, सि, सु, से, सो | ह, हि, हु, हे ,हो | |

अनेन विधिना दैवज्ञः समेषां प्रश्नकर्तृणां प्रश्नद्वारा लग्ननिर्धारणं कृत्वा तदनुसारं शुभाशुभ -फलादेशस्य प्रवचनं कर्तुं शक्नोति। अत्रावधेयं यल्लग्ने वर्णानां ह्रस्व-दीर्घादिविचारः नैव क्रियते।

प्रश्नकुण्डलीनिर्माणे ग्रहाणां स्थापना दैनिकपञ्चाङ्गानुसारं भवति। एवं प्रकारेण प्रश्नमार्गादिग्रन्थेषु अन्येऽपि विधयः सन्ति येषां सहाय्यैः प्रष्टुणां प्रश्नानां समाधानं कर्तुं शक्यते। तत्र शब्दस्वरमाध्यमेनापि प्रष्टुणां प्रश्नानां समाधानविधिः वर्णितो वर्तते प्रश्नमार्गग्रन्थे। तद्यथा-

**श्रोत्रप्रियं वदति वा वचनं शुभं वा यद्वार्थपुष्टगिरिमस्खलितां तदानीम्।**
**प्रष्टाभियात्यभिमतं त्वितरोऽनभीष्टमन्ते विसर्गसहितं वचनं च वक्ता ।।**[5]

5. प्रश्नमार्गः 2/109

अर्थात् यदि प्रष्टा मधुरवाचं किञ्च शुभं भाषयति तर्हि तस्याभीष्टसिद्धिः भवतीति ज्ञेयः। वाचां स्पष्टता भवेत्तर्हि अपि अभीष्टप्राप्तिः भवति। परञ्च तद्वैपरीत्यावस्थायां अर्थात् कटुवाक्यमथवा विसर्गसहितं वाक्यं वदति चेत्तस्य अशुभं फलं ज्ञेयम्। अत्र विशेषोऽस्ति यत् विसर्गसहितं वाक्यं केवलं संस्कृतभाषायामेव भवति। संस्कृतभाषा भारतस्य सर्वतः प्राचीना भाषा विद्यते। इदं सर्वविदितं तथ्यं भारतस्य गौरवमयमितिहासं दृष्टवा सम्यक् ज्ञातुं शक्यते। प्रायः संस्कृते विर्सगान्तं, अनुस्वारान्तं पदं सामान्येन प्रयुज्यते। अतः "विसर्गसहितं वचनं च वक्ता" इत्युक्तिः सर्वथा चरितार्थी भवति। अनेन इदमपि सिद्धं भवति यत् प्रश्नमार्गग्रन्थस्य रचनाकाले रचनास्थले वा संस्कृतभाषायाः विपुलः प्रचारः प्रसारश्च आसीदिति। इदानीं रोगायुः प्रश्नसन्दर्भे उच्यते-

**आकाशवायुवह्न्यम्बुपूर्वं तद्गणपूर्वकम् । भूतार्थवाचकञ्चापि वचनन्न शुभप्रदम् ।।**[6]

अर्थात् प्रष्टाद्वारा उच्चारितप्रश्नस्य प्रथमाक्षरः यदि आकाशवायुवह्न्यम्बुसम्बन्धितो भवेदथवा प्रश्नस्य आद्याक्षरः भूतकालिकः भवेत् चेत् प्रश्नस्य फलमशुभं ज्ञेयम्। श्लोकेऽस्मिन् पृथ्वीतत्त्वं विहाय अन्येषां चतुर्णां तत्त्वानां फलं शुभं प्रतिपादितं वर्तते। पुनश्च यदि प्रश्नस्य प्रथमाक्षरः स्वरवर्णः भवति चेत् प्रष्टा दीर्घायुः भवति। अन्यथा प्रश्नस्य प्रथमाक्षरः हल् वर्णे सति प्रष्टा अनिष्टं प्राप्नोति।

प्रश्नसंग्रहग्रन्थानुसारं प्रश्नाद्यक्षरात् लग्ननिर्धारणस्य भिन्नः प्रकारः प्रदर्शितो विद्यते । तत्र क-वर्ग, च-वर्ग, ट-वर्ग, त-वर्ग, प-वर्ग, अन्तस्थ, उष्म-वर्गाणां ये वर्णाः सन्ति तान् वायु-अग्नि-इन्द्र-जल-नपुंसक तत्वैः विभज्य फ़लादेशस्य अभिनवः प्रकारः प्रदर्शितो विद्यते। यथा क-वर्गादि प्रत्येकेषां वर्गाणां प्रथमाक्षरस्य वायु-तत्त्वं, द्वितीयाक्षरस्य अग्नि-तत्त्वं, तृतीयाक्षरस्य इन्द्र-तत्त्वं, चतुर्थाक्षरस्य जल-तत्त्वं, पञ्चमाक्षरस्य नपुंसक-तत्त्वं अवगन्तवम्। अत्र इदमपि अवधेयं यत् अन्तस्थ-उष्म-वर्गयोः चत्वारः चत्वारः वर्णाः एव भवन्ति। अत्र अनयोः वर्गयोः पञ्चमाक्षरस्य अभावात् नपुंसक-वर्णाभावः अवगन्तव्यः। सुस्पष्टतया निम्नलिखितं चक्रं द्रष्टव्यम्-

| **तत्त्वम्** | **वायुः** | **अग्निः** | **इन्द्रः** | **जलम्** | **नपुंसकः** |
|---|---|---|---|---|---|
| **क-वर्गः** | क | ख | ग | घ | ङ |
| **च-वर्गः** | च | छ | ज | झ | ञ |
| **ट-वर्गः** | ट | ठ | ड | ढ | ण |
| **त-वर्गः** | त | थ | द | ध | न |
| **प-वर्गः** | प | फ | ब | भ | म |
| **अन्तस्थ वर्णाः** | य | र | ल | व | -- |
| **उष्म वर्णाः** | श | ष | स | ह | -- |
| **वर्णक्रमः** | **प्रथमाक्षरः** | **द्वितीयाक्षरः** | **तृतीयाक्षरः** | **चतुर्थाक्षरः** | **पञ्चमाक्षरः** |

6. प्रश्नमार्गः

अत्र प्रश्नकर्त्तुः प्रश्नः नपुंसकवर्णादाराभ्य भवेत् तदा तस्योत्तरं अशुभदमुक्तम्। एवमेव प्रश्नकर्त्तुः प्रथमाक्षरः वायु तथा अग्नि-तत्त्व संबन्धितो भवेत् तदापि फलमशुभमेव भवति। एवमेव इन्द्रतत्त्वान्तर्गत वर्णादारभ्य प्रश्नः भवेत् तदा तस्य मध्यमं फलमुक्तमस्ति। केवलं जलतत्त्वान्तर्गत वर्णादारभ्य प्रश्नः भवति चेत् फलं अतीव शुभदायकं प्रोक्तमस्ति। तद्यथा[7]-

**आद्यैस्स्वरैस्तु काद्यैश्च वर्गैभिन्ना लिपिर्द्विधा।**
**स्वरा जीवस्तनुर्वर्गा इति ज्ञेया च मातृका।।**
**प्रश्नवाक्यं स्वराद्यञ्चज्ज्ञेयं जीवगतं शुभम्।**
**दोषश्च देहविषयो हलाद्यं चेदतोऽन्यथा।।**
**वर्गेष्वक्षरपञ्चकं पवनवह्नीन्द्राम्बुना पुंसकम्।**
**वाक्यादौ तु नपुंसकाक्षरमतीवानिष्टदं पृच्छताम्।।**
**दुष्टौ मारुतपावकौ बलरिपुर्मध्यः प्रशस्तं जलम्।**
**दीर्घह्रस्वविभागतः स्वरगणाश्चाम्भोमहेन्द्रात्मकाः।।**

यद्यपि प्रश्नशास्त्रानुसारं फलादेशस्य अन्येऽपि बहवः प्रकाराः विभिन्नेषु प्रश्नग्रन्थेषु वर्तन्ते। तथापि प्रश्नमार्गग्रन्थः प्रश्नोत्तरप्रदाने सर्वथा समर्थोऽयं ग्रन्थः। एककालावच्छेदेन एकाधिकानां प्रश्नकर्तृनां समाधानं ऊपर्युक्तेन विधिना सम्यक्तया कर्तुं शक्नोति।

| सफलं गज-कूर्म-दैत्य-नाग-भूमिलक्षणम्- | | |
|---|---|---|
| **भूमिसंज्ञा** | **उच्चता** | **फलम्** |
| **गजपृष्ठभूमिः-** | दक्षिण-पश्चिम-नैऋत्य-वायुकोणेषु | धन-धान्य-आयुर्वृद्धिकरी |
| **कूर्मपृष्ठभूमिः-** | मध्ये उच्चं, चतुर्दिशं नीचं | शुभप्रदायिका |
| **दैत्यपृष्ठभूमिः-** | पूर्वाग्निशम्भुकोणेषु उच्चं-पश्चिमे नीचं | अशुभप्रदा |
| **नागपृष्ठभूमिः-** | पूर्व-पश्चिमयोर्दैर्घ्यं-दक्षिणोत्तरयोः उच्चता | अशुभप्रदा |

7. प्रश्नमार्गः -2/ 105-107

# देवासुराणामहोरात्रम्

**विभामिश्रा**
शास्त्रीतृतीयवर्षम्
केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः

अखिलब्रह्माण्डनायकस्य निःश्वासभूतः एवं समस्तज्ञानविज्ञानराशेः आकरोऽस्ति वेदः। एवं भूतस्य वेदस्य शिक्षा-व्याकरण-ज्योतिष-निरुक्त-कल्प-छन्दांसीति षडङ्गाः वर्तन्ते। तद्यथा[1] -

**शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ।**
**या तु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः ।।**

अत्रादौ एतेषामङ्गाणां संक्षिप्तपरिचयपुरस्सरं प्रयोजनमुपस्थाप्यते।

**शिक्षा-**

ऋग्वेदभाष्यभूमिकायां सायणाचार्यः शिक्षा इत्यस्य परिभाषावसरे भणति यत्- स्वरवर्णाद्यु-च्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते वा यत्र सा शिक्षा। तैत्तिरीयोपनिषदि शिक्षाविषये इत्थमुक्तं वर्तते यत्- **अथ शिक्षा व्याख्याप्यामः**। वर्णः स्वरः मात्रा बलं सामः सन्तानः इत्युक्तशिशक्षाध्याये। तत्र वर्णः अकारादिः। स्वर उदात्तादिः। मात्रा ह्रस्वादिः । बलस्थानप्रयत्नौ। सामनाषादादिः। सन्तानः विकषणादिः। एतद् बोधनमेव शिक्षायाः प्रयोजनमिति।

**कल्पम्-**

कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति कल्पम्। विष्णुमित्रः वदति यत् - **कल्पं नाम वेदविहितानां कर्माणामानुपूर्व्येण कल्पनाशस्त्रामिति**। अस्य चतुर्भेदाः वर्तन्ते। तद्यथा- श्रौत-गृह्य-धर्म-शुल्वसूत्रञ्चेति।

**व्याकरणम्-**

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणमिति। इति व्याकरणस्य सामान्यः व्युत्पत्तिः वर्तते। **रक्षोहागमलघ्वसन्देहा** इति पञ्चप्रयोजनानि प्रतिपादितानि वर्तन्ते। अनेन शास्त्रेण वैदिक-लौकिकशब्दानानां व्युत्पत्तिं कृत्वा तेषामर्थबोधः क्रियते।

**निरुक्तम्-**

निरुच्यते निःशेषेण उपविश्यते निर्वचनविधया तत्तदर्थबोधनाय पदजातं यत्र तत् निरुक्तम्। अस्य रचयिता यास्काचार्यः मन्यन्ते। अस्मिन् शास्त्रे वेदस्य क्लिष्टशब्दानां समावेशः वर्तते।

**छन्दः-**

छदि आच्छादने धातोः निष्पन्नोऽयं छन्दशब्दः मन्त्रप्रतिपाद्ययज्ञादीन् छादयत्यावृणोतीत्यर्थं द्योतयति। छन्दसः परिभाषा दुर्गाचार्यमहाभागेन एवं प्रकारेण दीयते यत्-

**यदेभिरात्मानमाच्छादयन् देवा मृत्योर्बिभ्यतस्तच्छन्दसां छन्दस्त्वम्।**

1. सि.शि.श्लो.१/७

**ज्योतिषम्-**

द्युतेरिसन्नादेश्चजः इत्युणादि सूत्रेण ज्वलति कर्माणो द्युति धातोः इसन् प्रत्यये दकारस्य जकारादेशे गुणे 'ज्यौतिः'इति शब्दस्य निष्पत्तिः भवति। ग्रहनक्षत्रतारादीनां प्रबोधजनकं शास्त्रं ज्यौतिषशास्त्रमिति। ज्योतिषशब्दोऽपि 'अधिकृत्य कृते ग्रन्थे' इति पाणिनीय सूत्रेण अण् प्रत्यये विहिते सिद्ध्यति। अतः द्वौ अपि पदौ साधुरेव वर्तेते। ननु ज्योतिषशास्त्रस्य वेदाङ्गत्वं कथमिति जिज्ञासायामाह भास्करेण स्वीये सिद्धान्तशिरोमणौ[2] -

**वेदास्तावद्यज्ञकर्मप्रवृता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**
**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्।।**

वेदस्य षडङ्गेषु नेत्रस्थानीयमिदं ज्योतिषशास्त्रम्। ननु तेषु कर्ण-घ्राण-नासिका-मुख-हस्तेत्यादिषु अङ्गेषु चक्षुःरूपेणैव कथं ज्योतिषशास्त्रमित्युच्यते प्रश्नमार्गे [3]-

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।**

वैदिककालात् प्रवर्धितमिदं शास्त्रं सिद्धान्त-संहिता-होरास्कन्धत्रयेषु विभक्तमस्ति। यस्मिन् स्कन्धे त्रुट्यादितः प्रलयान्तकालकलनादिमानप्रभेदाः, पलभा-तुरीयप्रभृतीनां यन्त्राणां विवेचनं, चन्द्रार्क-ग्रहणे उदयास्तमयौ, शृङ्गोन्नतीत्यादयः विषयाः वर्णिताः सन्ति। तादृशः स्कन्धः सिद्धान्तस्कन्धः उच्यते। यथोपदिष्टं भास्कराचार्येण[4] -

**त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमात्**
**चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ।।**

एवं भूतस्य कालविधानशास्त्रस्यान्तर्गते नवविधकालमानानि प्रदिपदितानि वर्तन्ते[5]। प्रस्तुतेऽस्मिन् लेखे एतेषु नवविधकालमानेषु देवासुरकालमानं सूर्यसिद्धान्तानुसारेण प्रतिपाद्यते। सुराणां देवानां न सुराणामित्यसुराणामन्योन्यं परस्परं विपर्ययात् अहोरात्रव्यवस्था भवति। अहोरात्रं पदद्वयात्मकं वर्तते। अहः नाम दिनं रात्रं नाम शर्वरीति। दिनेशस्य दर्शनात् दिनं, तस्य दर्शनाभावे रात्रिः सञ्जायते। सिद्धान्तशिरोमणावपि आचार्येण अयं अंशः स्पष्टीकृतः **"दिनं दिनेशस्य यतोऽत्र दर्शने तमी तमोहन्तुरदर्शने सति"**[6] ।

2. सि.शि.मध्य.काल./श्लो.९
3. प्रश्नमार्गः १/३६
4. सि.शि.मध्य.काल./श्लो.६
5. ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा। सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव।।
6. सि.शि.त्रिप्रश्न.श्लो.१०

वस्तुतः सूर्यस्य सर्वतः प्रशरनशीलाः किरणाः भूमौ यस्मिन् प्रदेशे पतति तावन् प्रदेशः समुज्ज्वलः अर्थात् तस्मिन् प्रदेशे अहः सम्भवति। तस्मात् विरुद्धदिशि रविकिरणाभावात् तमः नाम रात्रिः सञ्जायते। अस्मादेव कारणात् सूर्यसन्निधौ कुत्रचिद्दिनं तदाभावे कुत्रचित् रात्रिः सम्भवति।

सुरासुराणाञ्च अहोरात्रव्यवस्थाविषये सुर्यांशपुरुषेणोद्घोषितं यत् **"मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते[7]"**। स्वीये सिद्धान्तशिरौमणौ आचार्यभास्करेणापि तदेवोक्तं यत् **"रवेश्चक्रभोगोर्कवर्षं प्रदिष्टं द्युरात्रञ्च देवासुराणां तदेव"[8]**। अर्थात् देवदैत्ययोः कृते षष्ट्यधिकं त्रिंशत्-सौरदिनात्मकमहोरात्रं भवति। पृष्ठस्थानभिन्नत्वात् संपूर्णे जगति सूर्योदयः एककालावच्छिन्ने भवितुं नार्हति। अत्र कश्चित् क्षितिजविशेषः वर्तते यस्मात् उर्ध्वस्थः सूर्यः दृश्यमानः अधस्थोऽदृश्यमानो जायते। भूमौ यः यत्र तिष्ठति तत्तस्य जनस्य पृष्ठस्थानं कथ्यते। यथोक्तं गोलपरिभाषायाम्[9] -

**भूमौ तिष्ठति यो यत्र पृष्ठस्थानं तदुच्यते।**
**स्वदेशोऽपि स एवास्य कथ्यते गणकोत्तमैः।।**

कस्मिंश्चिदपि गोलस्य पृष्ठीयकेन्द्रद्वयं गर्भीयकेन्द्रमेकमिति केन्द्रत्रयं भवति[10]। तस्मात् गर्भीय-केन्द्रात् स्वदेशोपरि गता रेखा खमध्ये यत्र स्पृशति तत्तद्देशवासिनां कृते स्वखमध्यं स्वखस्वस्तिकं वा भवति। स्थानमिदं स्वस्थानस्य चलत्वादस्थिरं चलं वा वर्तते। तस्मात् स्वखमध्यात् नवत्यंशैः निर्मितं स्वक्षितजमिति। देवासुराणां क्षितिजज्ञानाय आदौ तेषां स्वदेशस्य ज्ञानमपेक्षितं वर्तते। विषयेऽस्मिन् सूर्यसिद्धान्ते[11] -

**उपरिष्टात् स्थितास्तस्य सेन्द्रा देवा महर्षयः ।**
**अधस्तादसुरास्तद्वद द्विषन्तोऽन्योन्यमाश्रिताः ।।**

अर्थात् मेरावुपरि देशे देवानां स्थानं तथा अधः देशे असुराणां निवासस्थानं वर्तते। अस्मात् स्थानात् ऊर्ध्वदिशि खमध्योपरिकृतो लम्बः आकाशे यत्र स्पृशति तत् तेषां खमध्यम् । इदं स्थानं ध्रुवप्रदेशो वर्तते। ततः नवत्यंशैः निर्मितं क्षितिजवृत्तम्। अस्मिन्नेव क्षितिजे ऊर्ध्वस्थे सूर्ये देवानां दिनमधस्थे रात्रिः भवति।

परञ्च अमरकोषे[12] देवानां अमरत्वात् तेषां निवासस्थानं पृथिव्यामुपरि भवितुमनार्हति यतोहि मेरोः स्थानं पृथिव्यां वर्तते। तद्यथा[13] -

**अनेकरत्ननिचयो जाम्बूनदमयो गिरिः।**

7. सू.सि.मध्य.श्लो.१३
8. सि.शि.काल.श्लो.१९
9. गो.प.श्लो.३०
10. गो.प.श्लो.२५
11. सू.सि.भूगोल.श्लो.३५
12. अमरकोष.स्वर्ग.श्लो२.
13. सू.सि.भूगोल.श्लो.३4

**भूगोलमध्यगो मेरूरुभयत्र विनिर्गतः।।**

कथमिति जिज्ञासायामुच्यते यत् यथा "गङ्गायां घोषः" इति कथनस्य अभिप्रायः भवति- गङ्गायाः तटे घोषः अस्ति न तु गङ्गायां। तद्वदेव उपरिष्टात् स्थितास्तस्य सेन्द्रा देवा महर्षयः इति श्लोकस्य अभिप्रायोऽयं नास्ति यत् देवानां पृष्ठस्थानं मेरौ उपरि वर्तते अपितु उपरिशब्देन उत्तरमेरुः अर्थात् सुमेरुः तथा अधः शब्देन दक्षिणमेरुः नाम कुमेरुः इति ज्ञातव्यम्।

वस्तुतः भुवो मध्यगतो दक्षिणोत्तरव्यासरूपो मेरुः उभयदिशि सुमेरु-कुमेरु नाम्ना प्रसिद्धोस्तीति भावः वर्तते। भूगोलमध्यगो मेरुरुभयत्र विनिर्गतः। तस्मिन् सुमेरौ ऊर्ध्वदिशि आकाशे कश्मिंश्चित् स्थानविशेषे देवानां स्थितिः वर्तते, यस्मात् स्थानात् खमध्ये ध्रुवतारकः अस्ति। तस्मात् ध्रुवतारकात् नवत्यंशैः तेषां क्षितिजं भवति। अस्य क्षितिजस्य संज्ञा भवति नाडीवृत्तम्। सूर्यः क्रान्तिमण्डले सञ्चरति तथा अस्मिनैव मण्डले मेषादयो द्वादशराशयः अवस्थिताः वर्तन्ते। क्रान्तिवृतमिदं तेषां देवासुराणां क्षितिजात् अर्थात् नाडीमण्डलात् किञ्चित् याम्योत्तरदिशि तिर्यक् वर्तते। क्रान्तिमण्डलेऽवस्थितमेष-बिन्दुतः कन्यान्तबिन्दुं यावत् क्रान्तिमण्डलः किञ्चित् उत्तरदिशि तथा तुलादिबिन्दुतः मीनान्तबिन्दुं यावत् किञ्चित् दक्षिणदिशि तिर्यक् वर्तते।

अतः अस्मिन् क्रान्तिवृते मेषबिन्दौ देवानां क्षितिजे सूर्ये दिनादिः, मिथुनान्ते स्थिते सूर्ये नतांशानां परमाल्पत्वात् दिनार्धम् जायते। कन्यान्ते पुनः क्षितिजगतत्वात् सूर्यास्तः भवति। एवं तुलादौ दैत्यानां क्षितिजस्थेऽर्के दैत्यानां दिनादिः। धनुरन्ते तेषां नतांशाभावात् दिनमध्यं, मीनान्तगते भानोः सूर्यास्तो जायते। एवं प्रकारेण सुरासुराणामहोरात्रं वैपरीत्येन इति युक्तियुक्तमेव। पुनः सूर्यः एकस्मिन् राशौ मासमेकं यावत् सञ्चरति तर्हि द्वादशमासेषु किमिति अनुपातद्वारा "**मासैर्द्वादशभिर्वर्षं दिव्यं तदह**


## धर्मार्जन/पुण्यार्जन की विशेषता :

**मानुष्यं वरवंशजन्मविभवो दीर्घायुरारोग्यता**
**सन्मित्रं सुसुतः सती प्रियतमा भक्तिश्च नारायणे।**
**विद्वत्वं सुजनत्वमिन्द्रियजयः सत्पात्रदाने रति-**
**स्ते पुण्येन विना त्रयोदश गुणाः संसारिणां दुर्लभाः।।**

**एवमेव**

**पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् ।**
**तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधी ।।**

(अष्टादशोऽङ्कः २०२०-२१ पृष्ठसंख्या- 95)

## लखनऊपरिसरीय-ज्योतिष-विभागस्य गतिविधयः

(सत्रम्-२०२०-२१)




उत्तरप्रदेशस्य राजधान्यां लखनऊ (लक्ष्मणपुरी)नामके नगरे अवस्थितोऽयं राष्ट्रिय- संस्कृत- संस्थानस्य लखनऊ-परिसरः स्वस्थापनादिवसात् (२ अगस्त १९८६ दिनाङ्कात्) भारतीयां संस्कृतिमभिरक्षयन् संस्कृत प्रचार- प्रसारादिषु क्षेत्रेषु महदवदानं कुर्वन् महानगरे अवस्थितोऽपि दशएकड़ परिमितेन क्षेत्रफलेन गोमतीनद्याः तटे विलसन् सज्जनानाकर्षयन् संस्कृतच्छात्राणां मनोकामनां पूरयन् निरन्तरमग्रे सरो वर्तते ।



अस्मिन् परिसरे १९९५ तमस्य ख्रिास्ताब्दस्य दिसम्बरमासे श्रीमताम् आचार्यसर्वनारायणझा-महोदयानामागमनेन ज्योतिष-विभाग-स्यारम्भः सञ्जातः। एतेषां कार्यकालः दिसम्बर १९९५ तः मई २०११ यावत् आसीत्। एतेषामागमनानन्तरं ज्योतिषशास्त्रस्य सम्यक् प्रचारः प्रसारश्च सञ्जातः। बहवः छात्राः ज्योतिषाचार्योपाधिं विद्यावारिध्युपाधिञ्च सम्प्राप्य देशस्य विभिन्नेषु प्रभागेषु ज्योतिषशास्त्रस्य प्रचार प्रसारा दिकर्मणि शास्त्राध्यापनादिकर्मणि च संलग्नाः विद्यन्ते । इमे श्रीकामेश्वरसिंहदरभङ्गाविश्वविद्यालयस्य कुलपतिपदे दिनांक 29 अप्रैल 2017 तः 30 मई 2020 शनिवासरं यावत् सेवां विधाय अद्यत्वे केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊ-परिसरस्य निदेशकपदस्य शोभामभिवर्धयन्ति। एतेषां निदेशकत्वे लखनऊ-परिसरस्य शोभा अनुदिनं शुक्लपक्षस्य चन्द्र इव वर्धमाना विद्यते।

संस्थानस्य लखनऊ-परिसरेऽस्मिन् फलितज्योतिषस्य गणितज्योतिषस्य च सम्यक् अध्यापनं भवति। द्वयोः विभागयोः मेधाविनः छात्राः अध्ययन-लेखनादिकर्मसु अग्रसराः वर्तन्ते। सिद्धान्तज्योतिषशास्त्रस्य सविधि-अध्ययन-अध्यापन-निमित्तमाधुनिकयन्त्राणां सङ्कलनाय प्रस्तावः मुख्यालये प्रेषितो विद्यते। तेषु दूरवीक्षणयन्त्रम् (२०१६-१७)सत्रे ज्योतिषविभागेन सम्प्राप्तम्। अनेन यन्त्रमाध्यमेन छात्राः अध्यापकाश्च ग्रह-नक्षत्रैश्च वेधविधिना परिचिताः भवन्ति।

**सत्रेऽस्मिन् विभागीयाचार्याणां नामानि –**

अस्मिन् सत्रे लखनऊपरिसरे ज्योतिषविभागे चत्वारः अध्यापकाः आसन्। तेषु विभागस्य सहायकाचार्यः (संविदा) डॉ. नरेशशर्मा 27 जनवरी 2021 दिनाङ्के हरियाणाप्रान्तस्थ-श्रीवाल्मीकि-संस्कृतविश्वविद्यालये समायोजितायां सहायकाचार्यपदस्य अन्तर्वीक्षायां चयनितः सञ्जातः। तदनु देहलीमुख्यालयस्य निर्देशेन ज्यौतिषविभागे 21 फरवरी 2021 दिनाङ्के समायोजितायाम् अन्तर्वीक्षायां द्वयोः अतिथि-आचार्ययोः चयनं सञ्जातम्। तेषु डॉ. अश्विनीकुमारपाण्डेयस्य तथा वाराणसीस्थस्य रानीपद्मावती-तारा-योगतन्त्र-आदर्श-संस्कृत-महाविद्यालस्य ज्योतिष-विभागीय-अतिथिप्राध्यापकस्य श्रीआनन्दप्रकाशपाठकस्य चयनं सञ्जातम्। अद्यत्वे विभागे षड्-अध्यापकाः स्वीयं-स्वीयं दायित्वं महत्या श्रद्धया निर्वहन्ति। तेषां नामानि तथा परिसरेऽस्मिन् कार्यभारग्रहणतिथिः-

| नाम | पदम् | | परिसरेऽस्मिन् कार्यभारग्रहणतिथिः- |
|---|---|---|---|
| १. **प्रो. सार्वनारायणझाः** | परिसर-निदेशकः | | २८ दिस. २०२० |
| २. **प्रो. मदनमोहनपाठकः** | आचार्योऽध्यक्षश्च | | ०६ जून २०११ तः |
| ३. **डॉ. उमेशकुमारपाण्डेयः** | सहायकाचार्यः | (संविदा) | २१ जून २०११ तः |
| ४. **डॉ. (श्रीमती) चन्द्रश्रीपाण्डेयः** | सहायकाचार्या | (संविदा) | ०१ अगस्त २०१२ तः |
| ५. **डॉ. अश्विनीकुमारपाण्डेयः** | सहायकाचार्यः | (अ.प्रा.) | २४ फरवरी २०२१ तः |
| ६. **श्रीआनन्दप्रकाशपाठकः** | सहायकाचार्यः | (अ.प्रा.) | २४ फरवरी २०२१ तः |

अस्मिन् परिसरे ज्योतिषशास्त्रं पठितुं देशस्य विविधेभ्यः प्रान्तेभ्यः पिपठिषवः छात्राः अध्ययनं विधाय स्वीयं जीवनं सफलीकुर्वन्ति। ज्योतिषविभागे विषयद्वयोः फलित-गणितयोः सम्यक् अध्यापनं विभागीयाध्यापकैः सोत्साहं क्रियते। यस्य प्रमाणस्वरूपं अत्रत्याश्छात्राः समग्रेऽपि भारते फलित-सिद्धान्तविभागद्वयोरपि परीक्षायां सर्वाधिकानङ्कानवाप्नुवन्ति।

यद्यपि ज्योतिषं पठितुं छात्राणं संख्या स्वल्पीयसी भवति । तथापि अत्रत्याः छात्राः आचार्यकक्षोत्तीर्णतां सम्प्राप्य विविध-उद्योगद्वारा स्वीयं जीवनं यापयन्ति। केचन छात्राः शास्त्रेऽस्मिन् शोधकार्यमपि कुर्वन्ति। अत्र प्रतिकक्षं छात्राणां संख्या निम्नलिखिताः विद्यन्ते । तद्यथा –

| **अस्मिन् (२०१९-२०) सत्रे छात्रसंख्या - (फलितज्योतिष-सिद्धान्तज्योतिष-विभागयोः)** | | | | | | | आहत्य कुलसं. |
|---|---|---|---|---|---|---|---|
| कक्षा | फलितज्योतिषे | | | सिद्धान्तज्योतिषे | | | |
| लिङ्गम् | पु. | स्त्री. | **योगः** | पु. | स्त्री. | **योगः** | |
| प्राक्शास्त्री- 1 | 06 | 00 | **06** | - | - | – | 06 |
| प्राक्शास्त्री- 2 | 03 | 00 | **03** | - | - | – | 03 |
| शास्त्री- 1 | 06 | 00 | **06** | 03 | 00 | **03** | 09 |
| शास्त्री- 2 | 06 | 00 | **06** | 02 | 00 | **02** | 08 |
| शास्त्री- 3 | 08 | 00 | **08** | 01 | 01 | **02** | 10 |
| आचार्यः-1 | 07 | 00 | **07** | 05 | 00 | **05** | 12 |
| आचार्यः-2 | 03 | 00 | **03** | 01 | - | **01** | 04 |
| विद्यावारिधि- | | | | | | | |
| | | | | | | | 52 |

२०१३-१४ शिक्षासत्रतः विद्यावारिधि (शोध) छात्राणां विवरणम्-

| शोधार्थी नाम<br>शोध-पञ्जीयनसंख्या<br>आधारसंख्या | **पञ्जीयन-दिनांकः** | **शोधशीर्षकः** | नियमितः/<br>स्वतन्त्रः | **मार्गदर्शक- नाम** |
|---|---|---|---|---|
| १.उमाकान्ततिवारी<br>पं.सं.- १५६८४<br>आ.सं- ५१९१७७७८५५४२ | १४ फर. २०१४<br>**शोधप्रबन्धसमर्पित दि.**-16/7/2019<br>**उपाधिप्राप्तः** | शुभाशुभफलनिर्धारणे सामुद्रिकशास्त्रस्य प्रायोगिकमनुशीलनम् | स्वतन्त्रः | प्रो.मदनमोहन पाठकः |
| २.शैलेशकुमारतिवारी<br>पं.सं.-१५७१०<br>आ.सं.-४५६९१५१६२४ | २५ फर. २०१४<br>**उपाधिप्राप्तः** | ज्योतिषशास्त्र दृष्ट्या मानसिकरोगस्य प्रायोगकिमध्यनम् | नियमितः | प्रो.मदनमोहन पाठकः |
| ३.अभयत्रिपाठी<br>पं.सं. १६७९७<br>आ.सं.-९००९६४६६९०७६ | २९ दिस.२०१४ | मयमत-समरांगणसूत्र-धारयोः देवालयसन्दर्भे तुलनात्मकमध्ययनम् | स्वतन्त्रः | डा.अमितकुमार शुक्लः |

| | | | | |
|---|---|---|---|---|
| ४. कु. चित्राश्रीवास्तव<br>पं. सं.-१६७९९<br>आ.सं.- ६०५९८३०३१५४१ | २९ अप्रै.२०१४<br>**शोधप्रबन्धसमर्पित** | प्रशासकीययोगानां<br>ज्योतिषशास्त्रदृष्ट्या<br>अध्ययनम् | नियमितः | डा.अमितकुमारशुक्लः |
| ५. शत्रुघ्नपाण्डेयः<br>पं.सं.- १८३९५<br>आ.सं.-२२३७४८०७६११४ | २० जन.२०१५ | ज्योतिषशास्त्रोक्तानाम्<br>अरिष्टयोगानां<br>विश्लेषणात्मकमध्ययनम् | नियमितः | डा.अमितकुमारशुक्लः |
| ६. सरिता शुक्ला<br>पं.सं. १७११५<br>आ.सं. | १ जन. २०१५ | डा. प्रशस्यमित्रशास्त्रिणः<br>कथासाहित्यिक<br>समीक्षात्मक-<br>मध्ययनम् | नियमितः | डा. अमितकुमारशुक्लः |
| ७. वैङ्कटेश्वरपाण्डेयः<br>पं.सं.- ४३२<br>आ.सं. ७८७६३०६४७९०२ | २१ सित.२०१७ | आदितस्त्रिप्रश्नाधि-<br>कारपर्यन्तं सूर्यसिद्धान्तस्य<br>समीक्षात्मकमध्ययनम् | नियमितः | प्रो. मदनमोहनपाठकः |
| ८. सन्तोषपाठकः<br>पं.सं.<br>आ.सं. ५३००८७६६२०८३ | २१ सित. २०१७ | कमलाकरभटदृष्ट्या सूर्य-<br>चन्द्रग्रहणयोस्तुलना<br>त्मकमध्ययनम् | नियमितः | प्रो. मदनमोहनपाठकः |
| ९. अभयकुमारपाण्डेयः<br>पं.सं.<br>आ.सं. ५३००८७६६२०८३ | १० अगस्त<br>२०१७ | कृषिपराशरस्य<br>समीक्षात्मकमध्ययनम् | नियमितः | प्रो. मदनमोहनपाठकः |
| १०. अमितकुमारमिश्रः<br>पं.सं.<br>आ.सं. ३४००३९२६७१८७ | ०७ अगस्त<br>२०१७ | जन्माङ्गचक्रे<br>विदेशगमनयोगानां<br>सर्वेक्षणात्मकमध्ययनम् | नियमितः | प्रो. मदनमोहनपाठकः |

## प्राकशास्त्रीप्रथमवर्षस्य छात्राः- सत्रम्- 2020-21

कमलेश कुमार तिवारी
उत्सव कुमार
सिद्धान्तदेव शुक्ल
रिषु कुमार
आकाश पाण्डेय
हुकुमचन्द्रपाण्डेय

**प्राकशास्त्रीद्वितीयवर्षस्य छात्राः- सत्रम्- 2020-21**

आशुतोष शुक्ला

अखिल पाण्डेय

प्रिंस कुमार

**शास्त्रीप्रथमवर्षफलित/सिद्धान्तज्यौतिषछात्राः- सत्रम्- 2020-21**

सत्यम अवस्थी

आशीष कुमार

प्रभाकर मिश्रा

सतीश कुमार चतुर्वेदी

रामकृष्ण

नारायण मिश्रा

**शास्त्रीद्वितीयवर्षफलित/सिद्धान्तज्यौतिषछात्राः- सत्रम्- 2020-21**

दिव्यांशु मिश्रा

सचिन तिवारी

अंश तिवारी

कुशाग्र मिश्रा

सिद्धान्त तिवारी

विनय पाण्डेय

हिमांशु झा

प्रखरकुमारअवस्थी

**शास्त्रीतृतीयवर्षफलित/सिद्धान्तज्यौतिषछात्राः- सत्रम्- 2020-21**

दिनकर अवस्थी

शिवम

पवन कुमार चौबे

विशेष कुमार

सूर्यांश शुक्ल

शरद कुमार मिश्र

विकास तिवारी

शंखधर द्विवेदी

अवधविहारी

विभा मिश्रा

## आचार्यप्रथमवर्षफलित/सिद्धान्तज्यौतिषछात्राः- सत्रम्- 2020-21

शशांक शोखर दुबे
अनिल कुमार शुक्ल
वैभव कुमार मिश्र
ऋषिराज पाण्डेय
अश्विनी कुमार पाण्डेय
जनार्दन त्रिवेदी
नितिन त्रिवेदी
सिद्धार्थ मिश्रा
सर्वेश कुमार दुबे
माधव कुमार झा
शुभम त्रिवेदी

## आचार्यद्वितीयवर्षफलित/सिद्धान्तज्यौतिषछात्राः- सत्रम्- 2020-21

अमरदीप मिश्रा
आशुतोष पाण्डेय
मनीषकुमारतिवारी
अभिनव आनन्द पाण्डेय

## भास्कराचार्यपरिषद्-

छात्राणां सर्वमुखीविकासाय विभागेऽस्मिन् प्राध्यापकानां छात्राणाञ्च मनोयोगेन भास्कराचार्यपरिषदः परिकल्पना कृता विद्यते। यस्यां परिषदि मासे पूर्वसूचनानुसारं वारद्वयं छात्राः अध्यापकानां निर्देशने एकत्र सम्भूय भाषणादिना स्वाधीतस्य विषयस्य परिमार्जनं कुर्वन्ति। अस्यां परिषदि विभागीयाध्यापकानामपि क्रमशः व्याख्यानं भवति । अनेनापि छात्राः लाभान्विताः भवन्ति।

## ज्योतिषपरिचयपाठ्यक्रमस्य वृत्तम्-

सर्वसामान्याः जनाः अपि ज्योतिषशास्त्रं जानीयुस्तदर्थं त्रैमासिकज्योतिषपरिचयपाठ्य-क्रमस्य आयोजनं प्रतिसत्रं प्रचलति। सत्रेऽस्मिन् करोना-महामारी-कारणात् ज्योतिष-परिचय-पाठ्यक्रमस्य आयोजनम् अविरुद्धं वर्तते।

कार्यक्रमेऽस्मिन् अध्येतृवर्गेषु सामान्याः नागरिकाः, बैंककर्मिणः, सुरक्षाकर्मिणः, चिकित्सकाः, अभियन्तारः, विभिन्न-विभागीयाधिकारिणः, विविधव्यवसायिनः, नेतृगणाः, पौरोहित्यकर्मरताः, मिडिया-बान्धवाः अन्ये सामाजिकाश्च अध्येतृरूपेण समुपस्थिताः भवन्ति। अस्य **पञ्चदशचक्रस्य** आयोजनं २०२०-२१ सत्रे भवितव्यम् आसीत्। परन्तु करोनामहामारीकारणात् सत्रेऽस्मिन् अस्य कक्षा नैव

प्रचलिता। अस्तु, अयं त्रैमासिकज्योतिषपरिचयपाठ्यः पूर्वनिर्धारितकालानुसारेणैव प्रतिसप्ताहं दिनत्रयं दिनचतुष्टयं वा सायं 5 वादनात् 6 वादनं यावत् प्रचलति। अनेन कार्यक्रमेण बहवः छात्राः अध्येतारश्च लाभान्विताः भवन्ति।

विगत 2019-20 सत्रस्यावसाने कोरोना-वायरस-महामारिप्रभावात् मार्चमासस्य 22 दिनाङ्के देशस्य प्रधानमन्त्रिणः श्रीनरेन्द्रमोदीमहोदयस्य आह्वानेन जनताकर्फ्यु, तथा 23 तः 25 दिनाङ्कं यावत् मुख्यमन्त्रिणः Lockdown समग्रे उत्तरप्रदेशे, तदनु अग्रे एकविंशति दिनानां कृते देशस्य प्रधानमन्त्रिणः श्रीनरेन्द्रमोदीमहोदयस्य आह्वानेन समग्रे देशे 14 अप्रैल 2020 दिनाङ्कं यावत् lock-down आसीत्। अस्मात्कारणात् वर्षेऽस्मिन् विभागे ज्योतिषसङ्गोष्ठी तथा विभागे विशिष्टं व्याख्यानञ्च न जातम्। ज्योतिषविभागीया त्रिकालद्योतिनी नामिका पत्रिका अपि नैव प्रकाशिता। इयं स्थितिः अद्यत्वेऽपि अवलोक्यते। छात्राणां सत्रेऽस्मिन् विशेषरूपेण ऑनलाइनमाध्यमेनैव कक्षा प्रचलति। तथापि ................ ईश्वरेच्छा बलीयासी। इत्थं सर्वतोभावेन विकासोन्मुखः अयं ज्योतिषविभागः देव-द्विज-गुरुप्रसादात् सर्वथा अग्रसरो वर्तते इति शम् ।

---

## कलिमाहात्म्यम्

सन्तः क्वापि न सन्ति सन्ति यदि वा दुःखेन जीवन्ति ते
विद्वांसोऽपि न सन्ति सन्ति यदि वा मात्सर्ययुक्ताश्च ते ।
राजानोऽपि न सन्ति सन्ति यदि वा लोभाद्धनग्राहिणो
दातारोऽपि न सन्ति सन्ति यदि वा सेवानुकूलाः कलौ ।।
धर्मः प्रव्रजितस्तपः प्रचलितं सत्यञ्च दूरे गतं
पृथ्वीमन्दफला नराः कपटिनः चित्तञ्च शाठ्योर्जितम्।।
राजानोऽर्थपराः न रक्षणपराः पुत्राः पितुर्द्वेषिणः
साधुः सीदति दुर्जनः प्रभवति प्राप्ते कलौ दुर्युगे ।।

## संस्कृत - गीतिका

**प्रो.रामकुमारशर्मा**
आचार्योऽध्यक्षश्च, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुर-परिसरः

त्यज संसारं गतसमसारम्
स्मारं स्मारं भवतरणम्
स्वान्त ! कलय राधारमणम् ।।१।।
यस्य बोधलवकणिकासुरया निन्दसि सर्वान्मत्तः ।
यस्य सेवने जीवनकालः सकलो भवता दत्तः ।।
प्राप्ते मरणे कृतसमहरणे
त्राता नहि तद् व्याकरणम्
स्वान्त ! कलय राधारमणम् ।।२।।
कालिदासकवितानिःष्यन्दा भवता रसा निपीताः ।
मम्मटपण्डितराजविचारा आजीवनञ्च गीताः ।।
काले क्रुद्धे कण्ठे रुद्धे
साहित्यं नहि हितकरणम्
स्वान्त ! कलय राधारमणम् ।।३।।
ग्रहगणनालीनेन न भवता कदापि कालो गणितः ।
सोऽद्य शिरसि जरया स्वभगिन्या नृत्यति कामं कुपितः ।।
क्षीणा शक्तिर्लीना भक्तिः
ज्योतिषविद्या नहि शरणम्
स्वान्त ! कलय राधारमणम् ।।४।।
धर्मशास्त्रमधिकृत्य सर्वदा विहितः स्वप्नविचारः ।
किन्तु न विदितः कदापि भवता स्वप्नोऽयं संसारः ।।
नहि चित्तं शुद्धं नहि तद् बुद्धम्
धर्मशास्त्रमपि नोद्धरणम्
स्वान्त ! कलय राधारमणम् ।।५।।
विधिमीमांसामांसलमतिना नात्मा भवता ज्ञातः ।
मधुपुष्पितवाणीकुविचारे यातः सायं प्रातः ।।
विगतसहायः स्थूलः कायः
मीमांसा नहि गतिकारणम्
स्वान्त! कलय राधारमणम् ।।६।।

| संस्कृतसंरक्षणसम्वर्धनसम्बन्धिविभिन्नकार्यक्रमेषु सम्पादकस्यावदानम् - (शैक्षिकसत्रम्-२०२०-२१) | | |
|---|---|---|
| **दिनाङ्कः** | **स्थानम्** | **कार्यक्रमः** |
| २१ अप्रैल २०२० मङ्गलवासरः | National conference on jyotish | समसामयिकसमस्यानां समाधाने ज्योतिषस्य भूमिका |
| १७ मई २०२० रविवासरः दिवा 02/00 वादने meet.google/fpy-rcxa-jdx | जगद्गुरुरामानन्दाचार्य राजस्थानसंस्कृतविश्वविद्यालय जयपुर | राष्ट्रिय ज्योतिष ई संगोष्ठी (बेबिनार) विषयः- **चिकित्साज्योतिषम्** |
| २४ जुलाई २०२० शुक्रवासरः | महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः कैथल, हरियाणा MVSU Kaithal | facebook, MVSU Kaithal विषयः- **वर्णादङ्कोत्पत्तिसिद्धान्ताः** |
| ११ सितम्बर २०२० शुक्रवासरः | **पातु नो वेदवृक्षः** facebook, प्रकाशरंजनमिश्रः | **पातु नो वेदवृक्षः** facebook, विषयः- **स्वरशस्त्रस्य वैशिष्ट्यम्** |
| १० फरवरी २०२१ बुधवासरः https://meet.google.com/ vho-fknv-vkj | केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीर-परिसरे जम्मू | द्विदिवसीय-अन्तर्जालीय-राष्ट्रिय-ज्योतिष-शोध-संगोष्ठ्यां मुख्यवक्तृत्वेन अभिभाषणम् **विषयः- ज्योतिषशास्त्रे ग्रहणविमार्शः** |
| २१ फरवरी २०२१ सायं ३:३० वादनतः https://meet.google.com/ zmd-towr-ppj | केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्य-परिसरे जम्मू | अन्ताराष्ट्रियमातृभाषादिवससमारोहे मुख्यवक्तृत्वेन अभिभाषणम् **विषयः- मातृभाषायाः वैशिष्ट्यम्** |
| २५ फरवरी २०२१ गुरुवासरः १२:३० वादनतः https://meet.google.com/fby-gsjt-tio | कामेश्वरसिंह-दरभंगा-संस्कृत-विश्वविद्यालयस्य स्ना. ज्यो. विभागे | एकदिवसीया राष्ट्रियज्योतिषव्याख्यान-मालायां मुख्यवक्तृत्वेन अभिभाषणम् **विषयः- दाम्पत्यसुखविमर्शः** |
| १० मार्च २०२१ meet.google.com/ toe-xodz-zss | श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालये, नवदेहली-१६ | वास्तुशास्त्र-व्याख्यानमालायां व्यवसायिक-वास्तु विषयमवलम्ब्य व्याख्यानम् |

## भास्करोदयपत्रिकायाः सप्तम-अङ्कस्य लोकार्पणम् :-



सप्तम -अङ्कस्य गरली -परिसरे लोकार्पणं कुर्वन्तः नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य निदेशकचराः श्रीमन्तः डॉ.कमलाकान्तमिश्रमहोदयाः पार्श्वे सन्ति गरलीपरिसरस्य प्राचार्याः प्रो.सुरेन्द्रझामहोदयाः एवञ्च आचार्याः रामदेवझामहोदयाः, आचार्याः रामनारायणदासमहोदयाः, पत्रिकासम्पादकःडॉ.मदनमोहनपाठकश्च

दिनाङ्कः- २२ फरवरी २००९ स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

## भास्करोदयपत्रिकायाः त्रयोदश-अङ्कस्य लोकार्पणम् :-



भास्करोदयपत्रिकायाः त्रयोदशअङ्कस्य लोकार्पणं कुर्वन्तः भारतसर्वकारस्य माननीयगृहमन्त्रिणः श्रीमन्तःराजनाथसिंहमहोदयाः, पार्श्वे विलसन्ति प्रो. शिशिरकुमारपाण्डेयः, डॉ. उमेशचन्द्रपाण्डेयः, प्रो. रामसागरमिश्रमहोदयाश्च

दिनाङ्कः - २२ नवम्बर २०१६ शनिवासरः, लखनऊ

## भास्करोदयपत्रिकायाः चतुर्दश-अङ्कस्य लोकार्पणम् :-




भास्करोदयपत्रिकायाः चतुर्दश-अंकस्यं लोकार्पणं कुर्वन्तः विलसन्ति दक्षिणतः ICPR इति संस्थायाः निदेशिकाः डॉ. पूजाव्यासमहोदयाः, का.सिं.द.सं. विश्वविद्यालयस्य कुलपतयः प्रो. सर्वनारायणझामहोदयाः, प्रभारिप्राचार्याः प्रो. विजयकुमारजैनमहोदयाः, उ.प्र.शासनस्य विधिमन्त्रिणः मा. ब्रजेशपाठकमहोदयाः, परिसरस्य वरिष्टाचाष्टाचार्याः प्रो.शिशिरकुमारपाण्डेयमहोदयाः पत्रिकासम्पादकाः प्रो. मदनमोहनपाठकमहोदयाश्च।

दिनाङ्कः - ०८ अप्रैल २०१७ शनिवासरः, लखनऊ

गोवं ास्य परिरक्षणं कुरु। राष्टस्य परिवर्धनं कुरु।।



भास्करोदयनामिकायाः ज्योतिष-शोधपत्रिकायाः विगताङ्काः-



ISSN No.:2278-0815